ISSN : 0975-1769

# संस्कृतविमर्शः

( यू.जी.सी. केयर-मानिता विद्वत्परिशीलिता अन्ताराष्ट्रीया शोधपत्रिका )

(An UGC-CARE Listed Peer-Reviewed International Research Journal)

## नवोत्कर्षः

अङ्कः 23 ( जुलाई 2022-दिसम्बर 2022 ) वर्षम् 2024

प्रधानसम्पादकः

प्रो. श्रीनिवास वरखेड़ी

कुलपतिः

सम्पादकः

डॉ. गणेश ति. पण्डितः

केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः

देहली

# संस्कृतविमर्शः

(An International Refereed & Peer-Reviewed
Research Journal, UGC-CARE Listed)

## नवोत्कर्षः

अङ्कः 23 (जुलाई 2022 - दिसम्बर 2022) वर्षम् 2024

प्रधानसम्पादकः
**प्रो. श्रीनिवास वरखेड़ी**
कुलपतिः

सम्पादकः
**डॉ. गणेश ति. पण्डितः**

**केन्द्रीयसंस्कृतविश्वविद्यालयः**
**संसदः अधिनियमेन स्थापितः**
**देहली - 110 058**

प्रकाशकः
कुलसचिवः
**केन्द्रीयसंस्कृतविश्वविद्यालयः**
(संसदः अधिनियमेन स्थापितः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058
011-28524993, 28521994, 28520977
emial : res-pub@csu.co.in
website : www.sansknit.nic.in

© केन्द्रीयसंस्कृतविश्वविद्यालयः

ISSN : 0975-1769

संस्करणम् : 2024

मूल्यम् - 300.00

**ग्राहकताशुल्कम्**
त्रैवार्षिकम् - 1800.00
पञ्चवार्षिकम् - 3000.00

मुद्रकः
डी.वी. प्रिंटर्स
97-यू.बी. जवाहर नगर, दिल्ली-110007

# SAṂSKṚTA-VIMARŚAḤ

(An International Refereed & Peer-Reviewed
Research Journal, UGC-CARE Listed)

## NAVOTKARṢAḤ

**Vol. 23** **(July 2022 - December 2022)** **Year 2024**

Editor in Chief
**Prof. Shrinivasa Varakhedi**
Vice-Chancellor

Executive Editor
**Dr. Ganesh T. Pandit**

**CENTRAL SANSKRIT UNIVERSITY**
(Established by an Act of Parliament)
**Delhi**

Publisher:
Registrar
**Central Sanskrit University**
56-57, Institutional Area, Janakpuri,
New Delhi - 110058 (India)
E-mail : res-pub@csu.co.in
website : www.sanskrit.nic.in

© Central Sanskrit University

ISSN : 0975-1769

Edition : 2024

Rs. 300.00

**Subscription**

Three Years : 1800

Five Years : 3000

Printed by :
D.V. Printers
97-U.B., Jawahar Nagar, Delhi-110 007

# परामर्शदातृ-समितिः

1. **प्रो. बनमाली बिश्वालः**
   अधिष्ठाता (शैक्षणिकः)
   केन्द्रीयसंस्कृतविश्वविद्यालयः,
   नवदेहली-110058

2. **प्रो. ललित कुमार त्रिपाठी**
   अधिष्ठाता (शोधप्रभागः)
   गङ्गानाथझापरिसरः
   केन्द्रीयसंस्कृतविश्वविद्यालयः
   प्रयागराजः, उत्तरप्रदेशः

3. **प्रो. गोदावरीमिश्रः**
   सङ्कायाध्यक्षः - SBSPCR
   नालन्दाविश्वविद्यालयः, राजगृहम्,
   बिहारः, पिन-803116

4. **प्रो. शशिप्रभाकुमारः**
   सङ्कायाध्यक्षा,
   श्रीशङ्कराचार्यसंस्कृतमहाविद्यालयः,
   नवदेहली, पिन-110001

5. **प्रो. रमेशकुमारपाण्डेयः**
   शोधविभागः,
   श्रीला.ब.शा.रा.सं.वि.वि., नवदेहली,
   पिन-110016

6. **प्रो. राधाकृष्ण सि.एस्.**
   संस्कृतविभागः,
   पाण्डेचेरिविश्वविद्यालयः, पाण्डेचेरी
   पिन- 605014

# Advisory-Board


1. **Prof. Banmali Biswal**
   Dean (Academic)
   Central Sanskrit University,
   New Delhi-110 058

2. **Prof. Lalit Kumar Tripathi**
   Dean (Research)
   Ganganath Jha Campus
   Central Sanskrit University,
   Prayagraj (U.P.) Pin - 211002

3. **Prof. Godavri Mishra**
   Dean, SBSPCR,
   Nalanda University,
   Rajgir (Bihar) Pin - 803116

4. **Prof. Shashi Prabha Kumar**
   Dean,
   Shri Shankaracharya Sanskrit Mahavidyalaya,
   New Delhi, Pin-110001

5. **Prof. Ramesh Kumar Pandey**
   Department of Research,
   LBS National Sanskrit University
   New Delhi, Pin - 110016

6. **Prof. Radhakrishna P.**
   Deparment of Sanskrit
   Pondicherry University
   Pondicherry-605014

# सम्पादकीयम्

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा केन्द्रीयसंस्कृतविश्वविद्यालयस्य गुणवत्तां परीक्ष्य A++ इत्येषा सर्वोत्कृष्टा श्रेणी प्रदत्ता वर्तते इति विदितमेव समेषाम्। ततश्च अयं विश्वविद्यालयः विश्वविद्यालयानुदानायोगस्य A क्रमान्तर्गतायां विश्वविद्यालय-पट्टिकायामपि राजतेतमाम्। विश्वविद्यालयस्यास्य माननीयकुलपतीनाम् आचार्य श्रीनिवासवरखेडीवर्याणां मार्गदर्शनेनैव अयम् अभिनवोत्कर्षः सम्प्राप्तः वर्तते। असौ विश्वविद्यालयः तेषां मार्गदर्शनं प्रतिपदं स्वीकृत्य पठनपाठनप्रकाशनसंशोधनादिषु सर्वेषु शैक्षिककार्येषु गुणवत्तां परिरक्षितुम् अनुक्षणं प्रयतते। विशिष्य अस्मिन् शैक्षिकसत्रे शिक्षायाः गुणवत्तापरिरक्षणाय परिवर्धनाय च शैक्षिकगुणोत्कर्षवर्षं (2023-24) सार्थकोपक्रमैः समाचरति। शैक्षिकगुणोत्कर्षः नामिका सप्तदिनव्यापिनी एका कार्यशाला अपि नवम्बर मासस्य द्वाविंशतितमात् दिनाङ्कात् अष्टाविंशति- दिनाङ्कं यावत् मुख्यालये समायोजिता। स्वाध्यायः शिक्षा शोधः इति शैक्षिकोत्कर्षहेतून् अधिकृत्य इयं कार्यशाला अस्माभिः समायोजिता। एवं पठनपाठनप्रकाशनसंशोधनादिषु कार्येषु विशिष्टं ध्यानं केन्द्रीकरोति सपरिसरः केन्द्रीयसंस्कृतविश्वविद्यालयः। विशिष्य भारतीयवाङ्मयप्रचारकार्येषु आबहोः कालात् प्रकाश्यमाना संस्कृतविमर्शः इत्येषा शोधपत्रिका भृशमुपकरोति। लक्ष्यकेन्द्रिता विविधविद्याधारित-शोधलेखैः शोभमाना च एषा शोधपत्रिका नैरन्तर्येण सारस्वतलोकं प्रकाशयन्ती विद्यते। विश्वविद्यालयानु-दानायोगस्य रक्षितसूच्याम् उल्लिखितायाम् अस्यां पत्रिकायां संस्कृतेन सह आङ्ग्लभाषायां हिन्दीभाषायां च उपनिबद्धाः लेखाः लसन्ति।

तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः, आहारविवेके स्वास्थ्य-सिद्धिः, ङ्याप्प्रातिपदि-कादिति सूत्रे दीक्षितनागेशमतयोः विचारानुशीलनम्, Living Traditions of Advaita Vedanta, प्राचीन भारतीय मूल्याङ्कन प्रणाली विमर्श, Digital Conservation and Preservation of Sanskrit Heritage इत्यादयः शोधलेखाः अस्मिन् अङ्के सन्ति। एवं संस्कृत-हिन्दी-आङ्ग्लभाषासु उपनिबद्धस्य अस्य अभिनवोत्कर्षद्योतकस्य अङ्कस्य सम्पादनकर्मणि प्रतिपदं मार्गदर्शनं कृतवद्भ्यः कुलपतिभ्यः सम्पादकगणः सनमोवाकं धन्यवादान् व्याहरति। प्रकाशनकार्येषु विश्वविद्यालयस्य कुलसचिवाः आचार्य रा.गा. मुरलीकृष्णवर्याः अपि काले काले

अभिप्रेरयन्ति इत्यतः तेभ्योऽपि धन्यवादान् व्याहरामः। कुलपतीनां विशेषकार्याधिकारी कार्यक्रमयोजनानुभागयोः निदेशकः प्रो. मधुकेश्वरभट्टवर्यः, प्रकाशनानुभागस्य डॉ. पवनव्यासवर्यः, डॉ. छोटी बाई मीना वर्या, श्रीमती सोनिया, कुमारी रीना प्रभृतयः साहाय्यमकुर्वन्। अतः तेभ्यः अपि धन्यवादान् समर्पयामः। विशिष्य परामर्शकमण्डल्याः सदस्यान् समीक्षकान् च पौनःपुन्येन स्मरामः। तेषां सहयोगेन एव एषा पत्रिका प्राकाश्यतां यातीति शम्।

**सम्पादकगणः**

# विषयानुक्रमणिका


परामर्शदातृ-समितिः *v*

**Advisory Board** *vi*

सम्पादकीयम् *vii*

**संस्कृत-संभागः**

1. येऽनूचानास्ते कवयः, योऽनूचानः स नो महान् इत्यनयोः श्रुतिस्मृतिवाक्ययोः विश्लेषणम् 1
   –डॉ. गणेश ति पण्डित:

2. ङ्याप्प्रातिपदिकादिति सूत्रे दीक्षितनागेशमतयोः विचारानुशीलनम् 7
   –डॉ. शम्भुनाथ भट्टः

3. तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः 16
   –डॉ. विदुषी बोल्ला

4. आहारविवेके स्वास्थ्यसिद्धिः आहारशुद्धौ सत्त्वशुद्धिः 25
   –डॉ. नवीन भट्ट

5. त्रिविधं तपः –डॉ. जि. नरसिंहुलु 31

6. वैश्विकान्तरिकाशान्तये प्रज्ञापराधः 40
   –डॉ. अमृताकौरः

7. नैषधचरितालोके वैदिकदेवस्य स्वरूपम् 44
   –टुम्पा जाना

8. आयुर्वेदे योगतत्त्वम् –डॉ. गोबिन्दः दासः 57

9. स्वास्थ्यमौषधम् –डॉ. चक्रधरमेहेरः 67

10. जयरामन्यायपञ्चाननकृता काव्यप्रकाशटीका-एकः विमर्शः 73
    –डॉ. अनसूया महारणा

11. शिशुपालवधस्य सर्वङ्कषाटीकायाः कोशोद्धृतीनां प्रामाणिकताविचारः –डॉ. मृत्युञ्जयगराँइ 83

12. **नाऽभिधालक्षणाभ्यां व्यञ्जनायाः गतार्थत्वम्** 94
–राजकुमार-मण्डलः

13. **भक्तिमार्गालोके श्रीजीवगोस्वामी** 105
–अमलकुमार कर

14. **अर्चावतारस्य वैदिकत्वप्रदर्शनं बुद्धनिर्वाणकाला-पेक्षयार्वाचीनत्वनिरसनञ्च - एकं समीक्षणम्** 114
–चन्दन-मुखार्जी

15. **उपदेशसाहस्र्यनुसारम् अद्वैतेतरवादीनां मतपरीक्षणं स्वमतस्थापनञ्च** 126
–कार्त्तिकरुइदासः

16. **षष्ठीसमासनिषेधशास्त्राणां समीक्षणम्** 142
–उत्तम-माझिः

17. **पाणिनीयव्याकरणे प्रकृतिवदनुकरणे ज्ञापकानामावश्यकता** 154
–पल्लवी-मालिकः

18. **स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रस्य समीक्षणम्** 166
–डा. मलयपोडे

19. **स्त्रीधनविषये प्राचीनधर्मशास्त्रेण सहार्वाचीनहिन्दु विधेस्तुलनात्मकमध्ययनम्** 178
–डॉ. अञ्जन-दासः

20. **उपनिषत्सु निहितप्रमुखतत्त्वानां विवेचनम्** 184
–डॉ. विशम्बरदासः

## हिन्दी संभाग

21. **प्राचीन भारतीय मूल्यांकन प्रणाली विमर्श** 191
–प्रो. लीना सक्करवाल

22. **काव्यप्रकाशोक्त 'प्रतिकूलविभावादिग्रह' दोष परिशीलन** 206
विशेषतः काव्यप्रकाश की 'बालबोधिनी' टीका के सन्दर्भ में
–शिवानी

23. **समकालीन संस्कृत महिला लेखन और उनके काव्य उपमान** 214
–डॉ. अजय कुमार मिश्र

24. **पश्चिम बंगाल में उच्च माध्यमिक विद्यालयों में छात्र अशांति की समस्या पर एक अध्ययन** 229
–श्रीकान्त हाजरा

25. **हनूमान्-चालीसास्तोत्रस्य गेयात्मकः संस्कृतानुवादः (सन्तकवि गोस्वामी तुलसीदासविरचितम्)** 239
–अनुवादकः डॉ० सत्यनारायणहेच्. के.

26. **संयम स्वरूप विमर्श** –योगिन्द्रा देवी 243

27. **प्रादेशिक शब्दों की भाषा यात्रा में प्राकृत का योगदान** 253
–डॉ. रजनीश शुक्ल

## English Section

28. **Living Traditions of Advaita Vedānta** 265
-Dr. Shakuntala Gawde

29. **Digital Conservation and Preservation of Sanskrit Heritage : Bridging the Past and Future** 283
-Dr. Rautmale Anand S.

30. **Melodic Maternity : Exploring Gayatri Mantra's Influence in Garbha Samvad** 298
- Dr Bhairavi Dixit

31. **Generative Artificial Intelligence and gamification for enhancing student engagement and volition for the promotion of the Bhartiya Knowledge System** 314
- Dr Ramesh C Sharma
- Dr Madan K Jha

32. **The Mysterious Fact of Number - 33 (33 Crore Gods and Goddesses)** 331
- Abhishaik Chitraans
-Ankakshr Miracless

33. **The Logical Conclusion of Karmayoga Philosophy of the Bhagavadgītā** 335
-Dr. Arpit Kumar Dubey
-Dr. Kamini Kumari

✦✦✦

# येऽनूचानास्ते कवयः, योऽनूचानः स नो महान् इत्यनयोः श्रुतिस्मृतिवाक्ययोः विश्लेषणम्

**-डा. गणेश ति पण्डितः***

## पीठिका

अथ महामुनिना मनुना लोकहिताय मनुस्मृतिरित्याख्यः शास्त्रीयः ग्रन्थः व्यलेखीति विदितमेव समेषां धीजुषां विदुषाम्। तत्रत्यं श्लोकवाक्यमेव 'योऽनूचानः स नो महान्' इति। श्लोकस्यास्य मूलस्रोतः किम्? इत्यत्र बहूनां सन्देहः वर्तते एव। वस्तुतः श्रुतिरेव अस्य मूलं न तु स्मृतिः इति शोधलेखेऽस्मिन् सप्रमाणमुल्लिख्यते। 'येऽनूचानास्ते कवयः' इत्येषः मन्त्रः ऋग्वेदीये ऐतरेयब्राह्मणे श्रूयते। कौषीतकीब्राह्मणेऽपि 'यो अनूचानः श्रोत्रियः स्यात् तस्य प्रवृञ्ज्यताम्, आत्मा वै स यज्ञस्य' इति अनूचानस्य उत्कृष्टं स्थानं प्रोक्तम्। शुक्लयजुर्वेदीये शतपथब्राह्मणे तु 'यो वा अनूचानः सोऽलं यशसे' इत्येवमादिभिः मन्त्रैः यज्ञयशोमूलप्रसङ्गे अनूचानमधिकृत्य सूक्तमेव। वेदाङ्गेष्वपि अनूचानस्य वर्णनं बहुत्र दृश्यते। गृह्यश्रौतसूत्रेष्वपि वर्णितोऽय-मनूचानः तदग्रे स्मृतिषु सन्दृश्यते। सम्पूर्णः श्लोकः यथा-

**न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः।**
**ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्॥**(मनुस्मृतौ 2/154)

स्मृतयोऽपि वेदमूलजाः एव। एवमनूचानः आदौ श्रुतौ ततः सूत्रग्रन्थेषु तदग्रे स्मृतिषु पुराणेषु महाभारतादिषु महाकाव्येषु च क्रमशः सन्दृश्यते। महाभारतस्य आरण्यकशल्यादिषु द्वित्रेषु पर्वसु श्लोकोऽयमुपलभ्यते। अतः बहवो हि बालाः महाभारतमेव अस्य मूलमिति मन्वते। महाभारतादपि पूर्वं पुराणानि सृष्टानि व्यासमहर्षिणा। ततः महाभारतं लिखितम्। यथोक्तं मत्स्यपुराणे-

**अष्टादशपुराणानि कृत्वा सत्यवतीसुतः।**
**भारताख्यानमखिलं चक्रे तदुपबृंहणम्॥** (53/70) इति।

नारदपुराणादिषु अनूचानस्य महिमा सूपपादितोऽस्ति। पुराणानां रचयिता तु व्यासमहर्षिः। सः वेदव्यासः इत्येव कीर्त्यते। वेदं व्यस्यति पृथक्करोतीति वेदव्यासः।

---

* सहाचार्यः, शिक्षाशास्त्र विद्याशाखा, के.सं.वि., मुख्यालयः, नवदेहली-110058।

अतः वेदविभजकस्य व्यासस्य कृतिविशेषेषु बहुत्र वेदसारसङ्ग्रहरूपान् श्लोकान् साद्यन्तम् अवलोकयितुं शक्नुमः। एतदनु वेदोक्तस्य अनूचानस्यापि प्रचुरमात्रेण वर्णनं श्लोकरूपेण कृतं दृश्यते। श्लोकोऽयं पुराणेषु उपपुराणेषु च तत्र तत्र परिदृश्यते। परं मनुस्मृतिस्तु महाभारतरामायणपुराणादीनामपेक्षयापि प्राचीना वर्तते। मनुस्मृतिस्थाः बहवो हि श्लोकाः पुराणेषु महाकाव्येषु च उपलभ्यन्ते। किञ्च पुराणेषु मनोः वर्णनं मनुकुलवर्णनादिकं च दृश्यते। परं मूलमनुस्मृतौ क्वापि पुराणानां रामायणमहाभारतादीनां वा उल्लेखः नैव दृश्यते। अतः महाभारतमेव अस्य मूलमिति कथनं युक्तिसङ्गतं न भाति। मनुस्मृतौ अनूचानस्य वर्णनं सङ्ग्रहेण कृतं चेत् पुराणेषु भारते च व्यासमहर्षिणा अनूचानस्य गुणवैशिष्ट्यानि विस्तरेण विहितानि सन्ति। पुनश्च वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि व्यासेन विरचितानि। यथोक्तम्–

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति॥**

वेदसारं पुराणानां माध्यमेन महाकाव्यानां माध्यमेन च व्यासः व्यावृणोत्। व्यासविरचितेषु पुराणेषु महाभारते च श्लोकोऽयं बहुत्र दृश्यते इत्यतः प्रसिद्धिवशात् महाभारतमेव अस्य मूलमिति मन्यन्ते बहवो हि पाठकाः। मनुस्मृतेः मूलभागः अन्यः, प्रक्षिप्तभागाः बहवः अद्यत्वे उपलभ्यन्ते इत्यतः क्वचित् स्मृतिविषयेऽपि भ्रमस्तु जायत एव। परं स्मृतीनां सूत्रग्रन्थानां च अपेक्षया श्रुतावेव अनूचानः सूपपादितः इत्यतः अनूचानस्य अनुप्रयोगमूलं श्रुतिरिति निश्चप्रचम्। अतः तस्मादेव उल्लिख्यते।

### कुञ्चिकापदानि

अनूचानः, कविः, श्रुतिः , स्मृतिः, इतिहासः।

अथ अनूचानः नाम वेदवेदाङ्गवेत्ता इति सर्वैः विदितमेव। अयं शब्दः द्विधा सिध्यति। अनु इत्युपसर्गपूर्वकात् 'ब्रूञ्' व्यक्तायां वाचि धातुना (अनु + 'ब्रूञ्' + लिट् , तस्य कानच्) यः शब्दः सिध्यति सः साङ्गवेदप्रवक्ता (अमरकोषानुसारम्– अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः, महाभाष्यानुसारम्– अनूक्तवान् अनूचानः) इत्यर्थं द्योतयति। अनूचानः इति पदस्य अयमेव अर्थः वैयाकरणसिद्धान्तकौमुद्यां वर्णितः– वेदस्य अनुवचनं कृतवान् अनूचानः इति। गुरुणा उपदिष्टं वेदमन्त्रम् अनूक्तवान् इत्यर्थः। पुनः अनु इत्युपसर्गपूर्वकात् 'वच' धातोः (अनु + वच् + लिट्, तस्य कानच्) योगे यः शब्दः सिध्यति सः विनीतः/सविनयः इत्यर्थं (मेदिनीकारमतानुसारम्– अनूचानो विनीते स्यात् साङ्गवेदविचक्षणे) द्योतयति। अनेकार्थसङ्ग्रहे तु 'अनूचानः साङ्गवेदकोविदे विनयान्विते' इति सुस्पष्टमुक्तमस्ति।

साङ्गवेदकोविदः (गुरुः) विनयान्वितः (शिष्यः) इत्यनयोः मध्ये भेदम् अभेदं च दर्शयितुं समर्थः (द्वितीयसदृशव्यवच्छेदः) शब्दः नाम अनूचानः इत्येक एव इति मन्मतम्। एवं विनीतः, वेदवेदाङ्गवेत्ता, मुनिः, कविः इत्यादिषु अर्थेषु अनूचानः इत्यस्य पदस्य प्रयोगः वाङ्मये तत्र तत्र दृश्यते इति फलितम्। साङ्गवेदविचक्षणः सामान्यतः विनीतः भवत्येव। पुनः मुनिविशेषाणां कृते अनूचानाः इति विशेषणं कालिदासेन विशेषतः दत्तमेव। यथोक्तं कुमारसम्भवे-

**अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम्।**
**इदमूचुरनूचानाः प्रीतिकण्टकिततत्वचः॥** 6.15॥

वैदिकसाहित्ये तु अनूचानाय कविरित्यपि प्रयोगः दृश्यते। 'येऽनूचानास्ते कवयः' इति ऐतरेयब्राह्मणे दृश्यते। यथा- **'दाशति हविरादिकं स्वस्वत्वं निवर्त्य युष्मत्स्वत्वापादनं करोति। य एव कविः अनूचानः 'येऽनूचानास्ते कवयः।'** (ऐ.ब्रा 2.2)

कविर्मेधावी होता इति प्रसिद्धस्तत्र। कविरध्वर्युः अपि वर्तते। शतपथब्राह्मणेऽपि दृश्यते। यथा- **स हैतेनापि यजेत। योऽलं यशसे सन्नयशो भवति यो वा अनूचानः सोऽलं यशसे सन्नयशो भवति यो न यशो भवति स तमसा वै स तत्प्रावृतो भवति।** (शतपथे- 5/3/2)

कवते सर्वं जानाति सर्वं वर्णयति सर्वव्यापीति कविः। भारते तु वेदविद्विष्णुरेव कविरिति कीर्त्यते। **"वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"** इत्येवं विष्णोर्विशेषणानि तत्र उल्लिखितानि। इदमत्रावधेयं यत् कविः इति शब्दो वा भवतु अनूचानः इति शब्दो वा भवतु उभावपि वेदवेदाङ्गसम्बद्धेषु अध्ययनाध्यापनयजन-याजनादिषु कर्मसु एव विशेषतः प्रयुक्तौ स्तः। अतः अनेकार्थकोऽपि अनूचानशब्दः साम्यार्थद्योतकोऽपि वर्तते इति वेदितव्यम्। एवं श्रुतिस्मृतिस्थयोः पदयोः (अनूचानः/कविः) वाक्ययोश्च (येऽनूचानास्ते कवयः, योऽनूचानः स नो महान्) प्रसङ्गसाम्यं अर्थसाम्यं क्वचित् तात्पर्यसाम्यं च दृश्यते इति फलितम्। यदि श्रुतिस्थे स्मृतिस्थे वा वाक्ये विरोधः स्यात् तदा श्रुतिवाक्यमेव प्रमाणत्वेन स्वीकरणीयमेवेति शास्त्रसम्मतं मतम्। 'श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी' इति जाबालवचनमपि अत्र प्रमाणं वर्तते। परमत्र प्रसङ्गे अविरोधः एव दृश्यते न तु विरोधः। अतः श्रुतिस्मृतिवाक्ययोः विश्लेषणं सुलभमेव। प्रसङ्गः क्वचित् भिद्यते न तु भावः। पुराणकाव्यादिषु अपि एषैव स्थितिः।

अनूचानस्य लक्षणं विशेषता: च नारदपुराणस्य पूर्वार्धे सनन्दननारदयोः संवादे दृश्यते। तत्र नारदः सनन्दनं पृच्छति यत्- मानवः सुज्ञानी कथं भवितुं शक्नोति ? इति। तद्यथा-

**अनूचानः कथं ब्रह्मन्पुमान्भवति मानद।**
**तन्मे कर्म समाचक्ष्व श्रोतुं कौतूहलं मम॥ 50-8॥**

नारदीयां जिज्ञासां सविस्तरं समाधत्ते सनन्दनः। तद्यथा-

**श्रृणु नारद वक्ष्यामि ह्यनूचानस्य लक्षणम्।**
**यज्ज्ञात्वा साङ्गवेदानामभिज्ञो जायते नरः॥ 50-9॥**

**शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।**
**छन्दःशास्त्रं षडेतानि वेदाङ्गानि विदुर्बुधाः॥ 50-10॥**

**ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।**
**वेदाश्चत्वार एवैते प्रोक्ता धर्मनिरूपणे॥ 50-11॥**

**साङ्गान्वेदान्गुरोर्यस्तु समधीते द्विजोत्तमः।**
**सोऽनूचानः प्रभवति नान्यथा ग्रन्थकोटिभिः॥ 50-12॥**

अत्र द्वादशे श्लोके गुरुमुखादेव साङ्गवेदाध्ययनं यः करोति सः प्रकृष्टः अनूचानः भवति इति उक्तमस्ति। पूर्वतनेषु श्लोकेषु वेदवेदाङ्गानां नामोल्लेखः एतदर्थं स्पष्टतया विहितः यत् अन्येषां वाङ्मयप्रकाराणामध्ययनेन अनूचानः भवितुं न अर्हति पुमान् इति।

महाभारतस्य आरण्यके पर्वणि 135 तमे सर्गे अष्टावक्रद्वारपालयोः संवाद-सन्दर्भेऽपि पूर्वोक्तः श्लोकः श्रूयते। द्वारपालः बालम् अष्टावक्रं दृष्ट्वा कथयति यत् **'न वै बालाः प्रविशन्त्यत्र विप्रा वृद्धा विद्वांसः प्रविशन्ति द्विजाग्र्याः'** इति। तच्छ्रुत्वा अष्टावक्रः भणति-

**यद्यत्र वृद्धेषु कृतः प्रवेशो**
**युक्तं मम द्वारपाल प्रवेष्टुम्।**
**वयं हि वृद्धाश्चरितव्रताश्च**
**वेदप्रभावेन प्रवेशनार्हाः॥6॥**

अग्रिमे बालस्यापि (अनूचानस्य) लक्षणानि योग्यताः प्रोक्ताः। तद्यथा-

**शुश्रूषवश्चापि जितेन्द्रियाश्च**
**ज्ञानागमे चापि गताः स्म निष्ठाम्।**
**न बाल इत्यवमन्तव्यमाहु-**
**र्बालोऽप्यग्निर्दहति स्पृश्यमानः॥7॥**

अनेन सिध्यति यत् जितेन्द्रियत्वम् , शुश्रूषा, वैदिकज्ञाननिष्ठता च यस्मिन् अस्ति सः बालो वा भवतु सः अनूचानः (ज्ञानवृद्धः) इति परिभाषितो भवति इति।

अष्टावक्रस्य उत्तरेण अतृप्तः द्वारपालः कालक्रमेण खलु मानवः वृद्धो भवति खलु इति कथयति। यथा-

**वृद्धेभ्य एवेह मतिं स्म बाला**
**गृह्णन्ति कालेन भवन्ति वृद्धाः।**
**न हि ज्ञानमल्पकालेन शक्यं**
**कस्माद्बालो वृद्ध इवावभाषसे॥10॥**

अष्टावक्रः वदति तदा यत् ज्ञानेन स्थविरपदवाच्यो भवति नरः न तु वार्धक्यवशात् इति। तद्यथा-

**न तेन स्थविरो भवति**
**येनास्य पलितं शिरः।**
**बालोऽपि यः प्रजानाति**
**तं देवाः स्थविरं विदुः॥11॥**

द्वादशे श्लोके अष्टावक्रः नरेण जीवितावधौ व्यतीतकालस्य आधारेण पलितकेशानां बलेन बन्धुमित्रधनकनकैर्वा कश्चन ज्ञानी न भवति इति स्पष्टीकरोति। किञ्च पूर्वजैः प्रवर्तिते धर्ममार्गे ये आबालवृद्धाः प्रचलन्ति ते सर्वे अनूचानाः इति। एवं श्रुतौ स्मृतौ पुराणेषु महाकाव्येषु च सूपपादितः अनूचानशब्दः विशिष्टः विभिन्नार्थद्योतकश्च इति फलितम्।

**सहायकग्रन्थसूची-**

1. ऐतरेयब्राह्मणम्, सद्गुरुशिष्यकृतसुखप्रदाख्यवृत्तिसहितम्, नागप्रकाशन, 1991
2. कुमारसम्भवम्, महागुरुकालिदासविरचितम्, मल्लिनाथविरचितसञ्जीविन्याख्य-व्याख्यया सहितम्, निर्णयसागर प्रेस्, मुम्बई, 1807
3. कौषीतकीब्राह्मणम्, ऋग्वेदान्तर्गतम्, सम्पादकः सन्निधानं सुदर्शनशर्मा, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, 2009
4. श्रीनारदीयमहापुराणम्, भगवता व्यासमहर्षिणा विरचितम्, प्रकाशकः प्रो. वि. कुटुम्बशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2002
5. मत्स्यमहापुराणम्, भगवता व्यासमहर्षिणा विरचितम्, प्रकाशकः गीताप्रेस् गोरखपुर, 2020
6. मनुस्मृतिः, श्रीकुल्लूकभट्टप्रणीतमन्वर्थमुक्तावलीव्याख्यासहिता, सम्पादकः गोपालशास्त्री नेने, प्रकाशकः चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 1981

7. श्रीमन्महाभारतम्, भगवता व्यासमहर्षिणा विरचितम्, पण्डितरामनारायण-दत्तशास्त्रीपाण्डेयविरचितहिन्दी-अनुवादसहितम्, प्रकाशक: गीता प्रेस्, गोरखपुर, 2021

8. मेदिनीकोशः, नानार्थशब्दकोशापरपर्यायः, सम्पादक: जगन्नाथशास्त्री कोशिङ्गः, चौखम्बासंस्कृतसीरीज्, वाराणसी, 1968

9. वैयाकरणसिद्धान्तकौमुदी, श्रीमद्भट्टोजीदीक्षितविरचिता, सम्पादक: पण्डित श्रीगोपालशास्त्री नेने, चौखम्बासंस्कृतसीरीज् आफीस्, वाराणसी, 1977

10. श्रीवाजसनेयि माध्यन्दिनयुक्तम्, शतपथब्राह्मणम्, सायणाचार्यादिभाष्यसहितम्, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, 2002

✦✦✦

# ङ्याप्प्रातिपदिकादिति सूत्रे दीक्षितनागेशमतयोः विचारानुशीलनम्

-डॉ. शम्भुनाथ भट्टः

**शोधसारः**- प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषया स्त्रीप्रत्ययान्तानामपि ग्रहणं भवति। सूत्रस्य कार्यं सुबन्तत्वसम्पादनम्। तच्च ङ्याप्ग्रहणं विनापि सिध्यति इति प्रश्नः। तत्र दीक्षिताः ङ्याप्ग्रहणं स्वार्थिकतद्धितानाम् उत्पत्तिः स्त्रीप्रत्ययानन्तरं भवेत् न तु ततः प्राक् इति आशेरते। परं नागेशभट्टाः इदं नाङ्गीचक्रुः अपि तु अचखण्डन्। तत्र दीक्षितानां युक्तयः काः नागेशस्य काः इति विचारः अत्र कृतः। तैस्तैः दत्ताः हेतवश्च विचारिताः। ततः तद्व्याख्यातॄणाम् आशयमपि आश्रित्य युक्तायुक्तत्वं परिशील्यते अत्र। युक्तिविवेचनेन बुद्धिवैशाल्यमस्य लेखस्य लक्ष्यम्। तत्र विशेषेण दीक्षितानां मतानुसारं तद्धितानां समुत्पत्तिः सुबन्तादेव स्यात्। यतः 'कुत्सिते'[1] इति सूत्रे प्रवृत्तिनिमित्ततदाश्रयलिङ्गसंख्याकारकाणां क्रमिकोत्पत्तिः इति सूचितम्। अर्थान्तरयोगः पश्चादेव कर्तव्यः। स्वार्थे परिपूर्णं सत् अर्थान्तरेण अन्वयं प्राप्नोति। परं नागेशभट्टानामाशयः अन्यादृशो भवति। तद्धितेषु सार्थकाः, स्वार्थिकाः, अत्यन्तस्वार्थिकाः इति त्रेधा प्रभेदान् स्वीकृत्य अत्यन्तस्वार्थिकानां समुत्पत्तिः जात्यनन्तरमेव इति व्याख्यान्ति।

**प्रमुखशब्दाः**- प्रातिपदिकम्, ङ्याप्, स्त्रीप्रत्ययः, दीक्षिताः, नागेशः, विवेकः

## आमुखम्-

ङ्याप्प्रातिपदिकात् इति सूत्रं प्रातिपदिकात्, स्त्रीप्रत्ययान्तेभ्यः च सुप्प्रत्ययानां विधानार्थं प्रवृत्तम्। प्रातिपदिकसंज्ञाविधायकसूत्रे अप्रत्ययः इति प्रत्ययान्तपर्युदासात् स्त्रीप्रत्ययान्तानां प्रातिपदिकत्वं नास्ति। अतः स्त्रीप्रत्ययान्तेभ्यः शब्देभ्यः सुबुत्पत्तिः न स्यात्। अतः ङ्याप्ग्रहणं सूत्रे कृतम्। "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति"[2] परिभाषया स्त्रीप्रत्ययान्तानामपि ग्रहणं भवति। सूत्रस्य कार्यं सुबन्तत्वसम्पादनम्। तच्च ङ्याप्ग्रहणं विनापि सिध्यति इति प्रश्नः। तत्र दीक्षिताः

* सहायकाचार्यः, श्रीसत्यसाईविश्वविद्यालयः, कर्णाटकः।

1. अष्टाध्यायी 5-3-74
2. परिभाषेन्दुशेखरः- 71

ङ्याप्ग्रहणं स्वार्थिकतद्धितानाम् उत्पत्तिः स्त्रीप्रत्ययानन्तरं भवेत् न तु ततः प्राक् इति आशेरते।[1]

**दीक्षितमतम्[2]-**

लिङ्गविशिष्टपरिभाषया सिद्धे ङ्याब्ग्रहणं ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात्, ङ्याब्भ्यां प्राङ् मा भूदित्येवमर्थम्। तेन लोहिनिका, आर्यका इति च सिध्यति। तथा हि, ङ्याब्ग्रहणाभावे लोहितशब्दात् 'लोहितान्मणौ'[3] इति कन्, 'वर्णादनुदात्तात्तोपधात्तो नः'[4] इति ङीब्नकारयोः प्राप्तयोः, अत्यन्तस्वार्थिकत्वेन अन्तरङ्गः परश्च कन् ङीब्नकारौ बाधेत। ततश्च कनि 'अजाद्यतष्टाप्'[5] इति टापि 'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः'[6] इति इत्वे लोहितिका इत्येकमेव रूपं स्यात् न तु लोहिनिका इति। सूत्रेऽस्मिन् ङ्याब्ग्रहणे तु अन्तरङ्गं परमपि कनं बाधित्वा ङीब्नकारयोः कृतयोः ततः कनि, ह्रस्वे, टापि लोहिनिका इति, वर्णादनुदात्तादित्यादिना वैकल्पिकनत्वसंनियोग-शिष्टङीबभावे टापि, कनि, ह्रस्वे, पुनष्टापि, प्रत्ययस्थात्कात् इत्यादिना इत्वे लोहितिका इत्यपि सिध्यति। तस्मात् 'लोहिताल्लिङ्गबाधनं वा'[7] इति वार्तिकं नारम्भणीयम्। एवम् आर्यशब्दात् स्वार्थे कन्टाप्प्रत्यययोः प्राप्तयोः परत्वादन्तरङ्गत्वाच्च कनि, ततः टापि 'प्रत्ययस्थात्कात्' इत्यादिना नित्यमित्वे आर्यिका इत्येव स्यात् न तु आर्यका इति। आब्ग्रहणे क्रियमाणे तु आबन्तात् तद्धितकन्प्रत्यये, ह्रस्वे, 'उदीचामातःस्थाने यकपूर्वायाः'[8] इति विकल्पेन इत्वे आर्यिका, आर्यका इति रूपद्वयमपि सिध्यति। तस्मादन्तरङ्गादपि तद्धितात्प्राङ्ङ्यापोः प्रवृत्त्यर्थं ङ्याब्ग्रहणम्। न तु आब्ग्रहणं विस्पष्टार्थम् इति।

**नागेशमतम्[9]-**

'सुबन्तात् तद्धितोत्पत्तिः' इति सिद्धान्तेऽपि अत्यन्तस्वार्थिकप्रत्ययाः सुबुत्पत्तेः

---

1. सिद्धान्तकौमुदी भागः 1, पृ. सम्- 179
2. प्रौ.म. भागः 1 पृ.सं 371
3. अष्टाध्यायी- 5-4-30
4. अष्टाध्यायी- 4-1-39
5. अष्टाध्यायी- 4-1-04
6. अष्टाध्यायी- 7-3-44
7. लोहितान्मणौ इति सूत्रे पठितं वार्तिकम्।
8. अष्टाध्यायी- 7-3-46
9. ल.श.शे अजन्तभागः पृ.सं 37

पूर्वमेव उत्पद्यन्ते। 'सर्वस्य द्वे'[1] (8.1.1) इत्यत्र भाष्ये[2] सर्वस्य इति स्थाने पदस्य इति वक्तव्यमित्युक्त्वा द्विपदिका इत्यत्र द्विर्वचनाभावरूपप्रयोजनं प्रदर्शितम्। यदि सर्वत्र सुबन्तात्तद्धितोत्पत्तिरिति स्वीक्रियते तर्हि, द्विपाद इत्यवस्थायां सुपि ततः वुनि, पूर्वस्य द्विपाद इत्यस्य पदत्वात् द्वित्वं स्यात्। एवञ्च भाष्ये पदस्य इति प्रयोजनप्रदर्शनमसङ्गतं स्यात्। परं तु वुन्प्रत्ययस्य अत्यन्तस्वार्थिकत्वेन अन्तरङ्गत्वात् सुबुत्पत्तेः पूर्वमेव प्रवृत्तिः। तदा द्विपाद इत्यस्य पदत्वाभावात् द्विर्वचनं न भवतीति भाष्ये परिहारप्रदर्शनं सङ्गच्छते।

## दीक्षितमतविचारानुशीलनम्-

सूत्रे ङ्याब्ग्रहणं 'ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात्' इति स्वीकारे बहुगोमत्का इत्यत्र दोषः। तथा हि- बहवः गोमन्तः यस्यां सा इति विग्रहे बहु जस् गोमत् जस् इत्यलौकिकविग्रहे, प्रातिपदिकसंज्ञायां सुब्लुकि, बहुगोमत् इत्यवस्थायामन्यपदार्थस्य स्त्रीत्वात् 'उगितश्च'[3] इति ङीप् प्राप्तः, नद्यन्तबहुव्रीहिरित्यतः 'नद्यृतश्च'[4] इति कप् प्रत्ययश्च प्राप्तः। अत्र ङ्याबन्तात्तद्धितोत्पत्तिरिति नियमस्वीकारे 'उगितश्च' इति ङीपि, ततः कपि, टापि बहुगोमतीका इत्यनिष्टं स्यात् इति चेदत्र उच्यते- प्रकृते बहु जस् गोमत् जस् इत्यलौकिकविग्रहवाक्ये समासान्तः कप्प्रत्ययः उत्तरपदस्य गोमत् जस् इत्यस्यानन्तरम् अवयवो भूत्वा प्रवर्तते। ननु समासान्तः प्रत्ययः समासात्पूर्वम् अलौकिकप्रक्रियावाक्ये कथं प्रवर्तताम् इति चेत्, 'गोस्त्रियोरुपसर्जनस्य'[5] इति सूत्रस्थभाष्यात् समासान्तः इत्यत्र समासपदं समासार्थे वाक्ये वर्तते 'तादर्थ्यात् ताच्छब्द्यम्'[6]। तच्च वाक्यमलौकिकमेव लौकिके वाक्ये समासप्रवृत्त्ययोगात्। एवञ्च समासान्तः कप्प्रत्ययः अलौकिकप्रक्रियादशायामेव प्रवर्तते। स च विभक्तेः पुरस्तात् परस्तात् इति पक्षद्वयम्। तत्र विभक्तेः परस्तात् प्रवर्तते इति सिद्धान्तः। कप्प्रत्ययः पुरस्तात् प्रवर्तते इति पक्षस्वीकारे 'गोस्त्रियोरुपसर्जनस्य' इति भाष्यस्य वाच्यार्थविरोधः स्यात्। तत्र हि भाष्ये[7] बहुकुमारीकः इत्यादौ कपि 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वस्य प्रतिषेधो वक्तव्यः इत्युक्तम्। बह्व्यः कुमार्यः यस्य इति विग्रहे बह्वी जस् कुमारी जस् इत्यवस्थायां 'सुपो धातुप्रातिपदिकयोः'[8] (2.4.71) इति सुब्लुकि,

---

1. अष्टाध्यायी- 8-1-1
2. म.भा भागः 6 पृ.सं 5
3. अष्टाध्यायी- 4-1-6
4. अष्टाध्यायी- 5-4-153
5. अष्टाध्यायी- 1-2-48
6. म.भा भागः 2 पृ.सं 57
7. म.भा भागः 2 पृ.सं 57
8. अष्टाध्यायी- 2-4-71

'नद्यृतश्च' इति कपि बहुकुमारीकः इति रूपम्। बहुकुमारी इत्यवस्थायां 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वः प्राप्तः, 'नद्यृतश्च' इति कबपि प्राप्तः। तत्र अन्तरङ्गत्वात् ह्रस्वः प्राप्नोतीत्यतः 'कब्विषये प्रतिषेधो वक्तव्यः' इति शङ्कित्वा, कब्विषये 'न कपि इति निषेधः वर्तत एव' इति समाहितम्। ततः एवमुक्तम्- 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति न्यायेन 'केऽणः' इत्यनेन या ह्रस्वप्राप्तिः, तस्य 'न कपि' इत्यनेन निषेधः न तु 'गोस्त्रियोरुपसर्जनस्य' इत्यनेन प्राप्तह्रस्वस्य। यदि सर्वत्रापि ह्रस्वस्य 'न कपि' इत्यनेन निषेधः स्यात् तर्हि प्रियं ग्रामणि ब्राह्मणकुलमस्य प्रियग्रामणिकः इत्यत्र विधीयमानः 'ह्रस्वो नपुंसके प्रातिपदिकस्य'[1] (1.2.47) इति ह्रस्वोऽपि निषिध्येत इति। तस्मात् कब्विषये प्रतिषेधो वक्तव्यः इति पुनराशङ्क्य 'कपि कृते अनन्त्यत्वात् ह्रस्वत्वं न भविष्यति' इति समाहितम्। बहुकुमारी इत्यवस्थायां कप्प्रत्ययः, ह्रस्वं च प्राप्तम्। तत्र समासविशेषं नद्युत्तरपदञ्च अपेक्षते इति कप् बहिरङ्गः। उपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकमात्रमपेक्षते इति ह्रस्वः अन्तरङ्गः। परं तदपेक्षया अन्तरङ्गतरः कप्प्रत्ययः। ननु समासान्तकप्प्रत्ययस्य बहिरङ्गत्वात् कथमन्तरङ्गतरत्वमिति चेत् 'तादर्थ्यात् ताच्छब्द्यम् भविष्यति' इति वचनेन भाष्ये समाधानं प्रदर्शितम्। एवञ्च अनेन वचनेन समासान्तः कप्प्रत्ययः ह्0स्वापेक्षया अन्तरङ्गः भवति इत्यतः समासार्थो भूत्वा अलौकिकविग्रहवाक्ये एव उत्तरपदस्य अनन्तरमवयवो भूत्वा प्रवर्तते। तदा कपि कृते अनन्त्यत्वात् ह्रस्वत्वं न भविष्यति इति भाष्याशयः। यद्यत्र विभक्तेः पूर्वं कपः प्रवृत्तिः स्यात् तर्हि एतद्भाष्यविरोधः स्यात्।

किं च विभक्तेः पूर्वं कपः प्रवृत्तिस्वीकारे बहुचर्मिका इत्यत्र बहु जस् चर्मन् क जस् इति अलौकिकविग्रहः स्यात्। ततः अस्य समाससंज्ञायां, सुब्लुकि, 'न लोपः प्रातिपदिकान्तस्य' इति नलोपे, टापि बहुचर्मक आ इत्यवस्थायाम् आपः सुपः परत्वात् 'प्रत्ययस्थात् कात्पूर्वस्यात इदाप्यसुपः' इति मकाराकारस्य इत्वं न स्यात्। विभक्तेः परं कपः प्रवृत्तिस्वीकारे तु बहु जस् चर्मन् जस् क इत्यवस्थायां तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि, नलोपे बहुचर्मक इत्यवस्थायां टापि आपः सुपः परत्वाभावात् 'प्रत्ययस्थात् कात्' इति नित्यमित्वे बहुचर्मिका इति सिध्यति इति न दोषः। एवञ्च समासान्तकप्प्रत्ययः समासात्पूर्वम् अलौकिक-प्रक्रियादशायां विभक्तेः परस्तात्प्रवर्तते इति स्वीकारात् बहु जस् गोमत् जस् इत्यवस्थायां सुब्लुकि, कपि, टापि बहुगोमत्का इति सिध्यति। तस्मात् 'तादर्थ्यात् ताच्छब्द्यम्' इति भाष्यवचनात् समासान्तविषयं विहाय अन्तरङ्गादपि तद्धितात्प्राङ्ङ्याापोः प्रवृत्त्यर्थं सूत्रे ङ्याब्ग्रहणम्। एवञ्च आब्ग्रहणस्य प्रयोजनवत्वात् स्पष्टार्थमिति हरदत्तोक्तिः न सङ्गच्छते इति दीक्षिताशयः।

---

1. अष्टाध्यायी- 1-2-47

वस्तुतः विचार्यमाणे सूत्रे ङ्यापोर्ग्रहणस्य नास्त्यावश्यकता। 'कुत्सिते'[1] इति सूत्रभाष्यात् 'सुबन्तात् तद्धितोत्पत्तिः' इति सिद्धान्तः। तथाहि- 'कुत्सिते' इति सूत्रे भाष्ये[2] स्वार्थद्रव्यलिङ्गसंख्याकारकप्रयुक्तकार्याणि क्रमेणोत्पद्यन्ते इति बोधितम्। 'नागृहीतविशेषणा बुद्धिः विशेष्य उपजायते' इति न्यायात् विशेषणज्ञानं विना विशेष्यस्य स्वरूपावगतिर्न भवति। अतः सर्वादौ व्यक्तौ विशेषणरूपेण स्थितस्य जातेः उपस्थितिर्भवति। ततः विशेष्यरूपेण वर्तमानस्य जात्याश्रयस्य द्रव्यस्योपस्थितिः। द्रव्यस्य च लिङ्गसंख्याभ्यामन्वयो भवति। तत्र संख्यायाः स्वसजातीयस्य अन्यस्य अपेक्षा भवतीत्यतः सा बहिरङ्गा। लिङ्गस्य तावत् तदपेक्षया अन्तरङ्गत्वम्। अतः संख्यापेक्षया लिङ्गस्य अन्तरङ्गत्वात् लिङ्गस्योपस्थितिः। तत्पश्चात् संख्याकारकयोः कारकं विजातीयक्रियामपेक्ष्य प्रवर्तते इति तस्य बहिरङ्गत्वात् तदपेक्षया संख्यायाः अन्तरङ्गत्वात् तस्याः अभिधानं भवति। ततः सर्वान्ते बहिरङ्गस्य कारकस्योपस्थितिः। एवञ्च पूर्वोक्तक्रमेण यथा शब्दस्य भानं तथा तत्प्रयुक्तकार्याण्यपि तेनैव क्रमेण भविष्यन्ति। एवं क्रमेण स्वार्थादिप्रयुक्तकार्यैः परिपूर्णस्य पदस्य बहिर्भूतकुत्सनाद्यर्थेन साकं योगः भवति इत्युक्तम्। अतः प्रथमं ङ्यापः प्रवृत्तिः, तत्पश्चात् कबादितद्धित-प्रयुक्तकार्याणि प्रवर्तन्ते। एवञ्चानेन भाष्येण 'सुबन्तात् तद्धितोत्पत्तिः' इति सिद्धान्तितं भवति।

सुबन्तात् तद्धितोत्पत्तिरित्यत्र 'घकालतनेषु कालनाम्नः'[3] इति सूत्रमपि मानम्। तथाहि- 'अतिशायने तमबिष्ठनौ'[4] इत्यनेन तमप्प्रत्ययः, 'द्विवचनविभज्योपपदे तरबीयसुनौ'[5] इत्यनेन तरप्प्रत्ययश्च विधीयते। तत्र 'घकालतनेषु कालनाम्नः' इति सूत्रं तरप्तमप्प्रत्यययोः परयोः कालवाचकात् परस्याः सप्तम्याः विकल्पेन अलुग्विधानार्थमारब्धम्। पूर्वाह्णेतरे इत्याद्युदाहरणम्। प्रकृते पूर्वाह्णे इति सप्तम्यन्तात् तरप्प्रत्यये तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सत्यां प्रातिपदिकावयवस्य सुपः लुकि प्राप्ते सप्तम्याः अलुगनेन विधीयते। अत्र तरप्तमपोः तद्धितप्रत्ययत्वात् तयोः परयोः सप्तम्याः अलुग्विधानाज्ज्ञापकात् विभक्त्युत्पत्त्यनन्तरमेव तद्धिताः उत्पद्यन्ते। यदि प्रातिपदिकादेव तरबुत्पद्येत तर्हि सुपः प्रातिपदिकावयवत्वं न सम्भवतीति कृत्वा लुकः प्राप्तिरेव न इति तरप्प्रत्यये परे सप्तम्याः अलुग्विधानमनुपपन्नं स्यात्। एवञ्च सुबन्तात्तद्धितोत्पत्तिरिति सिद्धान्तात् लोहिनिका इत्यादौ लिङ्गबोधकप्रत्ययस्य प्रथममुपस्थित्या लोहितशब्दात् आदौ ङीपि, तकारस्य नकारे, ततः तद्धितकन्प्रत्यय-

1. अष्टाध्यायी- 5-3-74
2. म.भा भागः 4 पृ.सं 397
3. अष्टाध्यायी- 6-3-17
4. अष्टाध्यायी- 5-3-55
5. अष्टाध्यायी- 5-3-57

स्योत्पत्तौ, इत्वे च लोहिनिका इति सिध्यति। नत्वसंनियोगस्य ङीपः वैकल्पिकत्वेन ङीपः अभावपक्षे टापि, लोहितिका इति च सिध्यति। तस्मात् 'लोहिताल्लिङ्गबाधनं वा' इति वार्तिकस्यानारम्भः उचितः। एवमार्यशब्दादपि पूर्वं टापि, ततः कनि, ह्रस्वे, पुनष्टापि, विकल्पेन इत्वे आर्यिका, आर्यका इति सिध्यत्येव। अतः सुबन्तात्तद्धितोत्पत्तिरित्यनेन सिद्धे ङ्याबन्तात्तद्धितोत्पत्त्यर्थं ङ्याब्ग्रहणं सूत्रे व्यर्थम्। परं सुबन्तात्तद्धितोत्पत्तिरिति स्वीकारेऽपि 'तादर्थ्यात् ताच्छब्द्यम्' इति वचनात् समासान्तविषये नियमोऽयं न प्रवर्तते। अतः बहुगोमत्का इत्यत्र न दोषः। इत्थं च सुबन्तात्तद्धितोत्पत्तिरिति लब्धार्थस्य अनुवाद एव ङ्याब्ग्रहणम् इति मनोरमादौ दीक्षितैः अभिप्रेतम्।

**नागेशमतानुशीलनम्-**

ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् इत्येतदर्थं सूत्रे ङ्याब्ग्रहणमिति वदद्भिः दीक्षितैः वस्तुतस्तु इत्यारभ्य समासान्तविषयं विहाय 'सुबन्तादेव तद्धितोत्पत्तिः' इति सिद्धान्तमाश्रित्य सूत्रे ङ्याब्ग्रहणस्य वैयर्थ्यं प्रदर्शितम्। परम् 'अत्यन्तस्वार्थिकप्रत्ययानां तु सुबुत्पत्तेः पूर्वमेवोत्पत्तिः' इति नागेशः। अत्र हि 'सर्वस्य द्वे' 'पुंयोगादाख्यायाम्'[1] इति सूत्रस्थभाष्यं मानम्। 'सर्वस्य द्वे' इत्यत्र भाष्ये[2] सर्वग्रहणस्य प्रयोजननिरूपणसन्दर्भे ''सर्वस्य इत्यस्य स्थाने 'पदस्य' इति वक्तव्यं, समासनिवृत्त्यर्थं, तद्धितनिवृत्त्यर्थं, वाक्यनिवृत्त्यर्थं च। तद्धितनिवृत्त्यर्थं द्विपदिका, त्रिपदिका" इत्युक्तम्। अयमाशयः- द्वौ द्वौ पादौ ददाति इति विग्रहे द्वि औ पाद औ इत्यवस्थायां 'तद्धितार्थोत्तरपदसमाहारे च'[3] इति समासे, सुब्लुकि, द्विपाद इत्यवस्थायां 'पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च'[4] इति सूत्रेण वुन्प्रत्यये, प्रकृतेरन्त्यस्य लोपे, द्विपाद् वु इति स्थिते 'युवोरनाकौ'[5] इति अकादेशे, 'पादः पत्'[6] इति पदादेशे, टापि, 'प्रत्ययस्थात्कात्' इत्यादिना इत्वे च द्विपदिका इति रूपम्। तत्र द्विपाद इत्यवस्थायां वुन्प्रत्ययः, सुप्प्रत्ययश्च प्राप्तौ। वुन्प्रत्ययस्य अत्यन्तस्वार्थिकत्वात् सः सुबुत्पत्तेः पूर्वं प्रवर्तते। तदा पूर्वस्य द्विपाद इत्यस्य सुबन्तत्वाभावेन पदत्वाभावात् 'पदस्य द्वे' इति द्विर्वचनं न भवति। 'सर्वस्य द्वे' इत्युक्तौ तु द्विपाद इति दशायां सर्वस्य शब्दस्य द्विपाद इत्यस्य द्विर्वचनं स्यात्। तस्मात् सूत्रे पदस्य इति वक्तव्यम् इति तस्य प्रयोजनं प्रदर्शितम्। यदि अत्यन्तस्वार्थिकस्य वुन्प्रत्ययस्य 'सुबन्तात्तद्धितोत्पत्तिः' इति वचनात्

1. अष्टाध्यायी- 4-1-48
2. म.भा भागः 6 पृ.सं. 5
3. अष्टाध्यायी- 2-1-51
4. अष्टाध्यायी- 5-4-1
5. अष्टाध्यायी- 7-1-1
6. अष्टाध्यायी- 6-4-130

सुबन्तादेवोत्पत्तिः स्यात् तर्हि, द्विपाद इत्यस्य पदत्वात् 'पदस्य द्वे' इति द्विर्वचनं दुर्वारमेव। तथा सति भाष्ये 'पदस्य द्वे' इत्यस्य प्रयोजनप्रदर्शनमसङ्गतं स्यात्। अत्र कैयटोऽपि एवमाह[1]- द्विपदिका इत्यत्र द्वित्वसंख्यायुक्तः पादपदार्थः वीप्सितः। वीप्सायां द्विपादशब्दगतैकत्वसंख्या, स्त्रीत्वञ्च नान्तर्भवति। अतः तद्धितोत्पत्तेः पूर्वं समासे, ततः तद्धितप्रत्यये द्विपाद इत्यस्य पदत्वं नास्तीति कृत्वा द्विर्वचनं न भवति। यद्यत्र वीप्सायामपि द्विपादशब्दगतैकत्वसंख्यायाः, स्त्रीत्वस्य च अन्तर्भावः तर्हि लिङ्गबोधक- प्रत्ययानन्तरं सुबुत्पत्तौ, ततः वुनि, द्विपाद इत्यस्य पदत्वात् द्विर्वचनं स्यात्। आभ्यां भाष्यकैयटग्रन्थाभ्याम् अत्यन्तस्वार्थिकप्रत्ययानां सुबुत्पत्तेः पूर्वमेवोत्पत्तिरिति विज्ञायते।

अपि च 'पुंयोगादाख्यायाम्' इत्यत्र भाष्ये[2] 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति परिभाषायाः साङ्कूटिनम् इति प्रयोजनमुपपादितम्। गतिकारकोपपदसंज्ञकानां शब्दानां कृदन्तेन सह सुबुत्पत्तेः प्राक् समासः भवति इति परिभाषायाः अर्थः। सम्पूर्वककूटधातोः 'अभिविधौ भाव इनुण्'[3] इति इनुण्प्रत्यये, अनया परिभाषया सुबुत्पत्तेः पूर्वं समासे, सङ्कूटिन् इति स्थिते, 'अणिनुणः'[4] इति अण्प्रत्यये, आदिवृद्धौ साङ्कूटिनमिति सिध्यति। परिभाषायाः अस्याः अभावे इनुण्प्रत्यये सति सुबुत्पत्त्यनन्तरमेव समासो वक्तव्यः। परं यदा सुब्विभक्तिरुत्पद्यते, तदा तत्र 'अणिनुणः' इति अण्प्रत्ययोऽपि प्राप्नोति। अण्प्रत्ययस्य अत्यन्तस्वार्थिकत्वेन अन्तरङ्गत्वात् सुबुत्पत्तेः पूर्वं प्रवृत्तिः स्यात्। ततश्च 'तद्धितेष्वचामादेः' इति विधीयमाना आदिवृद्धिः कूटिन्शब्दस्यैव स्यादिति सङ्कौटिनमिति अनिष्टमापद्येत। तद्वारणार्थमिह गतिकारकोपपदानामिति परिभाषाऽश्रयणीया इति भाष्याशयः। यदि अत्यन्तस्वार्थिकानामपि सुबन्तादेवोत्पत्तिरिति मन्यते तर्हि, सङ्कूटिन् इत्यवस्थायाम् अण्प्रत्ययस्य सुबन्तादुत्पत्तिः स्यात्। यदा सुब्विभक्तेः उत्पत्तिः तदा तत्र समासः, अण्प्रत्ययश्च प्राप्तौ। तत्र प्रातिपदिकत्व-समर्थत्व-इनुणन्तत्वसापेक्षात् अण्प्रत्ययः बहिरङ्गः। समर्थत्व-गतित्वरूप-सापेक्षात् समासः अन्तरङ्गः। अतः अन्तरङ्गत्वात् पूर्वं समासे, सुब्लुकि, सङ्कूटिन् इत्यवस्थायामण्प्रत्यये, आदिवृद्धौ साङ्कूटिनमिति इष्टसिद्धौ, अस्य गतिकारकोपपदाना-मिति परिभाषाफलत्वेन ग्रहणमसङ्गतं स्यात्। एवञ्च सुबन्तात्तद्धितोत्पत्तिः इत्यत्र यदि तद्धितप्रत्ययः अत्यन्तस्वार्थिकः तर्हि सुबुत्पत्तेः पूवमेव प्रवर्तते। एवं तर्हि लोहितशब्दात् आर्यशब्दाच्च कनि लोहितिका, आर्यिका इत्येकमेव रूपं स्यात् इति

1. म.भा. भागः 6 प्र.व्या पृ.सं. 5
2. म.भा. भागः 4. पृ.सं. 68,69
3. अष्टाध्यायी- 3-3-44
4. अष्टाध्यायी- 5-4-15

चेत् लोहिनिका इति 'लोहिताल्लिङ्गबाधनं वा' इति वार्तिकेनैव इष्टसिद्धिः। एवमार्यिका इत्येव इष्टं रूपम्।

'ङ्याप्प्रातिपदिकात्' इति सूत्रे भाष्येऽपि[1] "ङ्याब्ग्रहणे कृते 'तत्र समासान्तेषु दोषो भवति, बहवो गोमन्तो अस्याः इति बहुव्रीहौ ङीपि, कबुत्पत्तौ बहुगोमतीका इति स्यात् न तु बहुगोमत्का'' इति दोषः उक्तः। तत्पश्चात् "यत्प्रातिपदिकं स्त्रियां वर्तते तस्मात् स्वार्थे टाबादयो भवन्ति। समासान्ताः अपि स्वार्थिकाः। उभयोः स्वार्थिकयोः परत्वात् समासान्ताः भविष्यन्ति" इति दोषः परिहृतः। तत्पश्चात् हरितशब्दात् कनि हरिणिका इति न स्यादिति प्रश्ने हरिणशब्दात् प्रकृत्यन्तरात् कनि टापि सिद्ध्यति इत्युक्तम्। ततः लोहितशब्दात् कनि, कथं लोहिनिका इत्याशङ्क्य 'लोहिताल्लिङ्गबाधनं वा' इति समाहितम्। एवञ्च लोहिनिका इत्यस्य सिद्ध्यर्थं वार्तिकमाश्रयणीयम्, आर्यका इत्यस्य तु अनभिधानमिति लभ्यते। अत्यन्तस्वार्थिकानामपि यदि स्त्रीप्रत्ययान्तादेव उत्पत्तिस्तर्हि लोहितिका, लोहिनिका इतीष्टसिद्धौ 'लोहिताल्लिङ्ग-बाधनं वा' इति वार्तिकस्य वैयर्थ्यं स्यात्। तस्मात् अत्यन्तस्वार्थिकानारभ्य स्त्रीप्रत्ययेषु ङ्याब्ग्रहणसम्बन्धाभावः इति नागेशोऽभिप्रैति।

### उपसंहारः-

मतद्वयस्यापि परिशीलने अत्र भाष्यसम्मतः पक्षः नागेशेन उक्तः इति भाति। वार्तिकस्यापि तदा सार्थक्यमिति वार्तिककारानुग्रहोपि। दीक्षितैः प्रायः सूत्रकारमतं प्रतिपादयितुं कश्चन यत्नः कृतः। मनोरमादौ गभीररूपेण विचारं कृत्वा स्वतात्पर्यं न्यरूपि। पक्षेऽस्मिन् समासान्तानां व्याख्यानं न स्वरसतया क्रियते। तथा क्वचित् भाष्यविरोध इव भाति। वार्तिकं नापेक्षते इति लाघवं तु दृश्यते।

### शोधपद्धतिः-

विषयेऽस्मिन् दीक्षितानां ग्रन्थानां विशेषेण कौमुद्याः, प्रौढमनोरमायाः च अध्ययनं कृतम्। ततः नागेशटीकानां शेखरग्रन्थानुसारं विचारः अधिगतः। उभयोः पक्षयोः तुलना कृता। तेषां युक्तीनां समवलोकनेन च तत्र युक्तायुक्तविचारः कृतः। अतः आश्रिताः पद्धतयः प्राधान्येन ग्रान्थिकटीकावलोकनम्, प्रमाणानां तुलना, युक्तायुक्तविचारेण च बलाबलनिर्णयः इत्येवंरूपाः सन्ति।

### परिणामः चर्चा च-

प्रबन्धे विशेषेण मूलग्रन्थानां समवलोकनेन परिणामाः प्राप्ताः। मतद्वयस्यापि परिशीलने अत्र भाष्यसम्मतः पक्षः नागेशेन उक्तः इति भाति। वार्तिकस्यापि तदा

1. म.भा भागः 4 पृ.सं 14

सार्थक्यमिति वार्तिककारानुग्रहोपि। दीक्षितैः प्रायः सूत्रकारमतं प्रतिपादयितुं कश्चन यत्नः कृतः। मनोरमादौ गभीररूपेण विचारं कृत्वा स्वतात्पर्यं न्यरूपि। पक्षेऽस्मिन् समासान्तानां व्याख्यानं न स्वरसतया क्रियते। तथा क्वचित् भाष्यविरोध इव भाति। वार्तिकं नापेक्षते इति लाघवं तु दृश्यते। अत्र इतोऽपि व्याख्यानां परिशीलनेन विचारः कर्तुं शक्यते। यतोऽहि महाभाष्यकाराणामाशयः न सुलभेन ज्ञातुं शक्यते। अतः व्याख्यानां, विद्वद्भिः सह समालोचनेन विषयः सम्यक् विचारितः स्यात्।

## References-

1. महामहोपाध्यायश्रीमद्भट्टोजीदीक्षिताः। **वैयाकरणसिद्धान्तकौमुदी [प्रथमो भागः]** बालमनोरमा-तत्त्वबोधिनीसहिता, 8th edition, 2005. मोतीलाल बनारसीदास दिल्ली, 173-184.
2. महामहोपाध्यायश्रीमद्भट्टोजीदीक्षितविरचिता **प्रौढमनोरमा** टीकाचतुष्टयोपेता, 1996. प्रकाशकः- जयकृष्णदास हरिदासगुप्तः चौखम्बा संस्कृत सीरिज आफिस, वाराणसी सिटी. 325-381
3. महर्षिपतञ्जलिना विरचितम् **व्याकरणमहाभाष्यम्-4** प्रदीपोद्योतसहितम्, 2011 (पुनर्मुद्रणम्) भार्गवशास्त्रिभिः संशोधितम्, चौखम्बा संस्कृतप्रतिष्ठानम् देहली, 1-16.
4. महामहोपाध्यायनागेशभट्टविरचितः, **लघुशब्देन्दुशेखरः** (भावबोधिनी-बालबोधिनीसहितः), Rashtriya Sanskrit Vidyapeetha, Tirupati, 2005. आचार्यश्रीपादसत्यनारायणमूर्तिभिः सम्पादितः, 28- 39.

✦✦✦

 ISSN : 0975-1769

# तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः

-डॉ. विदुषी बोल्ला*

**शोधसारः**- 'इदमन्तमः कृत्स्नं जायेत भुवनत्रयम्, यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते' इति दण्डिवचनात्, 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमि'त्यभियुक्तोक्त्या संस्कृतव्याकरणस्य सर्वशास्त्रोपकारकत्वं निश्चप्रचमेव। एवञ्च संस्कृतव्याकरणं ज्ञानराशेर्भगवतो वेदस्य वै मुखं स्मृतम्। अतएव भारतीयाध्ययनपरम्परायां संस्कृतव्याकरणं प्राधान्येन वरीवर्त्ति। ईदृग्व्याकरणस्याभिसम्बन्धः आभारते सर्वाभिः भाषाभिः सह वर्त्तते इति नास्त्यतिशयोक्तिः। स एव सम्बन्धः अस्मिन् शोधपत्रे प्रकाशितो मया। तत्र संस्कृतव्याकरणस्य प्रभावः मुख्यतया दाक्षिणात्यतेलुगुभाषायाः व्याकरणस्य ग्रन्थरचनायाम्, सञ्ज्ञाविधाने, रूपनिष्पादनप्रक्रियायाम्, सूत्रसंरचनायाञ्च दरीदृश्यत इति प्रतिपादितम्।

**प्रमुखशब्दाः**-आन्ध्रशब्दचिन्तामणिः, ग्रन्थरचना, तेलुगुव्याकरणम्, व्याकरण-स्याभिसम्बन्धः, सञ्ज्ञाविधानम्, रूपनिष्पादनप्रक्रिया च।

**आमुखम्**- दैवीवाग्रूपेण राराजते संस्कृतभाषा। प्रायशः सर्वासां भारतीयभाषाणां जननीरूपेणाऽपि चकास्ति लोके। विश्वस्मिन् विश्वे सर्वाङ्गपूर्णेयं भाषा अन्याः भाषाः पोषयन्ती प्रथिताऽस्ति। परिष्कृतायाः अस्याः प्रकृष्टोपकारकं त्रिमुनेः व्याकरणशास्त्रं प्रकृतिप्रत्यय-तत्तदर्थविभाग-तत्तदर्थान्वयविभागबोधकत्वेन निखिलेऽस्मिन् लोके देदीप्यते।

तथैव उत्तरभारते हिन्दी-बाङ्ग्ला-पञ्जाबी-मराठीभाषाः, दक्षिणभारते च तमिल-तेलुगु-मलयालमप्रभृतयः बह्व्यः भाषाः लोकभाषात्वेन व्यवह्रियमाणाः वर्त्तन्ते। शोधपत्रेऽस्मिन् आन्ध्र-देशीयस्थतेलुगुभाषाव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः अनुसन्धीयते। एतदेव विषयमनुसृत्य निम्नलिखिताः अंशाः विमृश्यन्ते-

1. **तेलुगुव्याकरणपरम्परा।**
2. **आन्ध्रशब्दचिन्तामणेः परिचयः।**
3. **बालव्याकरणस्य परिचयः।**
4. **ग्रन्थरचनायां संस्कृतव्याकरणस्याभिसम्बन्धः।**

---

* सहायिकाचार्या, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गुजरातम्।

**5. सञ्ज्ञाविधाने संस्कृतव्याकरणस्याभिसम्बन्धः।**

**6. रूपनिष्पादनप्रक्रियायां संस्कृतव्याकरणस्याभिसम्बन्धः।**

**7. सूत्रेषु संस्कृतव्याकरणस्याभिसम्बन्धः।**

1. **तेलुगुव्याकरणपरम्परा**- आन्ध्रव्याकरणं स्वरूपभेदात् पञ्चधा विभज्यते- प्रथमजातिग्रन्थाः, द्वितीयजातिग्रन्थाः, तृतीयजातिग्रन्थाः, चतुर्थजातिग्रन्थाः, पञ्चमजातिग्रन्थाश्च।

क. प्रथमजातिग्रन्थाः[1]-प्रथजातिग्रन्थेषु संस्कृतभाषायां गद्यात्मके सूत्रात्मके वा लिखिताः ग्रन्थाः, अपि चैतेषां विवरणात्मकग्रन्थाश्च आगच्छन्ति, यथा- श्रीनन्नयभट्टस्य आन्ध्रशब्दचिन्तामणिः, श्रीचिन्नसीतारामस्वामिनः बालसरस्वतीयम्, अहोबलपण्डितस्य अहोबलपण्डितीयम्, किम्पूरि नरसराजस्य कविजनाञ्जनम्, श्रीचिन्नसीतारामस्वामिनः चिन्तामणिविषयपरिशोधनम्, नारायणशास्त्रिणः नन्नयाथर्वणकारिकावली, अथर्वणस्य विकृतिविवेकमु, लक्ष्मीनरसिंहाचार्यस्य आन्ध्रकौमुदी, कृष्णमूर्त्तिशास्त्रिणः हरिकारिका, चिन्नयसूरिणः सूत्रान्ध्रव्याकरणमु एवञ्च अप्पकवीयम्।

ख. द्वितीयजातिग्रन्थाः[2]- द्वितीयजातिग्रन्थेषु तेलुगुभाषायां छन्दोनिबद्धाः श्लोकात्मिकाः ग्रन्थविशेषाः आगच्छन्ति, यथा- गणपवरवुवेङ्कटकवेः आन्ध्रभाषाभूषणमु, विन्नकोटपेद्दनस्य काव्यालङ्कारचूडामणि, वेल्लङ्कितातम्भट्टोः कविलोक-चिन्तामणि, मुद्दराजुरामनस्य कविजनसञ्जीवनी, कूचिमंचितिम्मकवेः सर्वलक्षण-सारसङ्ग्रमु, गणपवरवुवेङ्कटकवेः आन्ध्रकौमुदी, कस्तूरिरंगकवेः आनन्दरङ्गराट् छन्दमुसूरकवेश्च कविसंलयविच्छेदमु।

ग. तृतीयजातिग्रन्थाः[3]- अत्र तेलुगुभाषायामेव सूत्रगद्यप्रणाल्यां विरचिताः ग्रन्थविशेषाः अन्तर्भवन्ति, यथा- चिन्नयसूरिणः बालव्याकरणमु, श्रीबहुजनपल्लिसीता-रामाचार्युलुवर्यस्य प्रौढव्याकरणमु, कल्लूरि वेङ्कटरामशास्त्रिणश्च 0बाल-व्याकरणगुप्तार्थप्रणालिका।

घ. चतुर्थजातिग्रन्थाः[4]- अत्राङ्ग्लभाषायां ग्रथिताः ग्रन्थविशेषाः समागच्छन्ति।

ङ. पञ्चमजातिग्रन्थाः[5]- अत्र कालेन विपरिणतिं प्राप्ताः द्राविडभाषाज्ञानमूलकाः ग्रन्थविशेषाः आगच्छन्ति।

---

1. आन्ध्रभाषाविकासमु, पृष्ठसङ्ख्या- 155
2. आन्ध्रभाषाविकासमु, पृष्ठसङ्ख्या- 167
3. आन्ध्रभाषाविकासमु, पृष्ठसङ्ख्या- 172
4. आन्ध्रभाषाविकासमु, पृष्ठसङ्ख्या- 174
5. आन्ध्रभाषाविकासमु, पृष्ठसङ्ख्या- 174

2. **आन्ध्रशब्दचिन्तामणेः परिचयः**- अस्मिन् शोधपत्रे उपरि निर्दिष्टेषु तेलुगुव्याकरणेषु संस्कृतभाषायां श्रीनन्नयभट्टविरचितम् 'आन्ध्रशब्दचिन्तामणिः' तेलुगुभाषायां श्रीचिन्नयसूरिविरचितं 'बालव्याकरणम्' इति आश्रित्य गवेषणा विहिता वर्त्तते। अतः एतयोः अपि सङ्क्षेपेण परिचयः प्रदीयते। तेलुगुव्याकरणस्य आद्यं ग्रन्थरत्नमस्ति। अस्य ग्रन्थकृतः सन्ति- श्रीनन्नयभट्टाः। एते संस्कृतपण्डिताः आसन्। ग्रन्थोऽयं संस्कृतभाषायामुपलभ्यते। अत्र आर्यावृत्ते अष्टाशीतिसङ्ख्यकाः श्लोकाः सन्ति।

3. **बालव्याकरणस्य परिचयः**- श्रीचिन्नयसूरिणा विरचितं तेलुगुव्याकरणम्- बालव्याकरणमु इति नाम्ना प्रसिद्ध्यति। व्याकरणमिदं तेलुगुभाषायां विरचितं सूत्रात्मकरूपेण प्राप्यते। श्रीचिन्नयसूरिणा सूत्रान्ध्रव्याकरणमिति संस्कृतभाषायामपि तेलुगुव्याकरणग्रन्थो विरचितः।

4. **ग्रन्थरचनायां संस्कृतव्याकरणस्याभिसम्बन्धः**- ग्रन्थरचनायां संस्कृत-व्याकरणस्य प्रभावः मुख्यतया एवं दृश्यते-

- आन्ध्रशब्दचिन्तामणिः इति तेलुगुव्याकरणग्रन्थः सञ्ज्ञा-सन्धि-अजन्त-हलन्त-क्रियापरिच्छेद-भेदेन विभक्तोऽस्ति। पाणिनीयशास्त्रपद्धत्यनुसारमत्रापि अहोबलपण्डितीयमिति भाष्यमपि समुपलभ्यते। तत्रापि परिभाषा, सन्धिः, अजन्तशब्दाः, हलन्तशब्दाः, स्त्रीप्रत्ययाः, विभक्त्यर्थः, समासाः, तद्धितप्रत्ययाः, तिङन्ताः, कृदन्तप्रत्ययाः इति विभागाः सन्ति।
- बालव्याकरणमिति तेलुगुव्याकरणग्रन्थः सञ्ज्ञा-सन्धि-तत्सम-कारक-समास-तद्धित-क्रिया-कृदन्त-प्रकीर्णनामभिः प्रकरणैः परिच्छिद्यते। ग्रन्थोऽयं चिन्तामणिग्रन्थादपि बृहद्वर्त्तते।
- तेलुगुव्याकरणे बालव्याकरणे आदौ संस्कृतव्याकरणवत् वर्णपरिचयो प्रदत्तः।
- तेलुगुव्याकरणस्यापि आद्यग्रन्थः संस्कृते 'आन्ध्रशब्दचिन्तामणिः' इत्येवाऽस्ति।
- भाष्यपरम्पराऽपि दृश्यते- अहोबलपण्डितेन विरचितं भाष्यं फक्किकायुक्तञ्च मिलति।
- चिन्नयसूरिविरचिते बालव्याकरणे सिद्धान्तकौमुद्यनुसारं सूत्राणि, तदर्थः, तदुदाहरणानि च लिखितानि सन्ति।
- तेलुगुव्याकरणे प्राप्तहलन्तपरिच्छेदः सम्पूर्णतया संस्कृतमाश्रीयते। यतोहि तेलुगुभाषायां हलन्तशब्दाः न भवन्ति, किन्तु हलन्तपरिच्छेदे संस्कृतशब्दानामेव रूपप्रक्रिया प्रदर्शिता, यथा- वाक्, वणिक् इति।

5. **सञ्ज्ञाविधाने संस्कृतव्याकरणस्याभिसम्बन्धः**– श्रीनन्नयविरचितं व्याकरण-शास्त्रं संस्कृते एवास्ति अत एव प्रायः संस्कृतव्याकरणसञ्ज्ञाः प्राप्यन्ते।

| | | | | |
|---|---|---|---|---|
| **सन्धिः** | **समासः** | **विभक्तिः** | **क्रिया** | **अच्** |
| हल् | अव्ययम् | प्रथमादिविभक्तयः | अन्तस्थः | ऊष्माणः |
| भूतकालः | भविष्यकालः | वर्त्तमानकालः | कर्त्ता | कर्म |
| करणम् | समासनामानि | | | |

तेलुगुभाषायाः स्वभावमाश्रित्य काश्चन नूतनसञ्ज्ञाः अपि संस्कृतभाषायामेव दृश्यन्ते, यथा–

| | | | | |
|---|---|---|---|---|
| **वक्रः** | **वक्रतमः** | **सरलः** | **परुषः** | **स्थिरः** |
| कलः | द्रुतप्रकृतिः | औपविभक्तिः | महत् | अमहत् |
| महती | उपकृतिः | परिणतिः | संवृतिः | तद्धर्मः |

6. **रूपनिष्पादनप्रक्रियायां संस्कृतव्याकरणस्याभिसम्बन्धः**– तेलुगुव्याकरण-ग्रन्थेष्वपि रूपनिष्पादनप्रक्रियायां संस्कृतव्याकरणस्य प्रभावः दरीदृश्यते, यथा–

➢ तेलुगुशब्दनिष्पादनेऽपि संस्कृतव्याकरणवत् प्रकृतिप्रत्ययाः आगच्छन्ति, यथा रामुडु इत्यस्य सिद्धिप्रक्रियायां राम इति प्रातिपदिकात् डुप्रत्ययो भवति। अत्र डुप्रत्ययः 'पुल्लिङ्गम्बगु महाद्वाचकम्बुनकु डुज्जगु'[1], 'महातस्सोर्डुज् अनितो भवेत्पुंसि'[2] इत्येतयोः सूत्रयोः भवति।

➢ द्वितीयतुल्यताऽस्ति– संस्कृतव्याकरणशास्त्रे सिद्धिप्रक्रियायामष्टाध्याय्यां सर्वतः स्वस्वलिङ्गमाश्रित्य लक्ष्यानुसारञ्च सूत्राणि प्रवर्त्तन्ते, तथैव तेलुगुव्याकरणेऽपि दरीदृश्यते। यथा– रामुनिकि इत्यत्र राम इति प्रातिप0दिकात् 'पुल्लिङ्गम्बयि महाद्वाचकम्बयिन नामम्बु तुदियत्वम्बुन कुत्वम्बगु'[3] इत्यनेन उत्वं भवति 'रामु' इति। अनन्तरं 'डुमन्तबनकु द्वितीयाद्येकवचनम्बु वरम्बगुनप्पुडु निगागमम्बु सर्वत्र विभाषनगु'[4] इत्यनेन विकल्पेन निकिनि एवं नुकुनु इति च भवति 'रामुनिकिनि / रामुनुकुनु' इति। अनन्तरञ्च 'इकारम्बुमीदि कुनुवु क्रियाविभक्तुलु मीदि युत्वम्बुन कित्वम्बुगु'[5] इत्यनेन 'रामुनिकि' इति रूपं सिद्ध्यति। अत्र उपस्थितानि एतानि सूत्राणि पृथक्देशतः सन्ति।

---

1. बालव्याकरणे तत्समपरिच्छेदे पृष्ठसङ्ख्या 132
2. आन्ध्रशब्दचिन्तामणौ
3. बालव्याकरणे तत्समपरिच्छेदे पृष्ठसङ्ख्या 131
4. बालव्याकरणे तत्समपरिच्छेदे पृष्ठसङ्ख्या 133
5. बालव्याकरणे तत्समपरिच्छेदे पृष्ठसङ्ख्या 136

7. **सूत्रेषु संस्कृतव्याकरणस्याभिसम्बन्धः**– सूत्रपरम्पराऽपि संस्कृतव्याकरणादेव अनुवर्त्तते। तेलुगुसूत्रेष्वपि सूत्रलक्षणमनुसृतम्– अल्पाक्षरत्वम्, असन्दिग्धत्वम्, सारवत्त्वम्, व्यापकार्थप्रकाशकत्वम्, अर्थविहीनशब्दराहित्यम्, विशुद्धसंरचनत्वञ्च। एवं सूत्रसंरचनायां कुत्र कुत्र साम्यं दृश्यते, तद्विवृणुते–

- ➢ श्रीनन्नयव्याकरणे महाभाष्यस्यानुसरणमपि दृश्यते, यथा– 'सिद्धे शब्दार्थसम्बन्धे' इत्यस्यार्थं प्रतिपादयल्लिखितं सूत्रमस्ति– सिद्धिः लोकाद्दृश्या इति।
- ➢ अस्त्यप्रयुक्ताः सन्ति शब्दाः..... इति मनसि निधाय विरचितं सूत्रमस्ति– संस्कारार्थो नियमः इति।
- ➢ तथैव श्रीनन्नयभट्टविरचितसूत्रेषु संस्कृतसूत्राणां प्रभावः तालिकाद्वारा प्रदर्श्यते–

| **संस्कृतसूत्राणि** | **श्रीनन्नयभट्टविरचितसूत्राणि** |
|---|---|
| कर्मप्रवचीनयुक्ते द्वितीया[1] | कर्मप्रवचनीयके कूर्चिः |
| सह युक्तेऽप्रधाने[2] | तोऽसहार्थे टासः |
| विभाषा गुणेऽस्त्रियाम्[3] | पट्टिति तु पञ्चमी गुणे हेतौ |
| अन्यारादितरर्तेदिच्छब्दाञ्चूत्तर[4] | कण्टेऽन्यारादादेः |
| यतश्च निर्धारणम्[5] | लोपल निर्धारणोद्भवा षष्ठी |
| षष्ठी शेषे[6] | यौक्क च शेषे षष्ठी |
| निमित्तात्कर्मयोगे[7] | विषयनिमित्तादिजातदैवाऽन्या |

- ➢ एवमेव श्रीनन्नयभट्टविरचितसूत्रान् आधरीकृत्य श्रीचिन्नयसूरिणा तेलुगुसूत्राणि निर्मितानि, यथा–

| **श्रीनन्नयभट्टकृतसंस्कृतसूत्राणि** | **श्रीचिन्नयसूरिकृततेलुगुसूत्राणि** |
|---|---|
| द्रुताभ्यो नः | नकारम्बु द्रुतम्बु[8] |
| क्वार्थैतो न भवेत्सदा | क्वार्थम्बैन यत्तुनकु सन्धिलेदु[9] |

1. 2-3-8 पाणिनीयाष्टाध्याय्यां पृ.स.-11
2. 2-3-19 पाणिनीयाष्टाध्याय्यां पृ.स.-12
3. 2-3-25 पाणिनीयाष्टाध्याय्यां पृ.स.-12
4. 2-3-29 पाणिनीयाष्टाध्याय्यां पृ.स.-12
5. 2-3-41 पाणिनीयाष्टाध्याय्यां पृ.स.-12
6. 2-3-50 पाणिनीयाष्टाध्याय्यां पृ.स.-12
7. वार्त्तिकम्
8. बालव्याकरणे सञ्ज्ञापरिच्छेदे पृष्ठसङ्ख्या 16
9. बालव्याकरणे सन्धिपरिच्छेदे पृष्ठसङ्ख्या 56

| | |
|---|---|
| न विकृतिशब्दात्परतस्संस्कृतिकानां भवन्ति गसडदवाः | तेनुगुलमीदि सांस्कृतिक परुषम्बुलकु गसडदवलु रावु[1] |
| द्रुतस्य सर्वत्र लुक्समानेषु | समासम्बुन द्रुतम्बुनकु लोपम्बगु[2] |
| परुषाणां गसडदवास्स्युः पदाद्द्वन्द्वे | द्वन्द्वम्बुनं बदम्बुपयि परुषमूलकु- गसडदव लगु[3] |
| नलडादैरन्तरुतश्च | अच्चिकम्बुल बदमध्यम्बुलु नलडरल- युत्वम्बुनकु लोपम्बु बहुलम्बुगा नगु[4] |
| अन्येषाञ्च प्रयोगमहितानाम् | लाति यच्चुनकुसहित मौकानोकचो नुडि नडुमलोपम्बुगानम्बडियौडि[5] |
| स्त्रीपलुजडान्विनान्ये महादाख्यास्त- द्विशेषणानीहा | स्त्रीतिर्यग्जड भिन्नम्बुलुनु वानि- विशेषणम्बुलुनु महात्तुलनम्बडुनु[6] |

➢ कुत्रचित् श्रीचिन्नयसूरिकृततेलुगुसूत्रेषु संस्कृतव्याकरणस्याभिसम्बन्धोऽपि साक्षात् दृश्यते, यथा-

| **संस्कृतव्याकरणम्** | **श्रीचिन्नयसूरिकृततेलुगुसूत्राणि** |
|---|---|
| प्रातिपदिकार्थलिङ्गपरिमाणवचन- मात्रे प्रथमा[7] | प्रातिपदिकसम्बोधनोक्तार्थम्बुलं प्रथमयगु[8] |
| क्रियासिद्ध्यै प्रकृष्टोपकारकं करणसञ्ज्ञं स्यात् (कौ.) | क्रियासिद्धिं प्रकृष्टोपकारकम्बु करणम्बु |
| गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्म.[9] | गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्म- कम्बुलक प्रेरणम्बुनं कर्त्तयगुनदि प्रेरणम्बुनं कर्मम्बगु[10] |

---

1. बालव्याकरणे सन्धिपरिच्छेदे पृष्ठसङ्ख्या 65
2. बालव्याकरणे सन्धिपरिच्छेदे पृष्ठसङ्ख्या 81
3. बालव्याकरणे सन्धिपरिच्छेदे पृष्ठसङ्ख्या 66
4. बालव्याकरणे प्रकीर्णपरिच्छेदे पृष्ठसङ्ख्या 518
5. बालव्याकरणे प्रकीर्णपरिच्छेदे पृष्ठसङ्ख्या 518
6. बालव्याकरणे तत्समपरिच्छेदे पृष्ठसङ्ख्या 130
7. 2-3-46 पाणिनीयाष्टाध्याय्यां पृ.स.-12
8. बालव्याकरणे कारकपरिच्छेदे पृष्ठसङ्ख्या 264
9. 1-4-52 पाणिनीयाष्टाध्याय्यां पृ.स.-7
10. बालव्याकरणे क्रियापरिच्छेदे पृष्ठसङ्ख्या 489

| | |
|---|---|
| धातोः[1] | धातवुनकु[2] |
| वर्त्तमाने लट्[3] | वर्त्तमानम्बुन लट्टगु[4] |
| परोक्षे लिट्[5] | भूतम्बुन लिट्टगु[6] |

➢ कुत्रचित् पाणिनीयसूत्राणामनपायोजनादिकं कृत्वा श्रीचिन्नयसूरिणा तेलुगुसूत्राणि लिखितानि, यथा- अपाय भय जुगुप्सा पराजय प्रमाद ग्रहण भवन त्राण विरामन्तर्धि वारणम्बु लेद्वाननगु दानिकि वलन वर्णकम्बगु[7]

| | |
|---|---|
| ध्रुवमपायेऽपादानम्[8] | अपायशब्दः |
| भीत्रार्थानां भयहेतुः[9] | भय-त्राणशब्दौ |
| पराजेरसोढः[10] | पराजयशब्दः |
| वारणार्थानामीप्सितः[11] | वारणशब्दः |
| अन्तर्धौ येनादर्शनमिच्छति[12] | अन्तर्धिशब्दः |
| भुवः प्रभवः[13] | भवनशब्दः |
| जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् | जुगुप्सा-विराम-प्रमादशब्दाः |

➢ तेलुगुव्याकरणेऽपि संस्कृतव्याकरणस्य बाध्यबाधकविचारः अनुसृतः।

➢ संस्कृतव्याकरणस्य पारिभाषिकशब्दाः तेलुगुव्याकरणेऽपि दृश्यन्ते, यथा- प्रथमेतरविभक्तिविधि निरवकाशम्बुगावुन दीनिनि बाधिञ्चेदिति अत्रस्थनिरवकाशपदं पारिभाषिकमस्ति।

---

1. 3-1-91 पाणिनीयाष्टाध्याय्यां पृ.स.-17
2. बालव्याकरणे क्रियापरिच्छेदे पृष्ठसङ्ख्या 377
3. 3-2-123 पाणिनीयाष्टाध्याय्यां पृ.स.-21
4. बालव्याकरणे क्रियापरिच्छेदे पृष्ठसङ्ख्या 377
5. 3-2-115 पाणिनीयाष्टाध्याय्यां पृ.स.-21
6. बालव्याकरणे क्रियापरिच्छेदे पृष्ठसङ्ख्या 378
7. बालव्याकरणे कारकपरिच्छेदे पृष्ठसङ्ख्या 274
8. 1-4-24 पाणिनीयाष्टाध्याय्यां पृ.स.-7
9. 1-4-25 पाणिनीयाष्टाध्याय्यां पृ.स.-7
10. 1-4-26 पाणिनीयाष्टाध्याय्यां पृ.स.-7
11. 1-4-27 पाणिनीयाष्टाध्याय्यां पृ.स.-7
12. 1-4-28 पाणिनीयाष्टाध्याय्यां पृ.स.-7
13. 1-4-31 पाणिनीयाष्टाध्याय्यां पृ.स.-7

| | |
|---|---|
| कृताकृतप्रसङ्गि नित्यम् | कृताकृतप्रसङ्गि नित्यम्बुनबडु |
| पूर्वापरनित्यान्तरङ्गापवादानामुत्तरो | परसूत्रमु वच्चुनुगानि पूर्वसूत्रमु रादनि व्याकरणसम्प्रदायमु |

## सन्दर्भ-सहायकग्रन्थसूची


1. आकुरायि- तेलुगु व्याकरण व्यास सम्पुटि, यूलगूरि वेङ्कटरेड्डि, पार्थसारथि आफसेट प्रिण्टर्स, नल्लगोण्ड, प्रथमसंस्करणम्, 1999
2. आधुनिक भाषा विज्ञान एवं हिन्दी भाषा संवर्धन, डॉ. पीताम्बर, नीलम प्रकाशन, आगरा, प्रथमसंस्करणम्, 1990
3. आधुनिक भाषाशास्त्र सिद्धान्तालु, डॉ. पी. एस. सुब्रह्मण्यम्, पद्मश्री ग्राफिक्स, गान्धीनगर, हैदराबाद, प्रथमसंस्करणम्, 1997
4. आन्ध्रशब्दचिन्तामणि, नन्नयभट्टः।
5. आन्ध्रभाषाविकासमु, प्रो. गण्टि बोगिसोमयाजि, त्रिवेणी पब्लिशर्स, मचलिपट्टणमु, द्वितीयसंस्करणम्, 1968
6. आन्ध्र व्याकरणसंहिता सर्वस्वमु, चिन्नसीताराम स्वामी शास्त्री, वाविल्ल, रामस्वामिशास्त्रुलु अण्ड सन्स, 1951
7. आन्ध्र व्याकरण सर्वस्वमु, श्रीशेषाद्रि रमणकवुलु, रामा एण्ड को., एलुरु, द्वितीयसंस्करणम्, 1942
8. आन्ध्रव्याकरणसर्वस्वतत्त्वमु, की. शे. श्रीवेङ्कटराय शास्त्री, वैदमु- वेङ्कटरायशास्त्री अण्ड ब्रदर्स, मद्रास, प्रथमसंस्करणम्, 1950
9. पाणिनीयः अष्टाध्यायीसूत्रपाठः, सम्पादकः- श्री प. ब्रह्मदत्तजिज्ञासु, राधाप्रेस, देहली, सप्तदशं संस्करणम्, 2005
10. प्रौढव्याकरण घण्टापथमु, बहुजन सीतारामाचार्युलु, व्याख्याता वन्तरां रामकृष्णरावु, विशालान्ध्र पब्लिकेशन हाऊस, हैदराबाद, 1980
11. बाल प्रौढ व्याकरणमुलु विश्लेषणात्मक अध्ययनमु, प्रो. हरिशिवकुमार, श्रीकृष्ण प्रचुरणुलु, वरंगल, प्रथमसंस्करणम्, 1994
12. बाल व्याकरणमु, चिन्नयसूरिः, वि. वेङ्कटेश्वरशास्त्रुलु, वेविल्ला प्रेस, मद्रास, प्रथमसंस्करणम्, 1937
13. बालप्रौढव्याकरणसर्वस्वमु, श्रीभास्कररावु, श्रीलक्ष्मी प्रेस, गुण्टूरु, प्रथम-संस्करणम्, 1970

14. बालव्याकरणसूत्तुलु, प्रथमभागः, डॉ. अम्बडिपूडि नागभूषणमु, गौतमि प्रिण्टर्स, गुण्टूरु, प्रथमसंस्करणम्, 1988

15. भाषातत्त्वदीपिका, श्रीहरिगोपालोपाध्याय, नवलकिशोर प्रेस, लखनऊ, 1881

16. भाषालोचन, पण्डितप्रवर आचार्य श्रीसीताराम चतुर्वेदी, हिन्दी साहित्य कुटीर, बनारस, 1954

17. वर्णनात्मकव्याकरणम्, डॉ. एच्.एस्स्. बिलिगिरि, अभिव्यक्ति पब्लिकेशन्स, बेंगलोर, प्रथमसंस्करणम्, 1975

18. संस्कृत व्याकरण की उपक्रमणिका, श्री ईश्वरचन्द्र विद्यासागर, श्रीलक्ष्मीनारायण प्रेस, बनारस, 1931

19. संस्कृत शास्त्रों का इतिहास, आचार्य बलदेव उपाध्याय, नया संसार प्रेस, वाराणसी, प्रथमसंस्करणम्, 1969

20. संस्कृतव्याकरण संग्रहमु, साहिति सदन, तिरुपति, 1976

21. An Introduction to Telugu Grammar, V. Vemuri, Article.

22. History of Telugu Language, Vol. 1, G. Narayana Rao, Ananda Press, Madras, 1st Edition, 1987.

✦✦✦

 ISSN : 0975-1769

# आहारविवेके स्वास्थ्यसिद्धिः आहारशुद्धौ सत्त्वशुद्धिः

-डॉ. नवीन भट्ट*

**शोधसारः-**

पुरुषार्थसिद्ध्यर्थं स्वास्थ्यम् अत्यन्तमपेक्षितम्। विना स्वास्थ्यं धर्मादिपुरुषार्थ-सिद्धिरसाध्या एव भवति। वाग्भटाचार्यः "आयुःकामयमानेन धर्मार्थसुखसाधनम्"[1] इति आयुर्वेदस्य धर्मादिपुरुषार्थसाधनत्वं कथयति। पञ्चभूतात्मके शरीरे असन्तुलिताः-सन्तुलिताश्च वात-पित्त-कफाः देहं घ्नन्ति वर्धयन्ति च। अशितमन्नमेव देह-मनोरूपेण च परिणमते। जीविनां जीवननिर्वहणाय आकाशादारभ्य अन्नान्तानि भूतानि आवश्यकानि भवन्तीति अस्माकं विदितमेव। यतः तैत्तिरीयोपनिषदि ब्रह्मानन्दवल्यां "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः ...... अन्नात् पुरुषः"[2] इति जीविनाम् अन्नात्सृष्टिः प्रतिपादिता अस्ति। अत अन्नमेव अस्माकं सर्वेषां मूलकारणमस्ति। अन्नमेव रसासृङ्मांसमेदोस्थिमज्जाशुक्राख्येन सप्तधातुरूपेण परिणमते। इदमेव मनोरूपेणापि परिणमते यथोक्तम् - अन्नमयं हि सौम्य मनः" इति। अस्यां पृथिव्यां शुद्धाशुद्धम्, विकृताविकृतम्, सात्विकादिगुणभेदयुक्तम् च सर्वविधं अन्नमत्रोपलभ्यते। अस्माकं दैहिक-मानसिक-बौद्धिकानां आरोग्यपरिपालनाय कीदृशमन्नं स्वीकर्तव्यमिति विवेकः अपेक्षितः।

मानवेभ्यः विवेकबुद्धिं विकसितुमेव स्मृत्यादिग्रन्थाः प्रवृत्ताः सन्ति। विवेकी मानवः एव पुरुषार्थं साधयितुं शक्तः भवेत् नाविवेकी। सर्वेभ्यः विवेकज्ञानायैव आचार्याः सदाचारान् उपदिष्टवन्तः। उपदिष्टेषु सदाचारेष्वपि वर्णाश्रमधर्मभेदेन अनेके प्रकाराः उपलभ्यन्ते। एतेषां सदाचाराणां परिपालनेन स्वस्य समाजस्य च स्वास्थ्यं परिपालितं भवेत्। समाजस्य स्वास्थ्यपरिपालनपूर्वकमेव स्वस्य पुरुषार्थसिद्धिर्भवेदिति शास्त्रीयः नियमः। पुरुषार्थसिद्धिः गुरूपदेशानुष्ठानपूर्वकं भवतीति ज्ञातम्। उपदेशानुष्ठानं च आरोग्ये सति सम्भवति। आरोग्यं च आहारपूर्वकम्, अत एव अत्र अद्यमानस्य अन्नस्य चिन्तनं क्रियते।

---

* सहायकाचार्य, श्रीसत्यसाईविश्वविद्यालय, कुलबर्गी, कर्णाटकः।

1. अष्टाङ्गहृदयम् - 1/2
2. तैत्तिरीयोपनिषत् - 2/1

**प्रमुखशब्दाः** - शाकाविवेकः, प्रायश्चित्तम्, व्रतम्, अन्नस्य महत्वम्।

**शाका-विवेकः** -

सर्वाः अपि शाकाः सर्वेभ्यः प्राणिभ्यः सर्वदा अनुकूलकराः एव भवन्तीति वक्तुं कष्टकरं यतः आनुकूल्यं - प्रातिकूल्यं च तत्तद् देहप्रकृति-शाकप्रकृतिं च अनुसृत्य विवेचनीयम्। किन्तु स्मृतिकाराः कासाञ्चन शाकानां निषेधमकुर्वन्, तादृशशाकानां स्वीकारे कश्चन प्रायश्चित्तमाचरेत्। तदुक्तम् -

➢ पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम्। लशुनं गृञ्जनं चैव जग्ध्वा चान्द्रायणं चरेत्।।[1]

➢ लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च। अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च।।[2]

उभयत्र स्मृतौ पलाण्ड्वादीनां वर्ज्यत्वं प्रकथितम्। स्मृतिकारानुसारं शाकासु पलाण्डुः, लशुनम्, छत्राकम्, गृञ्जनम्, अमेध्यप्रभवानि अर्थात् अपवित्रस्थानेषु (श्मशानादिषु) उत्पन्नाः शाकाः परिवर्जयेयुः।

**प्रायश्चित्तम्** -

अभक्ष्य-भक्षणे सर्वैः प्रायश्चित्तमाचरणीयम्। तदपि यदि बुद्धिपूर्वकं अभक्ष्यं भक्षितं चेत् तर्हि सः पतितो भवति। किन्तु यदि अबुद्धिपूर्वकं भक्षितं तत् सन्तापार्हं भवति तदुक्तम् -

➢ अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सन्तापनं चरेत्। यतिचान्द्रायणं वाऽपि शेषेषूपवसेदहः।।[3]

अमत्या अबुद्धिपूर्वकं पलाण्ड्वादिषु अन्यतमं भक्षित्वा सन्तापनं कृच्छ्रं समाचरेत्। सन्तापनं व्रतं नाम "गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुश-उदकम्। एकरात्रोपवासं च कृच्छ्रं सन्तापनं स्मृतम्"।।[4] अर्थात् एकरात्रोपवासं कृत्वा गोमूत्रादिकं सेवेत।

**यतिचान्द्रायणं व्रतम्** -

➢ अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते। नियतात्मा हविष्याशी यतिचान्द्रायणं चरन्।।[5]

---

1. या, स्मृ - 1/7/176
2. मनु, स्मृ - 5/5
3. मनुस्मृतिः - 5/20
4. मनु - स्मृ 11/212
5. मनु - स्मृ 11/218

सः नियतात्मा भूत्वा केवलं मध्यन्दिने अष्टौ मुष्टिपरिमितः आहारः सेवेत। ते च आहाराः हविष्यादिषु उपयुज्यमानाः भवेयुः। एतदेव यतिचान्द्रायणं व्रतं भविष्यति।।

प्रसङ्गवशात् अन्यानि सम्बद्धानि व्रतान्यत्र उपवर्ण्यन्ते यथा -

**चान्द्रायणं व्रतम् -**

➢ एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्धयेत्। उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम्।।[1]

अर्थात् त्रिषु कालेषु सायंप्रातर्मध्यान्हेषु स्नात्वा शुचिर्भूत्वा पौर्णमास्यां पञ्चदश ग्रासान् अश्नीयात्। ततः कृष्णप्रतिपत्तः आरभ्य एकैकं ग्रासं क्रमेण ह्रासयेत् कृष्णचतुर्दश्याम् एको ग्रासः भवति, अमावास्यायां सम्पूर्णम् उपोष्य शुक्लप्रतिपत्तः एकैकं ग्रासं वृद्धिं नयेत्। एवं पौर्णमास्यां पञ्चदश ग्रासः सम्पद्यन्ते। एतदेव चान्द्रायणं व्रतमित्युच्यते।।

**शिशुचान्द्रायणं व्रतम् -**

➢ चतुरः प्रातरश्नीयात्पिण्डान् विप्रः समाहितः। चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं स्मृतम्।।[2]

सावधानचित्तः विप्रः प्रातः चतुरः ग्रासान् अश्नीयात्। सूर्यास्तमानानन्तरं चतुरः ग्रासान् अश्नीयात्, एवं शुचिर्भूत्वा मासं यावत् व्रतमाचरेत् एतदेव शिशुचान्द्रायणं व्रतमित्युच्यते।

**अतिकृच्छ्रं व्रतम् -**

➢ एकैकं ग्रासमश्नीयात्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन्द्विजः।।[3]

अतिकृच्छ्रम् अनुतिष्ठन् द्विजः त्रीणि दिनानि प्रातःकाले सायंकाले च अयाचितरूपेण एकैकं ग्रासम् अश्नीयात्, एवं कुर्वाणः अन्तिमे त्रिषु दिनेषु सम्पूर्णम् उपवासमाचरेत्। इदमेव 'अतिकृच्छ्रव्रतम्' इत्युच्यते।

एवमनेकानि व्रतानि अभीक्षितलक्ष्यप्राप्तये स्वास्थ्यनिर्वहणाय च उपयुक्तानि भवन्ति। तत्र अस्माभिः छान्दोगानां वचनमत्र स्मर्तव्यम् यत् 'अन्नमयं हि सौम्य मनः आपोमयः प्राणः तेजोमयी वाक्'[4] अन्नविकारं हि मनः अर्थात् अन्नादेव मनः वर्धते।

1. मनुस्मृतिः 11/216
2. मनुस्मृतिः 11/219
3. मनुस्मृतिः 11/ 212
4. छान्दोग्योपनिषद् - 6/6/5

अन्नभेदात् मनोपि भिद्यते यथोक्तम् – 'आहारस्त्वमपि सर्वस्य त्रिविधो भवति प्रियः. .....',

➢ आयु:सत्वबलारोग्यसुखप्रीतिविवर्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः।[1]

यस्य आहारस्य सेवनेन अस्माकं आयुः (दीर्घायुष्यम्) प्रददाति, चिरजीवनं सात्विकाहारेण प्राप्यते, बलवति दुःखेऽपि निर्विकारत्वापादकं चित्तस्थैर्यं ददाति इदमेव सत्वशब्देनोच्यते, स्वोचिते कार्यकरणे श्रमाभावयुक्तं शरीरदार्ढ्यं ददाति, इदमेव बलम् अथवा वीर्यमित्युच्यते, सात्विकाहारसेवनेन सर्वदापि देहमनसोः नीरोगता भवति, इदमेव आरोग्यमित्युच्यते, अन्तराह्लादः सुखमित्युच्यते, परमो हर्षः प्रीतिरित्युच्यते, सात्विकाहाराः एतेषाम् आयुरादीनां वर्धकाः भवन्ति।

सात्विकाहाराणां गुणान् वर्णयन्ति, यथा – रस्याः मधुररसप्रधानाः आस्वाद्याः भवेयुः। अत्र मधुरः रसः स्वाभाविकः भवेत् कृतकमधुररसः कदाचित् आरोग्यं न प्रददाति। अष्टाङ्गहृदयकारः द्रव्यमाश्रितान् षड्रसान् एवं क्रमेण कथयति यथा "स्वाद्वम्ललवणतिक्तोषणकषायकाः। षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः"[2], द्रव्यमाश्रिताः षट् रसाः अनेनैव क्रमेण मधुरादारभ्य कषायान्ताः रसाः परस्य रसस्य अपेक्ष्या पूर्वरसः बलिष्ठः भवति। अतः स्वादुरसः (मधुरः) सर्वेभ्यः अपि रसेभ्यः देहिनां कृते बलवान् भवति, तथा च कषायः रसः सर्वापेक्षया दुर्बलः भवति, इदमेव 'यथापूर्वं बलावहः' इति सूत्रे कथितम्। देहिनां कृते मधुरः रसः हितकरत्वात् बलिष्ठत्वात् च अयं स्वादु रसः सात्विकः भवति। स्निग्धाः अर्थात् स्वभावेन स्नेहगुणयुक्ताः भवेयुः अथवा आगन्तुकेन वा स्नेहगुणयुक्ताः आहाराः भवेयुः अयमेव स्नेहगुणयुक्तः आहारः भवति। रसाद्यंशेन शरीरे चिरकालस्थायिनः भवन्ति अथवा यद्यपि आहारः अचिरादेव देहे जीर्णतां याति तथापि तदुत्पन्नाः परिणामाः चिरकालं तिष्ठन्ति इत्यतः स्थिराः आहाराः उच्यन्ते। दृष्टमात्राः हृदयप्रियाः आहाराः हृद्याः इत्युच्यन्ते। एवं दुर्गन्धाशुचित्वादिदृष्टादृष्टदोषशून्याः पदार्थाः एव सात्विकाः इति कथयन्ति। एतैर्लिङ्गैः सात्विकाः ज्ञेयाः भवन्ति।

➢ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजस्येष्टा दुःखशोकामयप्रदाः।

सूत्रस्थः अतिशब्दः कट्वादिषु सप्तस्वपि योजनीयः भवति। अर्थात् अतिकटुः, अत्यम्लः इत्यादि। तत्र अतिकटुः, अत्यम्लम्, अतिलवणम्, अत्युष्णाः, अतितीक्ष्णाः मरीचादयः, अतिरूक्षाः स्नेहशून्याः पदार्थाः, एते कट्वादयः रसाः शरीरमनसोः तात्कालिकीं पीडां जनयन्तः धातुवैषम्यद्वारा रोगं उत्पाद्य सन्तापकाः भवन्ति। एतैः

---

1. भगवद्गीता – 17/8
2. अष्टांगहृदयम् – 1/14

लिङ्गैः राजसाः ज्ञेयाः, एतादृशाः आहाराः सात्विकैः उपेक्षणीयाः भवन्ति।

➢ यातयामं गतरसं पूति पर्युषितं च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।

अर्धपक्वाः आहाराः यातयामशब्देनोच्यते, विरसतां प्राप्तं शुष्काहाराः गतरसत्वेनोच्यते, दुर्गन्धयुक्तः आहाराः पूतीत्यनेन कथयन्ति, पक्वं सत्रात्र्यन्तरितः आहारः पर्युषितमित्युच्यते, अन्यैः भुक्तावशिष्टः आहार एव उच्छिष्टमित्युच्यते। देव-पितृ-भूत-मनुष्य-यज्ञेभ्यः अयोग्यम् अनर्हं अशुचि-भोजनमेव अत्र अमेध्यमिति कथ्यते। एतादृशाः आहाराः मनुष्याणां चेतसः तत्कालोन्मदकराः भवन्ति किन्तु स्वास्थ्याय हानिकारकाः भवन्ति। किन्तु एतादृशाः आहाराः तामसप्रियाः अर्थात् एतैर्लिङ्गैः तामसाः ज्ञेयाः, तामसाहाराः सात्विकैरुपेक्षणीयाः भवन्ति।

**दिशां प्रामुख्यम् -**

➢ आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियन् प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः।[1]

आयुष्कामः प्राङ्मुखो भूत्वा भुञ्जीत। प्राङ्मुखभोजनेन आयुर्वर्धते पूर्णायुः भवतीत्यर्थः। यशः कामः दक्षिणाभिमुखः भुञ्जीत। दक्षिणाभिमुखभोजनेन यशः वर्धते। श्रियं यो इच्छति सः पश्चिमाभिमुखो भूत्वा भुञ्जीत। ऋतं सत्यं, यज्ञः अथवा यज्ञफलं स्वर्गो वा, अत स्वर्गकामः उत्तराभिमुखो भूत्वा भोजनं कुर्यात्।

**अन्नस्य महत्वम् -**

➢ पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्। दृष्ट्वा हृष्येत्प्रसीदेच्च प्रतिनन्देच्च सर्वशः।[2]

अश्यते भुज्यते इत्यन्नम्। अशनार्थम् यत्किञ्चिदानीतं देवतारूपेण पूज्यरूपेण पश्येत्। एतदशनस्य नमस्कारादिना प्रणम्य वा ग्रहणं कुर्युः। 'अन्नं न निन्द्यात्' इति श्रुत्युक्तप्रकारेण न कदापि अशनार्हस्य अन्नस्य निन्दनं, कुत्सितं वा कुर्यात्। कुत्सितं गर्हितं वा अन्नं न कदापि खादेत्। सर्वदा अपि अन्नस्य दर्शनेन प्रियकरदर्शन इव सन्तोषं प्राप्नुयात्। सर्वकालेष्वपि अन्नस्य विषये निन्दामकृत्वा प्रसन्नमनाः भवेत्। एतादृशस्य पुरुषस्य अन्नं सर्वदा प्राप्तिः भवति। "अन्नं बहु कुर्वीत। तद्व्रतम्"[3] इति श्रुत्युक्तप्रकारेण सर्वेऽपि अदनस्य अन्नस्य स्तुतिपूर्वकं दानार्थमपि अन्नस्य सङ्ग्रहणं कर्तव्यम्।

➢ पूजितमशनं नित्यं बलमूर्जं च यच्छति। अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम्।[4]

---

1. मनुस्मृति - 2/52
2. मनुस्मृति - 2/54
3. तैत्तिरीयोपनिषत् - 2/9/1
4. मनुस्मृतिः-2/55

आरोग्येण जीवितुमिच्छता मनुष्येण आहार: सर्वदापि पूज्य: भवेत्। प्रसन्नमनसा पूजितमन्नं अस्मभ्यं शारीरं मनो बलं च प्रयच्छति। य: प्रसन्नमनसा पूजिताहारं स्वीकरोति तस्य अङ्गोपचय: जायते, स: महाकाय: महाबलश्च भवति।

**शोधपद्धतिः -**

अस्मिन् शोधपत्रे विमर्शात्मकरूपेण विचारा: प्रस्तुता: सन्ति। स्वास्थ्यपरिपालनम् अन्नेन भवति किन्तु कीदृशम् अन्नं स्वीकर्तव्यं कीदृशं वर्ज्यम् इत्यत्र माणवेभ्य: विवेक: अपेक्षित:। विवेकोत्पादनार्थं श्रुति-स्मृति-आयुर्वेदग्रन्थेभ्य: विचारा: प्रतिपादिता:। आधुनिके काले आहारस्य विषये आदर: न्यूनं दृश्यते यत: गृहीयाहारापेक्षया सिद्धाहाराणां विषये, उपाहारकेन्द्रत: साक्षात् खादने वा अभिरुचि: दरीदृश्यते। अत एव मया अत्र कश्चन प्रयत्न: विहित: वर्तते।

**परिणामाः-**

स्मृतिग्रन्थानाम् अध्ययनम् अधुनापि आवश्यकमेव। न केवलं संस्कृतछात्राणां वा साहित्यछात्राणां वा किन्तु समेषाम् इदमनिवार्यम्। यत: स्मृतिग्रन्थेषु अस्मिनपि युगे उपयुक्ता: बहव: विषया: सुस्पष्टं प्रतिपादिता: सन्ति। एतादृशलघु विचारं स्वीकृत्य प्रतिपादयामश्चेत् सर्वेऽपि स्मृतिग्रन्थपठने अभिरुचिं प्रदर्शयन्ति इति विश्वसिमि। आयुर्वेद: स्वास्थ्यरक्षणार्थमेव प्रवृत्तं शास्त्रम् अत: सर्वै: आयुर्वेदविषये अपि परमादर: प्रदर्शनीय: इति भावयामि।

**परिशीलितग्रन्थसूची-**

1. अनुवादक: चक्रकोडि ईश्वरशास्त्री, मनुस्मृति, समाज पुस्तकालय:, शिवाजिबीदि, धारवाड् 1969।
2. Pandit Girija Prasad Dvivedi, Manusmriti, Gomati tat, Lucknow 1917.
3. शास्त्री कपालि:, collected works of T.V. Kapali Shastri, दीप्ति-प्रकाशनालय:, पुदुच्चेरि, 1988।
4. उपाध्याय: बलदेव:, संस्कृतवाङ्मय का इतिहास, उत्तरप्रदेश संस्कृत संस्थानम्, लखनौ 2006।
5. वाग्भट:, English translation Dr. R. Vaidyanath, अष्टाङ्गहृदय, चौखाम्बा आयुर्वेद अध्ययनम्, वाराणासी, 2013।
6. वाग्भटाचार्य:, अष्टाङ्गहृदयम्, निर्णयसागर प्रेस्, बोम्बै, 1939।
7. याज्ञवल्क्य:, याज्ञवल्क्यस्मृति:, चौखम्बा संस्कृत् सीरीस्, वाराणासी, 1918।

✦✦✦

# त्रिविधं तपः

डॉ. जि. नरसिंहुलु*

**शोधसारः**

वेदान्तदर्शने उपनिषदः–ब्रह्मसूत्राणि–श्रीमद्भगवद्गीतेति प्रस्थानत्रयं प्रामुख्यं भजते। तत्र वेदेषु चरमभागत्वेन विद्यमाना आत्मतत्त्वप्रतिपादिका उपनिषदः वेदान्तशब्देनाभिधीयन्ते। तत्र उपनिषत्प्रतिपाद्यविषयेषु संशयनिवारणपुरस्सरं तत्त्वनिर्णयाय भगवान् बादरायणः ब्रह्मसूत्राणि रचयामास। तत्र च पुनः सुकोमलमतीनामपि औपनिषदात्मत्वावगमाय लोककल्याणकाङ्क्षिणा भगवता वासुदेवेन अर्जुनं निमित्तीकृत्य श्रीमद्भगवद्गीता समुपदिष्टा। एतद्ग्रन्थत्रयस्यापि भाष्यं विरच्य श्रीशङ्करभगवत्पादाः मानवसमाजस्य महदुपाकारमकार्षुः।

अत्र श्रीमद्भगवद्गीतायां मानवं माधवरूपेणाविष्कर्तुम् अनेके विषयाः समुद्बोधितास्सन्ति। तत्र च श्रद्धात्रयविभागयोगे सप्तदशाध्याये भगवान् श्रीकृष्णः **'यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु'** इत्युक्त्वा क्रमशः एकैकस्य भेदं विवृणोति। अत्रेदानीं शोधपत्रे तपसः त्रैविध्यं विचार्यते येन दैनन्दिनजीवने आत्मोन्नतये कीदृशं तप आचरणीयमिति ज्ञातुं शक्नुमः।

**प्रमुखशब्दाः**– आर्जवम्, अनुद्वेगकरम्, आत्मविनिग्रहः, तपः, दानम्, ब्रह्मनिष्ठम्, यज्ञः, विजिज्ञासस्व, विश्रुता, विशन्ति, सूयते, स्वाध्यायाभ्यसनम्, श्रोत्रियम्।

**आमुखम्**– त्रिविधं तपः इति शोधपत्रस्यास्य अध्ययनेन श्रीमद्भगवद्गीतायां भगवता वासुदेवेन प्रोक्तं त्रिविधं तपः सम्यक् ज्ञातुं शक्नुवन्ति। अस्मिन् पत्रे मया विविधेभ्यः ग्रन्थेभ्यः बहूनि उदाहरणानि स्वीकृत्य शाङ्करभाष्यादिकं प्रदर्श्य विषयविवरणं कृतम्। भगवद्गीतायां श्रद्धात्रयविभागस्यानुशीलनेन कथं मनुष्यः स्वगृहे स्थित्वा तपः आचरति इति ज्ञास्यामः। अत्रस्थान् विषयान् विशदतया शोधपद्धत्या समीक्ष्य सोदाहरणं समाजस्य छात्राणां वा पुरतः स्थापयामश्चेत् तर्हि महानुपयोगः भवतीति धिया मया लिखितम्।

**शोधपद्धतिः**– अस्य शोधपत्रस्य लेखने मया समीक्षात्मकपद्धतिः समाश्रिता विद्यते। अत्र भगवद्गीतायां श्रद्धात्रयविभागयोगे निरूपितान् विषयान् स्वीकृत्य

---

* सहायकाचार्यः, अद्वैतवेदान्तः, दर्शनविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपाल–परिसरः, मध्यप्रदेशः।

श्रीशाङ्करभाष्यदृष्ट्या समीक्ष्य सोदाहरणं सुभाषितादिश्लोकान् उद्धृत्य विषयविवेचनं कृतम्।

**परिणामः**– अस्य शोधपत्रस्याध्ययनेन छात्रेषु सामाजिकेषु च आध्यात्मिकदृष्टेः विकासः भवति। समीक्षात्मकशक्तेः विकासः भवति। अत्रस्थ विषयानां वारं वारं चिन्तनेन आत्मोन्नतिः भवति।

**प्रस्तावना**–

**'वेदो नित्यमधीयतां तदुदितं कर्मस्वनुष्ठीयताम्'** इति श्रीशङ्करभगवत्पादानां वचनात् प्रतिदिनं वेदाध्यनं वेदोक्तकर्मानुष्ठानं च कर्तव्यमिति अर्थो लभ्यते। वेदस्तु उदात्तानुदात्तस्वरितोपेतः भवतीति अस्याध्ययनं न सर्वजनसाध्यम्। तर्हि कथं भगवत्पादोक्तिः सार्थक्यं भजत इति चेत्, वेदोक्ताः विषया एषु ग्रन्थेषु प्रतिपादिताः तेषामध्यनेन तत्रोक्तानुष्ठानेन च तत्फलं सिध्यतीति प्रतिपादयन्ति पण्डिताः। अत एव लोके यथा श्रुतिः प्रसिद्धा तथैव श्रुतिमनुसरन्ती स्मृतिरपि प्रसिद्धा। एवं प्रसिद्धेषु स्मृतिग्रन्थेषु भगवतः वासुदेवस्य मुखारविन्दात् निःसृता महाभारतान्तर्गता सर्वजनोद्धारिणी श्रीमद्भगवद्गीता अन्यतमा अद्वितीया च वर्तते। उक्तं च–

**गीता सुगीता कर्तव्या किमन्यैच्छास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद्विनिःश्रुता।।** इति।

गीताभाष्येऽपि भगवत्पादैरुक्तं-' **'तदिदं गीताशास्त्रं समस्तवेदार्थसारसंग्रह-भूतम्'** इति। मानवजीवने श्रीमद्भगवद्गीताग्रन्थः कीदृशं स्थानमावहतीत्यत्र अस्माकं पूर्वजानां स्वामिविवेकानन्द-महात्मागान्धी-बालगंगाधरतिलक्-सर्वेपल्लिराधाकृष्णन्-विनोबाभावेप्रभृतीनां जीवनचरितान्येव प्रमाणम्। अनेनेदं सिद्धं भवति यत्– ये च नित्यं श्रीमद्भगवद्गीताध्ययनं कुर्वन्ति अनुशीलयन्त्यपि ते स्वजीवने अवश्यमेव साफल्यमवाप्स्यन्तीति।

श्रीमद्भगवद्गीतायां विद्यमानेषु अष्टादशाध्यायेषु प्रत्येकमपि अध्यायः मानवजीवनायापेक्षितान् नैकान् विषयान् विवेचयति। तत्र च श्रद्धात्रयविभागयोगे सप्तदशाध्याये भगवान् श्रीकृष्णः **'यज्ञस्तपस्तथा दानं तेषां भेदमिमं श्रृणु'** इत्युक्त्वा क्रमशः एकैकस्य भेदं विवृणोति। तत्रेदानीं तपसः त्रैविध्यं विचार्यते।

**विषयविवेचनम्**–

**शारीरं तपः**–

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते।।** भ.गी.17.14

देवेति। देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञास्तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवमृजुत्वं ब्रह्मचर्यमहिंसा च शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कार्यकरणैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते। पञ्चैते तस्य हेतव इति हि वक्ष्यति। इति भाष्यम्।

अत्र शारीरं तपः निर्दिशति। देवाः ब्रह्माविष्णुशिवसूर्याग्निदुर्गादयः, द्विजाः पूज्यत्वात् द्विजोत्तमाः, गुरवः पित्राचार्यादयः, प्राज्ञाः पण्डिताः विदितवेदितव्यास्तेषां पूजनं प्रणामशुश्रूषादि, शौचं मृज्जलाभ्यां शरीरशोधनम्, आर्जवमृजुत्वं विहितप्रतिषिद्धयो-रेकरूपप्रवृत्तिनिवृत्तिमत्त्वं, ब्रह्मचर्यं निषिद्धमैथुननिवृत्तिः, अहिंसा प्राणिनामपीडनम्। चकारादस्तेयापरिग्रहावपि ग्राह्यौ। शरीरनिर्वर्त्यं शारीरं शरीरप्रधानैः सर्वैरेव कर्त्रादिभिः साध्यं **शारीरं तप** उच्यते। **अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः॥** इति वक्ष्यमाणात्।

**देवद्विजगुरुप्राज्ञपूजनम्**- इहलोके नित्यमस्माभिः दैवाराधनं कर्तव्यम्। अनेन अस्माकं जीवने परमा शान्तिर्भवति। जगतः जन्मस्थितिलयकारणं ईश्वर इति श्रुतिस्मृतिषु उपदिश्यते। तद्यथा- **'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति तद्विजिज्ञासस्व तद्ब्रह्मेति'** (तैत्तरीयोपनिषत्-भृगुवल्ली)। **अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा** (भ.गी.7.6), **मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्** (भ.गी.9.10), **मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव** (भ.गी.7.7) इति च स्मृतिः। अतो शास्त्रगुरुवाक्येषु विश्वासं निधाय नित्यं भगवदाराधनं कर्तव्यम्। अत्र केचन यत्किंचित् साधितं चेत् अहंकारेण अहमेव कर्ता धर्ता इति मन्यन्ते। अन्ये केचन **ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति** (भ.गी.18.61) इति भगवद्वचनमाश्रित्य अहं निमित्तमात्रः, ईश्वर एव सर्वकर्मसु मम प्रेरकः, अपि च इन्द्रादिदेवतारूपेण विलसमान स एव। यथोक्तं भगवता **यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवम्॥** (भ.गी.10.41) इति तत्तद्देवताप्रसादसम्पादनेन भगवत्प्रीतिपात्रो भवाम्यहम् इति जानन्तः देवताराधनं कुर्वन्ति। अतः ईदृशं देवपूजनं तपः शब्देनोच्यते। द्विजपूजनम्- द्विवारं जन्म ये लभन्ते, ते द्विजाः। अर्थात् आदौ मातृगर्भात् अन्धकारं भित्वा बहिरायाति इति प्रथमं जन्म। ततः परं उपनयनादिसंस्कारद्वारा गुरुमुपसृत्य वेदशास्त्रादीनि सम्यगधीत्य तत्वज्ञानरूपसाधनेन अज्ञानरूपगर्भात् अन्धकारं छित्वा बहिरायाति इति तस्यैव द्वितीयं जन्म भवति। उक्तं च **ब्रह्मज्ञानेन ब्राह्मणः** इति। यथोक्ताः द्विजोत्तमाः, तेषां पूजनं तप उच्यते। गुरुपूजनम्- गुरूणां स्थानं सर्वोपरि इति भारतीयपरम्परा एव प्रमाणम्। अस्माकं प्रथमगुरुः माता भवति। अत एव उपनिषदि सर्वादौ मातृदेवो भव इत्युपदिष्टम्। ततःपरं पिता अस्मान् सन्मार्गे गमयतीति पितृदेवो भव इति, ततश्च

आचार्यः अस्मान् ज्ञानसम्पन्नान् करोतीति आचार्यदेवो भव इति च उदीरितम्। भारतीयसंस्कृतौ गुरोः महत्वं बहुधा कीर्तितं वर्तते यतोहि विना स्वार्थं गुरुः स्वज्ञानप्रसादेन ईश्वरदर्शनमपि कारयति। श्रीरामकृष्णपरमहंसः स्वज्ञानप्रसादेन स्वामिविवेकानन्दं आत्मज्ञानसम्पन्नमकरोदिति वयं ज्ञातुं प्रभवामः। यथोक्तं-

**यस्यदेवे परा भक्तिः यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥** इति।

(श्वेताश्वतरोपनिषत्. 6)

गुरुपदवाच्यः कः? तादृशगुरोः समीपं कथं गच्छेदित्यत्र उच्यते उपनिषदि **'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'** (मुण्डकोपनिषत्) इति। अपि च केषुचित् स्थानेषु यदाऽस्माभिः गम्यते, तदा रिक्तहस्तेन न गन्तव्यमिति नीतिशास्त्रमस्मानुपदिशति। तत्र गुरुस्थानमपि अन्यतमम्। तद्यथा-

**अग्निहोत्रं गृहं क्षेत्रं गर्भिणीं वृद्धबालकौ।**
**रिक्तहस्तेन नोपेयाद्राजानं दैवतं गुरुम्॥** इति। (सुभाषितसंग्रहः)

तथा च स्थान-अंग-भव-आत्मशुश्रूषादिभिः गुरुः सेवनीय इत्युच्यते। अतः साम्प्रतिककालेऽपि गुरुपूजनं सर्वैरपि अवश्यमेवानुष्ठेयम्। यथोक्तं गुर्वाराधनं तप इत्युच्यते। **शौचं** मृज्जलाभ्यां शरीरशोधनम्। **आर्जवं** ऋजुत्वं विहितनिषिद्धयोरेक-रूपप्रवृत्तिनिवृत्तित्त्वम्। अत्र विहितकर्मसु प्रवृत्तिः निषिद्धकर्मसु निवृत्तिश्च आर्जवमित्युच्यते। **ब्रह्मचर्यं** निषिद्धमैथुननिवृत्तिः। उक्तं च योगशास्त्रे ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभ इति। अन्यत्र च ब्रह्मचर्यपालनफलं कीर्तितं यथा-

**आयुस्तेजो बलं वीर्यं प्रज्ञा श्रीश्च महद्यशः।**
**पुण्यं च मत्प्रियत्वं च लभ्यते ब्रह्मचर्यया॥** इति।

**अहिंसा** प्राणिनामपीडनम्। श्रूयते च मा हिंस्यात् सर्वभूतानि, अहिंसा परमो धर्मः इति। श्लोके अहिंसा च इत्यत्र चकारेण अस्तेयापरिग्रहौ ग्राह्यौ इति मधुसूदनीव्याख्या। शारीरं शरीरप्रधानैः कर्त्रादिभिः साध्यं शारीरं तप उच्यते।

**वाङ्मयं तपः-**

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥** भ.गी.17.15

अनुद्वेगेति। अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं सत्यं प्रियहितं च यत्। प्रियहिते दृष्टादृष्टार्थे। अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशिष्यते। विशेषणधर्मसमुच्चयार्थः च शब्दः। परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानामन्यतमेन

द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि न तद्वाक्यं तपः। तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा विहीनतायां न वाङ्मयतपस्त्वम्। तथा प्रियवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा हीनस्य न वाङ्मयतपस्त्वम्। तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभिर्वा वियुक्तस्य न वाङ्मयतपस्त्वम्। किं पुनस्तत्तपो यत् सत्यं वाक्यमनुद्वेगकरं प्रियहितं च तत् परमं तपो वाङ्मयम्। यथा शान्तो भव वत्स स्वाध्यायं योगं चानुतिष्ठ! तथा ते श्रेयो भविष्यति। स्वाध्यायाभ्यसनं चैव यथाविधि **वाङ्मयं तप** उच्यते। इति भाष्यम्।

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्**- कस्याप्युद्वेगकरं दुःखजनकं न भवतीति तत् **सत्यं** प्रमाणमूलकमबाधितार्थं, **प्रियं** दृष्टार्थं उच्चारणकाले श्रोतुः श्रुतिसुखं, हितं परिणामे सुखकरं, चकारो विशेषणानां समुच्चयार्थः। अत्र भगवान् श्रीकृष्णः दैनन्दिनव्यवहारे उच्चार्यमाणं वाक्यं कथं भवेदिति उपदिशति। इह लोके सर्वोऽपि व्यवहारः वाग्व्यापारं विना न सिध्यति। प्रातरारभ्य रात्रिपर्यन्तं, जन्मारभ्य मरणपर्यन्तं बहूनि वाक्यानि वयम् उच्चारयामः। तदनुसारं च लोके प्रीत्यप्रीतिभाजः भवामः। अत्र अनुनित्यं सत्यादिभिर्युक्तं वाक्योच्चारणमेव वाचिकं तप इति भगवदुक्तिः। अनुद्वेगकरं वाक्यं कदाचिद्विदामश्चेद् नालम्। सततमुच्चरितं सत् तत् सत्यं तपश्शब्देनोच्यते। अतोऽस्माकं वदनात् सर्वदा सत्यपूर्णा सुसंस्कृता वाण्येव निस्सरेत्। सुसंस्कृता वाक् यस्य भवति, तदेव तस्य भूषणमिति भर्तृहरिः प्रतिपादयति। तद्यथा-

**केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्वला**
**न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम्॥ इति।**

(भर्तृहरिनीतिशतकम्)

समाजे नैके जनाः कामक्रोधादिभिराविष्टाः स्वाभीष्टसिध्यर्थं परेषां सुखदुःखादिकमविगणय्य यत्किञ्चिद्वदन्ति। अस्माकं वचस्स्वेव अमृतं विषं च निहितं वर्तते। अतः सुविचार्य वक्तव्यम्। उक्तं च भगवत्पादैः **'न तु वृथा वाक्यं समुच्चार्यताम्'** (साधनपञ्चकम्) इति। मयसभायां दुर्योधनं वीक्ष्य द्रौपद्योक्तानि परिहासवचांसि एव महाभारतयुद्धाय कारणमभवन्। वनवासकाले लक्ष्मणमुद्दिश्य जानक्योक्तानि निन्दावचनानि रामरावणयुद्धाय कारणमभवन्। सर्वदा लोकहिताय अस्माकं वचांसि भवेयुरिति सत्पुरुषाः वदन्ति। उच्चरितं प्रत्येकं वाक्यमस्माकं प्रवृत्तिं प्रकाशयति। यदुच्यते तत् अन्येषां दुःखप्रदं न स्यात्। अपि च तत् सत्यं भवेत्। दृष्टस्य श्रुतस्य अनुभूतस्य च विषयस्य यथावत् कथनं सत्यमित्यभिधीयते। सत्यमाश्रित्य हरिश्चन्द्रः स्वयशःकायेन चिरंजीवी जातः। सत्यमुक्त्वैव सत्यकामः

ब्रह्मविद्यायाम् अधिकारी जातः। प्रोक्तं च उपनिषत्सु **'सत्यं वद। सत्यमेव जयते'** इति। अपि चोक्तं- **'सत्यान्नास्ति परो धर्मो नानृतात् पातकं परम्'** इति। लौकिकविषयेषु यः सत्यं नानुसरति सः पारमार्थिकसत्यमनुभवितुम् नार्हति। अतः सत्यं वदेत्। अपि च तत् सत्यं प्रियं भवेत्। उच्चारणकाले श्रोतुः सुखकरं स्यात्। उक्तं च मनुस्मृतौ-

**सत्यं ब्रूयात्प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम्।**
**प्रियं च नानृतं ब्रूयादेष धर्मस्सनातनः॥** इति। (मनुस्मृतिः)

अन्येषाम् अप्रियवचनानि निन्दावचनानि परुषवचनानि नोक्तव्यानि। यतोहि अस्माकं वाग्व्यापारेणैव परिवारे समाजे च स्नेहो वा वैरो वा जायते। उक्तं च-

**न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः।**
**व्यवहारेणैव जायन्ते मित्राणि रिपवस्तथा॥** इति।

अत्र व्यवहारे अस्माकं कृत्यान्यपि अन्तर्भवन्ति। सर्वत्रऽस्माकं सम्बन्धं ज्ञापयितुं वाग्व्यापारः मुख्यभूमिकामावहतीत्यर्थः। अत एव वेदे शान्तिपाठे **'जिह्वा मे मधुमत्तमा'** मम जिह्वा मधुमती अतिशयेन मधुरभाषिणी भवत्विति प्रार्थना क्रियते। अन्यत्र च उक्तं-

**वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।**
**करणं परोपकरणं येषां केषां न ते वन्द्याः॥** इति।

अत्र श्लोके **'सुधामुचो वाचः'** इति सत्पुरुषाणाम् अन्यतमं लक्षणमिति कीर्तितं दृश्यते। मधुरभाषणेन सर्वेऽपि प्राणिनः तुष्यन्तीति प्रेरणास्पदोऽयं श्लोकः-

**प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।**
**तस्मात्तदेव वक्तव्यं वचने का दरिद्रता॥** इति।

अनेन इदमवगम्यते यत् उच्चरितं सत्यं प्रियमपि स्यादिति। अपि च तत् हितं परिणामकालेऽपि सुखकरं स्यात्। श्रोतुः प्रियं स्यादिति केवला स्तुतिः न स्यात्। अस्माकं वचांसि श्रोतुः हितकराणि पथप्रदर्शकानि प्रयोजनवन्ति स्युः। उक्तं च महाभारते **'यद्भूतहितमत्यन्तमेतत्सत्यं मतं मम'** इति नारदवचनम्। अपि च किरातार्जुनीये उक्तं **'हितं मनोहारि च दुर्लभं वचः'** इति। अनेनावबुध्यते यत् हितकरं वाक्यं मनोहारि च यद् भवति तादृशं दुर्लभं भवति। अत एव भगवता इत्थंभूतवाक्योच्चारणं तपश्शब्देन कीर्तितम्।

**स्वाध्ययाभ्यसनम्**- अत्र स्वाध्यायशब्देन मुख्यतया वेदाध्ययनं प्रोक्तम्। **'स्वाध्यायो अध्येतव्यः'** इति वेदोऽपि उपदिशति। तथा च स्वाध्यायशब्देन सद्ग्रन्थाध्ययनमपि स्वीक्रियते। विद्यार्थिनां स्वकक्ष्यासम्बद्धग्रन्थाध्ययनं, स्वविषयसम्बद्ध-

ग्रन्थाध्ययनमेव स्वाध्यायः भवति। अतः स्वाध्यायात् विरामः न स्यात्। उक्तं च तैत्तरीयोपनिषदि शिक्षावल्यां **'स्वाध्यायान्मा प्रमदः'** इति। नैकेषां कार्यसाधकानां पण्डितानां राष्ट्रभक्तानां त्यागधनानां च दिनचर्यायां स्वाध्यायाभ्यसनम् अवलोकयामः। यदि स्वध्यायाभ्यासः न क्रियते तर्हि विद्या विषतुल्या भविष्यतीत्युच्यते। तद्यथा **'अनभ्यासे विषं विद्या'** इति। अत एवोक्तं भगवता स्वाध्यायाभ्यसनमपि वाचिकं तपः भवतीति।

**मानसं तपः-**

> **मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।**
> **भावसंशुद्धिरित्येतत्तपो मानसमुच्यते।।** भ.गी.17.16

मन इति। मनःप्रसादो मनसः प्रशान्तिः स्वच्छतापादनं मनसः प्रसादः। सौम्यत्वं यत् सौमनस्यमाहुर्मुखादिप्रसादकार्यान्तःकरणस्य वृत्तिः, मौनं वाक्संयमोऽपि मनःसंयमपूर्वको भवतीति कार्येण कारणमुच्यते मनःसंयमो मौनमिति। आत्मविनिग्रहो मनो निरोधः सर्वतः सामान्यरूप आत्मविनिग्रहो वाग्विषयस्यैव मनसः संयमो मौनमिति विशेषः। भावसंशुद्धिः परैर्व्यवहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते। इति भाष्यम्।

सर्वेष्वपि तपस्सु मानसं तपः विशिष्यते। मनुजस्य शारीरकोपकरणेषु इन्द्रियेषु मनः मुख्यं स्थानमावहति। अतो सुसंस्कृतं मनः स्यात्। उक्तं च **'मन एव मनुष्यानां कारणं बन्धमोक्षयोः'** इति।

**मनःप्रसादः**- सर्वास्वपि परिस्थितिषु प्रशान्तचित्तो भवेत्। जीवः स्वात्मनि स्वान्तःकरणे प्रसन्नश्चेत् तस्मिन् ईश्वरोऽपि प्रसन्नः भवति। यदा मनसि विद्यमानाः रागद्वेषादयोऽपनीयन्ते तदैव सः जनः प्रसन्नः भवति। अत एव मनःप्रसादः तपःशब्देनाभिहितः। उक्तं च गीतायामेव भगवता **'आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते, प्रसादे सर्वदुःखानां हानिरस्योपजायते'** इति। मानवजीवने पुरुषार्थसिध्यर्थं मनःप्रसादः अत्यन्तमपेक्षितोऽस्ति।

**सौम्यत्वं**- सर्वलोकहितैषित्वम् अहिताचिन्तनं च। मनसि स्थितान् भावान् संकल्पांश्चाश्रित्य अस्माकं मुखलक्षणानि परिवर्तन्ते। मानसिकशान्तिरेव सौम्यतायाः चिह्नं भवति। एतद्विशिष्टस्य पुरुषस्य वदनं सर्वदा प्रसादसदनं भवति। रागादिवर्जितः सौम्यः सर्वदा लोकहितमाचरति। कदापि कथमपि परेषाम् अहितं न चिन्तयति।

**मौनं**- ननु मौनं वाङ्नियमनं वाङ्मये तपस्यन्तर्भवति तत्कथं मानसे तपसि व्यपदिश्यते तत्र वाचः संयमस्य कार्यत्वात्, मनःसंयमस्य कारणत्वात् कार्येण कारणग्रहणान्मानसे तपसि मौनमुक्तमित्याह- इति आनन्दगिरिटीका। समाहितमन

एव मौनमाचरितुं प्रभवति। मौनं मनसः परिपक्वतां सूचयतीत्यतः मानसं तप उच्यते। मननरूपं मौनमेवात्रग्राह्यम्। उक्तं च भगवत्पादैः अपरोक्षानुभूतौ **'गिरा मौनं तु बालानाम्'** इति। अपि च मौनविषये श्रीशङ्करभगवत्पादाः विवेकचूडामणिग्रन्थे प्रत्यपादयन् यत्–

**योगस्य प्रथमं द्वारं वाङ्निरोधोऽपरिग्रहः।**
**निरीहा च निराशा च नित्यमेकान्तशीलता।।** (विवेकचूडामणिः)

**नास्तिनिर्वासनान्मौनात्परं सुखकृदुत्तमम्।**
**विज्ञातात्मस्वरूपस्य स्वानन्दरसपायिनः।।** (विवेकचूडामणिः)

अपि च योगवाशिष्ठग्रन्थे वशिष्ठमहर्षिः श्रीराममुद्दिश्य उपदिशति यत्–

**सर्वमेव परित्यज्य महामौनी भवानघ।**
**निर्वाणवान्निर्मनसःक्षीणचित्तः प्रशान्तधीः।।** इति। (योगवासिष्ठः)

सुभाषितेष्वपि उच्यते– **मौनिनः कलहो नास्ति** इति। अतोऽस्माभिः मौनं शीलयितुं यत्नो विधेयः।

**आत्मविनिग्रहः**– सर्वेभ्यो विषयेभ्यो आत्मनः मनसः निग्रहः निरोधः। अन्यत्र च उक्तं श्रवणादिव्यतिरिक्तविषयेभ्यो मनसः निग्रहः शम इति। निगृहीतमनसः इन्द्रियाणि स्ववशे एव तिष्ठन्ति। ततश्च स्वलक्ष्यं साधयितुं समर्थो भवति साधकः। उक्तं च योगवाशिष्ठे–

**चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम्।**
**तस्मिन् क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः।।** इति।

(योगवासिष्ठः)

अत्रैव गीतायां षष्ठाध्याये भगवान् वासुदेवः मनोनिग्रह अतीवदुष्करं कार्यमित्युक्त्वा तत्रोपायं सूचयति तद्यथा–

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिवसुदुष्करम्।।** भ.गी. 6.34

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।** भ.गी. 6.35

**शनैः शनैरुपरमेद्बुध्या धृतिगृहीतया।**
**आत्मसंस्थं मनःकृत्वा न किञ्चिदपि चिन्तयेत्।।** भ.गी. 6.25

**यतो यतो निश्चरति मनःश्चञ्चलमस्थिरम्।**
**ततो ततो नियम्यैतदात्मन्येव वशं नयेत्।। इति।** भ.गी. 6.26

**भावसंशुद्धिः**- तपःशब्दवाच्यं पञ्चमं लक्षणं भवति भावसंशुद्धिरिति। भावस्य हृदयस्य शुद्धिः कामक्रोधलोभादिमलनिवृत्तिः पुनरशुद्ध्युत्पादराहित्येन सम्यक्त्वेन विशिष्टा सा भावसंशुद्धिः। सर्वदा निर्मलान्तःकरणेन सद्भावनया वर्तितव्यम्। विश्वोऽयम् अस्माकं भावमाश्रित्यैव प्रवर्तते। यदि भावः शुद्धः भवति तर्हि महत्कार्याणि साधयितुं शक्यन्ते। स्वामिविवेकानन्दादयः भावसंशुद्ध्या एव महत्तराणि कार्याणि कृत्वा समाजस्य आदर्शभूताः समभवन्। इत्येवं मानसं तप उच्यते।

**श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः।**
**अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते॥** भ.गी.17.17

श्रद्धया आस्तिक्यबुद्ध्या परया प्रकृष्टया तप्तम् अनुष्ठितं तपः तत् प्रकृतं त्रिविधं त्रिप्रकारम् नरैः अनुष्ठातृभिः अफलाकाङ्क्षिभिः फलाकाङ्क्षारहितैः युक्तैः समाहितैः यद् ईदृशं तपः तत् सात्त्विकं सत्त्वनिर्वृतं परिचक्षते कथयन्ति शिष्टाः।

इत्थं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां सप्तदशाध्याये श्रद्धात्रयविभागयोगे तपसः त्रैविध्यम् उपदिष्टम्। श्रद्धा-यज्ञ-दानानामपि त्रैविध्यं तत्रैव स्पष्टीकृतम्। एतदनु मानवकल्याणाय उद्दिष्टानि यज्ञदानतपःकर्माणि न त्याज्यानीति निर्दिशति भगवान् वासुदेवः। तद्यथा-

**यज्ञदानतपःकर्म न त्याज्यं कार्यमेवतत्।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥** इति। (भ.गी.18.05)

**सन्दर्भग्रन्थसूची-**


1. श्रीमद्भगवद्गीता-श्रीमच्छङ्करभाष्येण-आनन्दगिरिकृतव्याख्यायुजा संवलिता, इन्डोलाजिकन्-बुक्-हौस्, वाराणसी-1983. (नीलकण्ठी- भाष्योत्कर्षदीपिका-श्रीधरीयसुबोधिनी-अभिनवगुप्ताचार्यव्याख्या-श्रीमधुसूदनसरस्वतीस्वामिकृत-गूढार्थदीपिकाख्यव्याख्या सहिता)
2. श्रीमद्भगवद्गीतामृततरङ्गिणी (तेलुगु)- भगवान् श्रीसत्यानन्दमहर्षिः, श्रीसत्या-नन्दाश्रमः, इनमड्गु, नेल्लूरु, आ.प्रदेशः, 1994।
3. विवेकचूडामणिः, श्री अरविन्दानन्दयतिः, चौखम्बा विद्याभवन्, वाराणसी, 2015।
4. जनप्रियगीतोपन्यासमुलु (तृतीयभागः)- श्रीरामकृष्णानन्दस्वामिनः, गण्डिक्षेत्रम्, आन्ध्रप्रदेशः, 2008।
5. भर्तृहरिकृता- सुभाषितत्रिशती, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2013।


✦✦✦

# वैश्विकान्तरिकाशान्तये प्रज्ञापराधः

-डॉ. अमृताकौरः *

विश्वेऽस्मिन् विश्रृंखलता, मूल्यानां ह्रासः, नैतिकतायाः विनाशः, अनुशासनस्य हीनतेत्याद्याः व्याप्तसमस्याः मानसिकाशान्तेः कारणीभूताः। नागरिकाः तत्तद्देशीयान् प्राशासनिकनियमान् मौलिककर्त्तव्यानि च जानन्ति अन्यान् उपदिशन्ति तथापि स्वयं नानुपालयन्ति। एतादृशव्यवहाराः विश्वशान्तये आन्तरिकशान्तये च (Global and internal peace) बाधकतत्त्वानि भवन्ति। एतासां समस्यानां मूलकारणं वर्तते प्रज्ञापराधः। कोऽयं प्रज्ञापराधः इत्युक्ते चरकसंहितायां प्रोक्तं यत्-

**धीधृतिस्मृतिविभ्रष्टकर्म यत् कुरुतेऽशुभम्।**
**प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपणम्॥**[1]

अर्थात् प्रज्ञा नाम बुद्धिः अथवा ज्ञानम्। अपराधः इति ज्ञात्वाऽपि तत्कर्म कुरुते सः प्रज्ञापराधः भवति। सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृतिः तथैव वातपित्तकफानां साम्यावस्था आन्तरिकस्वस्थ्यस्य कारणीभूता स्यात्। धर्मार्थकामानां च साम्यावस्था प्रकृतेः विश्वस्य आत्मनः शान्तये प्रतीकभूताः भवन्ति। अतः मानसिक-अशान्तये मनोविकाराः प्रज्ञापराधजाः भवन्ति। प्रज्ञापराधेन ग्रस्ताः आन्तरिकाशान्तेः कारणतः विश्वस्य कृते संकटदायकाः जायेरन्। तस्मात् समुचितं कर्म ज्ञात्वा अपि अनुचिते कर्मणि बुद्धेः प्रवृत्तिः प्रज्ञापराध इत्युच्यते।

प्रज्ञापराधस्य अवगमनेन तद्दोषस्य नियन्त्रणेन दूरीकरणेन च प्रज्ञापराधव्यवहारस्य ह्रासः जायते। तेन आत्मनः शान्तिः, तद्द्वारा विश्वस्य शान्तिः सञ्जायते इति धिया शोधपत्रेऽस्मिन्प्राच्यपाश्चात्यशास्त्रपरम्परायां प्रज्ञापराधं शास्त्रकाराः कथं निरूपितवन्तः? शास्त्रसम्मतं कर्म कीदृशं स्यात्? वैश्विकान्तरिकशान्तये प्रज्ञापराधज्ञानं कथमुपकरोति इत्यादीनां विषयाणां विस्तृतं विवरणं सोदाहरणमस्मिन् शोधपत्रे निरूप्यते।

शान्तिं सर्वेऽपि इच्छन्ति परं तस्याः कृते यत् कर्म न कर्त्तव्यं तत् कर्म कुर्वन्ति। मनुष्याः ज्ञात्वा अपि अविवेकिनो भूत्वा अकर्तव्यं कर्म कुर्वन्ति तदा विश्वे शान्तिः कथं भवितुमर्हति। गीतायां उक्तमस्ति यथा-

---

* सहायकाचार्या (शिक्षाशास्त्रम्), केन्द्रीयसंस्कृतविश्वविद्यालयः, देहली।

1. चरक संहिता शरीर. 1/102

**तस्मात् शास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**[1]

विश्वस्य शान्तेः पूर्वम् आन्तरिकशान्तिः अपेक्ष्यते। यदा आन्तरिकशान्तिः भवति तदा विश्वस्य कृतेऽपि शान्तिस्थापनम् भवितुमर्हति। प्रज्ञापराधैः विश्वे आन्तरिके च शान्तेः स्थापनं न शक्यते। एतादृशाः व्यवहाराः वैश्विकान्तरिकाशान्तये बाधकाः भवन्ति यथा–

**उदीरणं गतिमतामुदीर्णानां च निग्रहः।**
**सेवनं साहसानां च नारीणां चातिसेवनम्॥**

**कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।**
**विनयाचारलोपश्च पूजानां चाभिवर्षणम्॥**

**ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।**
**परमौन्मादिकानां च प्रत्ययानां निषेवणम्॥**

**अकालादेशसञ्चारौ मैत्री सङ्क्लिष्टकर्मभिः।**
**इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य च वर्जनम्॥**

**ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः।**
**तज्जं वा कर्म यत् क्लिष्टं क्लिष्टं यद्देहकर्म च॥**

**यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम्।**
**प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्॥**[2]

प्राकृतिकावेगानां दमनं, अनुचितशक्तेः प्रदर्शनं, यौनकृत्येषु अतिलिप्तता, प्रशासकानां कार्यकालस्य अनुचितोपयोगः, अत्यधिकोपयोगः, उपचाराणां विगलितोपयोगः, अनुचितकाले कार्यकरणम्, शीलस्य उत्तमाचरणस्य हानिः, सम्मानितानाम् असम्मानम्, हानिप्रदवस्तुनाम् उपयोगे आनन्दः, मत्तकारणतः कर्त्तव्यनिर्वहणम्, चरित्रहीनव्यक्तिना सह मित्रता, सदाचरणे वर्णितानां स्वस्थगतिविधीनां त्यागः, द्वेषात् गर्वात् भयात् क्रोधात् लोभात् अज्ञानतायाः व्यसनात् भ्रमात् च उत्पन्नम् अनुचितकार्याणां कृते आश्रयप्रदानम्, रजोगुणात् तमोगुणात् उत्पन्नानि अनुचितकार्याणि इत्यादीनि सर्वाण्यपि प्रज्ञापराधस्य निर्माणं कुर्वन्ति।

**बुद्ध्या विषमविज्ञानं विषमं च प्रवर्तनम्।**
**प्रज्ञापराधं जानीयान्मनसो गोचरं हि तत्॥**[3]

---

1. श्रीमद्भगवद्गीता 16.24
2. चरकसंहिता – शारीरस्थानम् – 1.–103–108
3. चरकसंहिता – शारीरस्थानम् – 1.109

दुर्बलबुद्धिवशात् अनुचितरीत्या विषयाणाम् अवगमनम्, तस्य अनुचितज्ञानस्य अनुचितरीत्या क्रियान्वयनमपि प्रज्ञापराधं कथ्यते यत् मनसः इन्द्रियस्य च वस्तुभिः विषयैश्च अनुचितज्ञानसम्बद्धं स्थापयति।

- कर्मवादः - आयुर्वेदः -
- कीटाणुवादः - ऐलोपति
- ईर्ष्याशोकभयक्रोधमानद्वेषादयश्च ये।
- मनोविकाराप्याहुः सर्वे प्रज्ञापराधजा।।[1]
- स तु भवति दरिद्रो यस्य तृष्णा विशाला।
- प्रज्ञापराधात्सम्भूते व्याधी कर्मज आत्मनः।[2]

भगवतगीतायामपि उक्तमस्ति यत् चिन्तयतः शब्दादीन् विषयविशेषान् आलोचयतः पुरुषस्य आसक्तिः प्रीतिः तेषु विषयेषु उत्पद्यते। प्रीतेः तृष्णा समुत्पन्ना भवति। तृष्णायाः क्रोध उत्पद्यते।

चिन्तयतः शब्दादीन् विषयविशेषान् आलोचयतः पुरुषस्य आसक्तिः प्रीतिः तेषु विषयेषु उत्पद्यते। सङ्गात् प्रीतेः समुत्पद्यते कामः तृष्णा। कामात् कुतश्चित् प्रतिहतात् क्रोध अभिजायते।।

**ध्यायतो विषयान् पुंसः संगस्तेषूपजायते।**
**संगात् संजायते कामः कामात्क्रोधोभिजायते।।**[3]

ये प्रज्ञापराधं कुर्वन्ति तेषां शरीरं स्वस्थं न भवति अर्थात् रोगग्रस्ताः भवन्ति। चिकित्सकस्य पार्श्वे गत्वा अपि रोगस्य निदानं भवितुं नार्हति तदा चिकित्सकः उपदिशति यत् चिन्तनम् अधिकं मास्तु तेन रोगः वर्धते न तु क्षयते। विज्ञाने उक्तमस्ति यद् सर्वेऽपि रोगाः मस्तिष्केनोत्पन्नाः भवन्ति। यदि कोऽपि अयोग्यकर्म अशुभकर्म वा करोति तर्हि तस्य मस्तिष्के विकाराः उत्पद्यन्ते। वर्तमाने प्रज्ञापराधेन बहवः रोगा उत्पद्यन्ते यथा- मधुमेहः, रक्तचापः, पक्षाघातः इत्यादयशारीरिकरोगाः। तथैव मानसिकविकाराः यथा- Insomnia, Anxiety and Depression, Alzheimer's disease,, ADHD etc. अतः कर्म विचिन्त्य करणीयम् तेन मनसि च एतादृशाः मानसिकविकाराः नोत्पद्यन्ते। तथैव मानवस्य शरीरस्य कृते यत् खाद्यमस्ति तत् खाद्यम् उपयुक्तमनुपयुक्तमिति ज्ञात्वा भोक्तव्यम्। तेन शरीरे रोगाः न प्रविशन्ति। वात्त-पित्त-कफेत्यादीनां सन्तुलनेन शरीरः रोगमुक्तः भवति। वर्तमाने गोलकायजनाः

1. च.सू.स्था. 1.7.51-52
2. च. सू.स्था. 11
3. श्रीमद्भगवतगीता-2.62

कृशकायशरीरं पातुमिच्छन्ति। कृशकायशरीरस्य कृते ते ज्ञात्वा किमपि खादन्ति किमपि कुर्वन्ति। तेन शरीरे समस्या: उत्पद्यन्ते। अत: खादने वदने करणे ज्ञात्वा अपि अनुचितकर्मणि मा भवन्तु। प्रज्ञापराधेन विना मनुष्य उत्तमजीवनं यापयितुं शक्नोति।

**सन्दर्भग्रन्थाः-**


1. डॉ. रा. गायत्री, मुरलीकृष्णः, आचार्यः, के.सं.वि.वि., देहली, प्रज्ञापराधः - मूल्यशिक्षा, शोधपत्रप्रस्तुतीकरणम्।
2. Patil, Asmita., (2018). The Concept of Pragyaparadh with respect to the factor cause life style disorder. Volume(1), Page Numbers 112-114. https:/www.iamj.in
3. Jha, Srujan. Amarkosh online applicationhttps://play.google.com/store/apps/details?id=org.srujanjha.amarkosh-hl=en_IN&gl=US
4. Clark, D.A., Beck, A. T., &Alford, B.A. (1999). Scientific foundations of cognitive theory and therapy of depression. New York, NY, USA: Wiley
5. Deole YS, ThakarAB, Chandola H, Ravishankar B. Observational study on external social and lifestyle related factors and their role in pathogenesis of premature ageing and stress. AYU [serial online] 2012 [cited 2021 Mar 24]:33:378-86. Available from: https://www.ayujournal.org/text.asp?2012/33/3/378/108828.
6. Rnic K, Dozois DJ, Martin RA. Cognitive Distortions, Humor Styles, and Depression, Eur J Psychol. 2016:12(3):348-362. Published 2016Aug 19. doi:10.5964/ejop.v12i3.1118
7. Croskerry, Pat MD, PhD The Importance of Cognitive Errors in Diagnosis and Strategies to Minimize Them,Academic Medicine:August 2003 - Volume 78 - Issue 8 - p 775-780


✦✦✦

 ISSN : 0975-1769

# नैषधचरितालोके वैदिकदेवस्य स्वरूपम्

-टुम्पा जाना*

'विद्'- धातुना सह घञ्-प्रत्ययस्य (हलश्च) योगे वेदशब्दो निष्पन्नः। विद्-धातोः चतुर्विधः अर्थः-ज्ञानम्, सत्ता, लाभः विचारणम् च। अतः येन मनुष्याः जानन्ति, भवन्ति, प्राप्नुवन्ति, विचारयन्ति च स एव वेदः। दयानन्द-सरस्वती तस्मात् ऋग्वेदादिभाष्यभूमिकायाम् अवदत्-विद्ज्ञाने, विद्सत्तायाम्, विद्लृलाभे, विद्विचारणे एतेभ्यो हलश्चेति सूत्रेण करणाधिकरणयोर्घञ् प्रत्यये कृते वेदशब्दः साध्यते। विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दन्ति विन्दन्ते लभन्ते, विन्दते विचारयन्ति सर्वे मनुष्याः सर्वाः सत्यविद्या यैर्येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः'।[1] वेदं विना किमपि ज्ञानं न सम्पूर्णं भवति। अत्रैव सर्वज्ञानं निहितमस्ति। अतः वेदानां ज्ञानाहरणं कृतिषु तेषां च प्रभावः प्रायः सर्वेषां पण्डितानां संस्कृतकवीनां महाकवीनां च मध्ये दृश्यते। महाकविः श्रीहर्षो नापि एतेषु व्यतिक्रमः। तस्य ग्रन्थे तस्मात् वैदिकसाहित्यस्य अनुशीलनं दरीदृश्यते। विशेषतः वैदिकदेवस्य स्वरूपं वैशिष्ट्यं वा।तेषां वैशिष्ट्यानाम् उल्लेख एव एतस्य प्रबन्धस्य उद्देश्यः।

महाकाव्यपरम्परायां श्रीहर्षस्य 'नैषधचरितम्' स्यात् संस्कृतसाहित्यस्य अन्तिमं महत्वपूर्णं महाकाव्यम्। श्रीहर्षः अतीव विद्वान् आसीत्, यतः ग्रन्थेषु तस्य विविधशास्त्रस्य पारदर्शिता लक्षिता। तस्य लिखितेषु बहुग्रन्थेषु सर्वाधिकः श्रेष्ठः तथा लोकप्रियो ग्रन्थः 'नैषधचरितम्'। द्वाविंशसर्गेषु रचितस्य अस्य महाकाव्यस्य कथावस्तु महाभारतस्य वनपर्वस्य नलोपाख्यानम्। ग्रन्थोऽयं नल-दमयन्त्योः प्रेमकाहिन्या परिपूर्णोऽपि अत्र साहित्यस्य चमत्कारिता अतुलनीया। संस्कृतसाहित्यस्य तस्मात् प्रसिद्धा उक्तिः-

**तावद्भा भारवेर्भाति यावन्माघस्य नोदयः।**
**उदिते नैषधे काव्ये क्व माघः क्व च भारविः॥**

अस्मिन् महाकाव्ये न केवलं काव्यस्य रमणीयता, अपि च अस्ति सर्वेषां शास्त्राणां ज्ञानम्। श्रीहर्षेण सर्वेषां शास्त्राणां ये तावत् सिद्धान्ताः सन्ति, ते इतिवृत्तवर्णनच्छलेन ग्रन्थे समुपस्थिता, अर्थात् वेदवेदान्तन्यायादिदर्शनेषु राजनीतिशास्त्र-प्रभृतिषु च यानि तत्त्वानि वर्तन्ते, तानि तत्त्वानि अस्मिन् महाकाव्ये समुपस्थाप्यन्ते। एतस्मात् कारणात् नैषधचरितम् अवलम्ब्य श्रूयते- 'नैषधं विद्वदौषधम्' इति। अस्याः

---

* सह-अध्यापिका नाड़ाजोल-राज-कलेज (पश्चिमवङ्ग)

1. ऋग्वेदादिभाष्यभूमिका, युधिष्ठिर-मीमांसकः, पृ-23

उक्तेः तात्पर्यं केवलं नैषधचरिते विद्यावताम् एव अवगम्यते।विदुषां मनसि यत् किञ्चित् अज्ञानजनितं मालिन्यं वर्तते, तस्य मालिन्यस्य अपनोदनं नैषधचरितस्य पाठादेव भवति, यतः श्रीहर्षेण सर्वशास्त्रीयचिन्तानां दर्शनतत्त्वानां च समुपस्थापनं नैषधचरिते कृतम्। नैषधचरितस्य प्रतिपादितः अर्थः तस्मात् सहजेन न उपलब्धः। स्वयमेव श्रीहर्षेण अङ्गीकृतं यत् साधारणमतिनां दुर्मेधसां वा यथा ग्रन्थेऽस्मिन् सहजेन प्रवेशो न स्यात्, एतदर्थं स्वेच्छया ग्रन्थग्रन्थिं केषुचित् स्थलेषु लिखितम्-

**ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया।**
**प्राज्ञन्मन्यमनाः हठेन पठिती मास्मिन् खलः खेलतु॥**[1]

श्रीहर्षस्य अनेन वचनेन स्पष्टं यत् काव्येऽस्मिन् विविधशास्त्रस्य उपस्थापनं तेन कृतम्। येषु वेदशास्त्रम् अन्यतमम्।

वेदशास्त्रस्य प्रधानो विषयो देवता। प्रत्येकं वैदिकमन्त्रे अस्ति एका अधिष्ठात्री देवता। मन्त्रैः तासां प्रशंसा तथा आवाहणं कृतं मन्त्रद्रष्टृभिः ऋषिभिः। एतासां देवानाम् उत्पत्तिः कदा कथम् अभवत् अस्मिन् विषये स्थितं प्रमाणम् असम्भवम् एव। यतः बहुप्राचीनजनजातिः कालस्य करालग्रासे ग्रस्ता। तेषां संस्कृतिरपि ताभिः सह विलुप्ता जाता। येषां प्राचीनजनजातीनां सामान्यपरिचयः प्राप्यते, तेषाम् अनुशीलनेन ज्ञायते यत् ते जीवनधारणस्य प्रधानं कारणं तथा संस्कृतिं देवतारुपेण पूजन्ति स्म। अस्मिन् विषये प्रमाणमेकं भवति प्राचीनरोमस्य कर्मकाण्डयुक्तम् 'इन्दिगितामेन्ता' इति पुस्तकम्। ग्रन्थोऽयं यद्यपि अधुना न प्राप्यते, तथापि 'एनसाइक्लोपीडिया अफ रिलिजन एन्ड इथिक्स' इति ग्रन्थे अस्य उल्लेखः अस्ति। तत्रोक्तं प्राचीनरोमवासिनां स्तुतयः देवताः तेषां संस्कृत्या तथा जीविकया सह सम्पर्कयुक्ताः। तदानीन्तनकाले तेषां जातीनां प्रधाना जीविका स्यात् कृषिकार्यम्। अतः कृषिकार्येण सह संयुक्ताः देवताः तत्रैव दृश्यन्ते। यथा- 'सातुर्नसः' बीजवपनस्य सीरीसः च शस्यानां वृद्धिकारकः देवः आसीत्। तत्र न केवलं देवस्य, अपि च देव्याः उल्लेखः अस्ति। 'फ्लोरा' इति देवी स्यात् पुष्पस्य अधिष्ठात्री देवता।[2]

वैदिकधर्मेऽपि एषा प्रवृत्तिः अर्थात् जीवनयापनेन सह सम्पर्कयुक्ता देवता प्राप्यते। वेदे वर्णिता प्रायः प्रत्येकं देवता एकैकस्य पार्थिवपदार्थस्य अधिष्ठातृदेवता। यथा-पार्थिवस्य अग्नेः अधिष्ठाता देवता अग्निः, सूर्यस्य देवता सूर्यः सविता वा आदित्यदेवः वा, झञ्झावातस्य देवता मरुत्, जलस्य देवता वरुणदेवः इति। वस्तुतः सूर्यः द्युलोकस्य, वायुः इन्द्रः वा अन्तरिक्षलोकस्य एवञ्च अग्निः पार्थिवलोकस्य उपद्रवात् पृथिवीं रक्षन्ति इति मन्यन्ते ऋषयः। यास्काचार्येण तस्मात् उक्तम्-'तिस्रः

1. नैषधचरितम्, 22/152
2. वैदिक देवता : उद्भव और विकाश, प्रथमखण्डम्, पृ.-5

एव देवता इति नैरुक्ताः। अग्निः पृथ्वीस्थानः। वायुर्वेन्द्रो वान्तरिक्षस्थानः। सूर्यो द्युस्थानः। तासां महाभागात् एकैकस्या अपि बहूनि नामधेयानि भवन्ति अपि ता कर्मपृथकत्वात्। यथा होताध्वर्युब्रह्मोद्गातेत्यप्येकस्य सतः'।[1] यद्यपि निरुक्तकारः यास्काचार्यः अन्यत्र अवदत् सर्वस्याः देवतायाः मूलं स्यात् अग्निदेवता। ऐतरेयब्राह्मणे (1/1) तथा तैत्तिरीयब्राह्मणे (3/2/1/10) अपि तुल्यं वचनं दृश्यते-'अग्निर्वै सर्वा देवताः'। बहुत्र उल्लिखितं यत् आत्मा एव देवता। यथा-'आत्मा देवता'[2] इति। विविधाः देवताः स्यात् तस्य अङ्गानि- 'महाभाग्याद् देवताया एक आत्मा बहुधा स्तूयन्ते। एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति'।[3] ऋग्वेदसंहितायामपि एवं वाक्यं दृश्यते- 'एकैव वा महानात्मा देवता, स हि सर्वभूतात्मा। तद्विभूतायान्या देवताः'।[4] अतः देवताभिः सह सम्बन्धयुक्ते प्रत्येकं पदार्थे आत्मा एव उपस्थितः। आत्मा हि देवानां सर्वम् एव। स एकमात्रं सत्। यस्य वर्णना ऋषिणा बहुधा कृता- 'एकं सद्विप्रा बहुधा वदन्ति',[5] एकं सन्तं बहुधा कल्पयन्ति।[6]

वैदिकदेवानां स्वरुपं तथा वैशिष्ट्यं विविधम्। नैषधचरितेऽपि वैदिकदेवतानां कानिचित् वैशिष्ट्यानि श्रीहर्षेण प्रतिपादितानि। तानि एव वैशिष्ट्यानि अत्र आलोचितानि।

देवाः यज्ञै सन्तुष्टाः भवन्ति यज्ञकारिणां च अभीष्टं पूरयन्ति। श्रीहर्षेण तस्मात् प्रोक्तं यत् नलस्य यज्ञेन सन्तुष्टाः देवताः तस्य राज्ये स्वर्गीयभोग्यवस्तूनि असृजन्-

**इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि जजन्त्यमर्त्याः।**
**महीरुहो दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति।।**[7] (3/21)

अन्यत्र तेन उदितं देवताः नलस्य यज्ञेषु तृप्यन्ति- 'गिरापि वक्ष्यन्ति मुखेषु तर्पणादिदं न देवा मुखलज्जयैव ते'।[8] मल्लिनाथेन अस्य व्याख्यायां जीवातुटीकायाम् उल्लिखितं यत्- 'मुखेषु तर्पणात् प्रीणनात् देवाः'। चतुर्दशसर्गे कविना कथितं यत् कदाचित् देवाः प्रत्यक्षरुपेण उपस्थिताः भूत्वा यज्ञस्य आहुतिद्रव्यानि स्वीकुर्वन्ति।

---

1. निरुक्तम्, 5/2
2. तै.स. 2/5/11/7
3. निरुक्तम्, 7/4
4. ऋक्, 2/14,16,18
5. ऋक्, 1/164/46
6. ऋक्, 10/114/5
7. नैषधचरितम्, 3/21
8. नैषधचरितम्, 3/153

अतः इन्द्रदेवः नलाय वरदानकाले आह- अहं प्रत्यक्षरूपे उपस्थाय तव यज्ञस्य आहुतिद्रव्यं उपभोक्ष्ये-

**प्रत्यक्षलक्षामवलम्ब्य मूर्तिं हुतानि यज्ञेषु तवोपभोक्ष्ये।**
**संशेरतेस्माभिरवीक्ष्य भुक्तं मखं हि मन्त्राधिकदेवभावे।।**[1]

मल्लिनाथेन तस्मात् तस्य टीकायां भणितं- 'हे नल! तव यज्ञेषु प्रत्यक्षेण लक्ष्यां दृश्यां, मूर्तिं विग्रहम् अवलम्ब्य हुतानि हवींषि, उपभोग्ये अनुभोक्षे'। वस्तुतः देवाः अग्निमाध्यमेन यज्ञस्य हविर्भागं स्वीकुर्वन्ति। येन कारणेन अग्निः 'देवतानां मुखम्' इत्यनेन विभूषितः- 'अग्निर्वै देवानां मुखम्'।[2] अतः प्रत्येकं यज्ञस्य मूलोद्देश्यं भवति आहुतिद्रव्येन देवानां सन्तुष्टिविधानं तेभ्यश्च अभीष्टफललाभम्।

वैदिकदेवस्य अन्यदेकं स्वरूपं स्यात् स्तुत्या देवानामाराधनम्। येन कारणेन वेदे सूक्तस्य आविर्भावः। सु उक्तम्=सूक्तम्। शोभनं सुन्दरं वा वचनम् एव सूक्तम्। वेदस्य मन्त्रभागाः सूक्तैः परिपूर्णाः। प्राचीनार्यजातयः प्राकृतिकशक्तेः स्वेषां रक्षणार्थं ता देवता इति मत्वा शोभनेन वचनेन स्तुतिम् अकुर्वन्। अतः वेदे सूक्तैः देवानाम् अर्चना विहिता। वस्तुतः प्रत्येकं सूक्ते एकाधिकाः मन्त्राः दृश्यन्ते। यास्काचार्येण तस्मात् भणितं निरुक्तग्रन्थे- 'यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति'।[3] अतः प्रतिपाद्यते यत् स्तोता सूक्तैः देवतानां सन्तुष्टिं विधायते। नैषधचरितेऽपि उक्तं वेदस्य कार्यं भवति देवानां गुणकीर्तनम्- 'श्रुतिः सुराणां गुणगायणी'।[4] अस्मिन्नेव महाकाव्ये दृश्यते दमयन्ती नलरूपधारिषु इन्द्रादिदेवेषु प्रकृतं नलं चिह्नितार्थम् इन्द्रादिदेवानां स्तुतिम् करोति-

**वैशद्यहृद्यैभ्रादिमाभिरामैरामोदिभिस्तानथ जातिजातैः।**
**आनर्च गीत्यन्वितषट्पदैः सा स्तवप्रसूनस्तवकैर्नवीनैः।।**[5]

पश्चात् दृष्टं यत् दमयन्त्याः एतेन श्रुतिवचनेन देवताः सन्तुष्टाः जाताः- 'भक्त्या तयैव प्रससाद तस्यास्तुष्टं स्वयं देवचतुष्टयं तत्'।[6] ते देवाः न केवलं सन्तुष्टाः, अपि तु दमयन्त्याः अभीष्टमपि पूरयन्ति। अर्थात् दमयन्ती इन्द्रादिचतुष्टय-देवतासु नलं पृथकीकृत्वा स्वयंवरसभायां तस्मै वरमाल्यम् अददत्। तया एतदपि घोषितं यत् इन्द्रादिदेवानाम् अनुग्रहं विना सा नलं पतिरूपेण न प्राप्नोति-

---

1. नैषधचरितम्, 14/70
2. ऐ.ब्रा. 7/16
3. निरुक्तम्, 7/1/1
4. नैषधचरितम्, 9/148
5. नैषधचरितम्, 14/6
6. There are no sources in the current document. नैषधचरितम्, 14/8

**चिह्नैरमीभिर्नलसंविदस्याः संवादमाप प्रथमोपजाता।**
**सा लक्षणव्यक्तिभिरेव देवप्रसादमासादितमप्यबोधि।।**[1]

अतः निःसन्देहेन वक्तुं शक्यते यत् वैदिकाः देवाः स्तुत्या तथा सूक्तेन सन्तुष्टाः भवन्ति। येन कारणेन वेदे देवान् उद्दिश्य सूक्ताः विहिताः।

देवाः भवन्ति प्रभूतसम्पदः अधिष्ठातारः। तस्मात् कारणात् यज्ञैः सन्तुष्टाः भूत्वा देवाः नलस्य राज्ये स्वर्गीयभोगसामग्रीकरूपां सम्पदम् असृजन्–

**इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः।**
**महीरुहो दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति।।**[2]

पञ्चमसर्गे दृश्यते देवराजः इन्द्रः तस्य अर्जितां सम्पदं सत्पात्रेषु दानार्थम् उद्ग्रीवम् आसीत्। एतत् वचनं तेन नारदस्य समीपे प्रकाशितं कृतम्–

**पूर्वपुण्यविभववायलब्धा सम्पदो विपद् एव विसृष्टाः।**
**पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः।।**[3]

देवाः प्रभूतसम्पदः अधिष्ठातारः– एतस्य वचनस्य पुष्टिः देवशब्दस्य व्युत्पत्तिमध्ये अस्ति। आचार्यः यास्कः देवशब्दस्य निर्वचनप्रसङ्गे अवदत्– 'देवो दानाद्वा'।[4] अर्थात् यो दानं करोति स देवः। एतेन प्रतिपाद्यते यत् देवान् निकषा सर्वप्रकारं धनमस्ति। येन कारणेन दानेषु समर्थाः भवन्ति। दानशब्दः ऐश्वर्यस्य वाचकः– 'दानाद्वा ददात्यसौ वैश्वर्याणि'। निरुक्तवृत्यनुसारं देवता जीवान् प्रति ऐश्वर्यं प्रदायति। ऐश्वर्यस्य अर्थः धनम्। पुनः धनस्य एका संज्ञा वसुरपि। तस्मात् अष्टवसवः धनानां धारकाः। बृहदारण्यकोपनिषदनुसारं अष्टवसवः यथा–अग्निः, पृथिवी, वायु, अन्तरिक्षम्, आदित्यः, द्यौः, चन्द्रमा नक्षत्रं च–[5] 'अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि च, एते वसवः। इमे अष्टवसवः संसारस्य सर्वं वस्तु धारयन्ति–वसवो यद् विवसते सर्वम्'।[6] संसारं निवासयोग्यं कुर्वन्ति– 'इदं सर्वं जगत् वासयन्ते निवासात्मकं कुर्वन्ति'।[7] एतेषु अष्टवसुषु संसारस्य सर्वं हितमस्ति, अतः ते वसवः– 'एतेषु हीदं सर्वं वसु हितमिति तस्मात् वसवः'।[8] अतः प्रतिपाद्यते

1. नैषधचरितम्, 14/24
2. नैषधचरितम्, 3/21
3. नैषधचरितम्, 5/13
4. निरुक्तम्, 7/4/15
5. वृहदारण्यकोपनिषद, 3/9/3
6. निरुक्तम्, 12/4/41
7. हरिस्वामी, श.ब्रा. 11/6/3/6
8. बृ.उ. 3/9/3

यत् अष्टवसवः धनानां धारकाः। येन कारणेन तान् निकषा धनप्राप्त्यर्थं स्तोतुः प्रार्थना दृश्यते– 'अस्मे धत्त वसवो वसूनि'।[1] श्रीमद्भागवतानुसारं धनकामी जनः वसूनां प्रार्थनां करोति– 'वसुकामो वसून्'।[2] पुनः अष्टवसुषु अग्निः अन्यतमः। ऋग्वेदे अस्य अग्नेः स्तुतिः 'रत्नधातमम्' इत्यनेन प्राप्यते'।[3] 'रत्नधातमम्' इत्यस्य अर्थः प्रभूतरत्नस्य धारकः। सायणाचार्येण तस्मात् अस्य भाष्ये कथितम्– 'रत्नधातमं यागस्वरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा'। अग्निदेवतावत् अन्याः देवताः अपि सम्पदः धारकाः, यतः अग्निः सर्वेषां देवानां मूलस्वरूपम्– 'अग्निर्वै सर्वा देवताः'।

विश्वस्य सर्ववृत्तान्तम् अवगताः स्युः वैदिकदेवताः। तासु विश्वस्य सर्ववस्तोः ज्ञानं वर्तते। नैषधचरिते तस्मात् पठितम्–

**तदखिलमिह भूतं भूतगत्या जगत्याः**
**परिरभिलपति स्म स्वात्मदूत्वतत्त्वम्।**
**त्रिभुवनजनमाद्वृत्तान्तसाक्षात् कृतिकृतिषु**
**निरस्तानन्दमिद्रादिषु द्राक्।।**[4]

श्लोकेऽस्मिन् नलः आह इन्द्रादयः देवाः त्रिभुवनस्य सर्ववृत्तान्तमवधारणे समर्थाः, अर्थात् ते सर्वज्ञाः। नारायणेन तस्य टीकायां तस्मात् कथितम्– 'इन्द्रादिषु त्रिभुवे जनानां यावन्वृत्तौ निष्पन्नो वृत्तान्तः समाचारस्तस्य साक्षात्कृतौ प्रत्यक्षीकरणे कृतिषु कुशलेषु'। अन्येषु सर्गेषु अपि एतस्य वचनस्य पुनरावृत्तिः दृश्यते। सप्तदशसर्गे स्पष्टमुक्तम्– 'वेदश्चेदस्ति सर्वज्ञः'।[5] नवमसर्गे दमयन्ती अब्रवीत् स्वप्नावस्थायामपि सा अन्यपुरुषस्य चिन्ता नाकरोत्, एतस्य एकमात्रं प्रमाणं देवः एव।[6] दमयन्त्याः अनेन वचनेन स्पष्टं यत् देवताः सर्वज्ञाः। पञ्चमसर्गेऽपि देवानां सर्वदर्शित्वं स्वीकृतम्।[7] अस्मिन्नेव सर्गे अन्यत्र उक्तं देवाः मनुष्यानां सर्वाः कामनाः ज्ञातुं समर्थाः,[8] सर्वमेव वस्तु प्रत्यक्षे ते योग्याः।[9] एकोनविंशतिसर्गे महेश्वरस्य सर्वविदित्वरूपं

---

1. यजु. 8/18
2. श्रीमद्भागवत, 2/3/3
3. ऋग्वेद, 1/1/1
4. नैषधचरितम्, 9/159
5. नैषधचरितम्, 17/77
6. नैषधचरितम्, 9/32
7. नैषधचरितम्, 5/101
8. नैषधचरितम्, 5/105
9. नैषधचरितम्, 5/106

गुणम् उल्लिखितम्– 'त्वय्यशेषविदि जाग्रति सर्वविद् ब्रवतया शितिकण्ठः'।[1] अस्य श्लोकस्य व्याख्यायां मल्लिनाथेन जीवातुटीकायां प्रोक्तम्– 'ब्रह्मामहेशाभ्यामपि सकाशात्वमेव परमपुरुषः सर्वज्ञः इति भावः'। वेदेऽपि देवानां सर्वज्ञत्वं सिद्धम्। ऋग्वेदस्य अग्निसूक्ते अग्निदेवप्रसङ्गे 'कविक्रतुः' अर्थात् सर्वज्ञः इति विशेषणं प्रयुक्तम्–

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः देवो देवेभिरागमत॥**[2]

अस्य मन्त्रस्य 'कविक्रतुः' इत्यस्य व्याख्यायां स्वामी दयानन्द सरस्वती अवदत्– 'सर्वज्ञः क्रान्तदर्शनो वा'। यास्काचार्येण उक्तम्– 'सर्वाणि प्रज्ञानानि प्रतिमुञ्चते। मेधावी कविः क्रान्तदर्शनो भवति'।[3] अन्यत्रापि अग्नेः सर्वज्ञत्वस्य परिचयः प्राप्यते– 'विश्वं स वेद'।[4] शतपथब्राह्मणे देवानां सर्वज्ञता प्रदर्शिता।[5]

श्रीहर्षेण सप्तदशसर्गे कथितं यत् देवता सत्यवाक्– 'अबन्धवाक्। अस्य पदस्य मल्लिनाथकृते व्याख्या यथा– 'अबन्ध्यवाक् अमोघवचनः, वेदरूपसत्यवचने इत्यर्थः। अन्यत्र अर्थात् द्वितीयसर्गे सत्यवादिना बृहस्पतिना सह नलस्य तुलना दृश्यते– 'इति तं स विसृज्य धैर्यवान्नृपतिः सुनृतवाग् बृहस्पतिः'।[6] सत्यवाक् इत्येवं वैशिष्ट्यं वैदिकदेवानां क्षेत्रेपि प्रयुक्तम्। यथा शतपथब्राह्मणे उक्तम्– 'सत्यं वै देवाः, अनृतं मनुष्याः' अर्थात् देवताः सत्यरूपाः, मनुष्याः च असत्यरूपाः'।[7] अस्मिन्नेव ब्राह्मणे अन्यत्रापि प्राप्तं यत् प्रथमं तावत् देवताः सत्यमयाः असत्यमयाश्च आसन्, पश्चात् असत्यं परित्यज्य केवलं सत्यमाश्रितवन्तः'।[8] ऋग्वेदस्य प्रथममण्डले मधुच्छन्दा ऋषिः अग्निदेवाय 'सत्यम्' इति विशेषणं प्रयुक्तवान्–

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः देवो देवेभिरागमत'॥**[9]

बृहद्देवताग्रन्थे उक्तं यत् ब्रह्म सत्यम् एव–ब्रह्म वाक् ब्रह्म सत्यं च ब्रह्म सर्वमिदं जगत्'।[10] अतः वैदिकदेवाः सत्यवादिनः।

---

1. नैषधचरितम्, 21/90
2. ऋग्वेद, 1/1/5
3. निरुक्तम्, 12/13
4. ऋक्, 10/11/1
5. शतपथब्राह्मण, 3/4/2/6-7
6. नैषधचरितम्, 2/63
7. शतपथब्राह्मण, 1/1/1/4
8. शतपथब्राह्मण, 6/4/1/12-16
9. ऋग्वेद, 1/1/5
10. वृहद्देवता, 2/40

देवाः अनिमेषदृष्टयः। देवानाम् अस्य वैशिष्ट्यस्य उल्लेखः नैषधकारेण कृतः स्वग्रन्थे–

**अस्वेदगात्राचलश्चामरौघैरमीलनेत्राः प्रतिवस्तुचित्रैः।**
**अम्लानमाला विपुलातपत्रैर्देवा नृदेवाश्च भिदां न भेजुः॥**[1]

श्लोकेस्मिन् 'अमीलनेत्राः' इत्यस्य अर्थः अनिमेषदृष्टयः। तस्मात् मल्लिनाथेन प्रोक्तम्– 'अमीलानि अनिमिषाणि, यद्वा न मीलन्तीत्यमीलानि पश्चाद्यश्च। तानि नेत्राणि येषां ते तथोक्ताः अनिमिषदृष्टयः इत्यर्थः'। अन्यत्र महाकाव्यकारेण इन्द्रदेवप्रसङ्गे भणितं तस्य अर्थात् देवराजस्य इन्द्रस्य सहस्राणि चक्षूंषि अनिमिषाणि–

**इत्युदीर्घ मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण।**
**चक्षुषां दशशतीमनिमेषां तस्तिवान् मुनिमुखे प्रणिधाय॥**[2]

चतुर्दशसर्गे दृश्यते नलरूपधारिषु इन्द्रादिदेवेषु नलं चिह्नितं कृतवती दमयन्ती 'देवानां नेत्राणि अनिमिषाणि' इति वैशिष्ट्येन। यतः सा जानाति यत् देवानां नेत्राणि अनिमिषाणि नलस्य च नेत्रौ अनिमिषौ पलकयुक्तौ वा।[3] एतत् वैशिष्ट्यं वैदिकदेवानां क्षेत्रेपि प्रयुक्तं स्यात्। शतपथब्राह्मणे तस्मात् प्राप्यते यत् देवताः कदापि शयनं न कुर्वन्ति– 'न वै देवाः स्वपन्ति'।[4] अन्यत्र कथ्यते देवानां चक्षुषः कदापि अश्रुः न आयातः।[5] एतेन अवगम्यते यत् निद्रा तथा अश्रुविमोचनं पलकविहीनस्य चक्षुषः क्षेत्रे एव प्रयोज्यम्। गोभिलगृह्यसूत्रे प्राप्यते देवाः पलकविहीनाः, ते सदा मनुष्याणां कर्मणः अनुशीलनं कुर्वन्ति।[6] मित्रदेवप्रसङ्गे वैदिकसाहित्ये उल्लेखः अस्ति यत् स अनिमिषदृष्ट्या मनुष्याणां कर्म पश्यति– 'मित्रः कृष्टीरनिमिषाभिचष्टे'।[7]

वैदिकदेवाः अमृताः अमराः वा। 'स्वाहा देवा अमृता मादयन्ताम्',[8] 'देवाम् अमृतान् पिप्रियं च'[9], 'यत्र देवा अमृतमानशानाः'।[10] एवम् प्रकारेण वैदिकसाहित्ये देवानां अमरत्वं सिद्धम्। शतपथब्राह्मणे उल्लेखमस्ति यत् प्रथमं तावत् देवाः अमराः

---

1. नैषधचरितम्, 10/33
2. नैषधचरितम्, 5/19
3. नैषधचरितम्, 14/19
4. शतपथब्राह्मण, 3/2/2/22
5. मै.स. 2/1/10, ऐ.ब्रा. 5/1/2
6. गोभिलगृह्यसूत्र, 4/6/16
7. ऋक्. 3/53/1
8. ऋक्. 3/4/11
9. ऋक्. 7/17/4
10. यजुः. 32/10

नास्ति, पश्चात् ते केनचित् यज्ञेन अमरतां प्राप्नोति।[1] शतपथब्राह्मणस्य काहिनी एका प्राप्यते, यत्र उक्तं यत्– देव: असुरश्च उभयौ प्रजापते: अपत्यौ। उभयौ सर्वदा युद्धे लिप्तौ स्यात्। तौ मरणशीलत्वात् मृत्युं लभेते। देवेषु केवलम् अग्नि: अमर्त्य: आसीत्। अनन्तरं देवा: असुराणां पराजितं कर्तुम् अमृतस्वरूपां अग्न्याधेयं पश्यन्ति स्म। तदा ते इदम् अमृतम् अन्तरात्मनि धारयित्वा अमरा अभवन्।[2] वैदिकसाहित्यस्य कुत्रापि आप्यते यत् सविताग्न्यादिभ्य: देवेभ्य: अन्ये देवा: अमृतत्वं लभन्ते। यथा– 'त्वां विश्वे अमृतं जायमानं शिशुं न देवा अभिसंनवन्ते (अग्नि:),[3] देवेभ्यो हि प्रथमं यज्ञियेभ्योमृतत्वं सुवसि भागमुत्तमम् (सविता)।[4] श्रीहर्षेणापि तस्य ग्रन्थे देवानाम् अमृतत्वं प्रतिष्ठितम्। षोडशसर्गे तेन प्रोक्तं यत् मनुष्या: न अमृतपानकारिण:–

**यद्यप्यपीता वसुधालयैः सुधा तदप्यदः स्वादु ततोनुमीयते।**
**अपि क्रतूषर्बुधदग्धगन्धिने स्पृहां यदस्मै दधते सुधान्धसः॥**[5]

पञ्चमसर्गेपि श्रीहर्षेण सममेव वचनं कथितम्– 'वीक्ष्य व: खलु तनूममृतादाम् दृङ्निमज्जनमुपैति सुधायाम्'।[6]

देवतासु बहुरूपधारणस्य क्षमतास्ति। तस्मात् देवा: इच्छानुसारं विविधरूपं धारयन्ति। नैषधचरितस्य त्रयोदशसर्गे दृश्यते इन्द्रादिचतुष्टयदेवा: दमयन्तीं पत्नीरूपेण कामयन्त: नलरूपं धारयित्वा स्वयंवरसभायाम् उपस्थितवन्त:। एतेन दमयन्ती प्रकृतं नलं ज्ञातुम् असमर्था आसीत्। यद्यपि सा परवर्तीकाले इन्द्रादिदेवानां सन्तुष्टिविधानेन एव नलं ज्ञातुं समर्था: शक्या:। दमयन्ती देवानां नलवत् इदं रूपधारणम् 'मायाजालम्' इत्यनेन विभूषितवती–

**मुग्धा दधामि कथमित्थमथापशङ्कां**
**संक्रन्दनादिकपटः स्फुटमीदृशोयम्।**
**देव्यानयैव रचिता हि तथा तथैषां**
**गाथा यथा दिगधिपानपि ताः स्पृशन्ति॥**[7]

1. शतपथब्राह्मणे, 11/1/2/12,11/2/3/6
2. शतपथब्राह्मणे, 2/2/2/8–10
3. ऋक्. 6/8/4
4. ऋक्. 4/54/2
5. नैषधचरितम्, 16/7
6. नैषधचरितम्, 5/94
7. नैषधचरितम्, 13/46

टीकाकारेण मल्लिनाथेन अस्य श्लोकस्य व्याख्यायां निगदितम्– 'संक्रन्द-नादीनाम् इन्द्रादीनां' कपटो माया, इति स्फुटं व्यवक्तम्। चतुर्दशसर्गे ते देवाः दमयन्तीमुद्दिश्य अकथयन् यत् त्वं कपटदेहम् अर्थात् नलदेहं परित्यक्तवताम् अस्माकं स्वविग्रहधारणं दृष्टा विस्मयाविष्टासि, अतः त्वं स्वेच्छानुसारं देहरूपान्तरविद्या लभेत–

**कुष्टकायमपहाय नो वपुबिभ्रतस्त्वसि वीक्ष्य विस्मिता।**
**आप्तुमाकृतिमतो मनीषितां विद्यया हृदि तवाप्युदीयताम्।।**[1]

नैषधकारस्य मते इयं विद्या भवति 'इन्द्रजालविद्या'– 'वाधा वतेन्द्रादिभिरिन्द्र-जालविद्याविदां वृत्तिवधाद् व्यधायि'।[2] अस्य श्लोकस्य व्याख्याप्रसङ्गे मल्लिनाथेन प्रोक्तं– 'सेयं देवमायेति भावः'। अर्थात् टीकाकारस्य मते इन्द्रजालविद्या भवति देवानां माया। एकविंशसर्गे श्रीहर्षेण एतदपि निगदितं यत् शिवः मायाशक्तियुक्तः– 'कैयमर्धभवतोहे मायिना ननु भवः सकलस्त्वाम्'।[3] वैदिकसाहित्यस्य विविधोपाख्यानेषु देवानां बहुरूलपधारणस्य क्षमता उल्लिखिता। केनोपनिषदि (तृतीयखण्डम्) दृश्यते देवासुरयोः युद्धे ब्रह्मा जयं प्राप्य तद्जयं देवेषु अर्पणं कृतवान्। परन्तु देवाः तद्जयं स्वेषामेव इति मत्वा आनन्दम् अकुर्वन्। अनन्तरं ब्रह्मा तेषां देवानां भ्रमं दूरीकृतवान् यक्षरूपं धारयित्वा।

देवानां वासस्थानं स्वर्गः। ते तत्र सर्वायासेन वसन्ति। शतपथब्राह्मणे उक्तं देवताः अमरतायाम् अर्थात् स्वर्गे निवासं कुर्वन्ति। ते यज्ञमाध्यमेन दिवम् अर्थात् स्वर्गं गतवन्तः– 'यज्ञेन वै देवाः। दिवमुपोदक्रामन्....'।[4] तैत्तिरीयसंहितायामपि (1/7/1/3) एवमेव वचनं प्राप्यते। अथर्ववेदे कथितं यत् देवताः पितृभ्यां सह स्वर्गलोके निवसन्ति (6/123/3)। नैषधचरिते श्रीहर्षेणापि तुल्यं वचनं प्रोक्तम्। तेन नलमाध्यमेन कथितम् इन्द्रादीनां स्वर्गवासिनां देवानाम् अभिलाषः कदापि न व्यर्थो भवति–

**न व्यहन्यत कदापि मुदं यः स्वःसदामुपनयन्नभिलाषः।**
**तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य।।**[5]

---

1. नैषधचरितम्, 14/9
2. नैषधचरितम्, 14/70
3. नैषधचरितम्, 21/102
4. शतपथब्राह्मण, 1/7/3/1
5. नैषधचरितम्, 5/123

अत्र 'स्वःसदाम्' इत्यस्य अर्थः स्वर्गवासिनाम्। तस्मात् मल्लिनाथेन प्रोक्तम्- 'स्वःसदः स्वर्वासिनः'। षष्ठसर्गे नैषधकारः अवदत् देवाः परमेन सुखेन स्वर्गम् अधिवसन्ति- 'स्वर्गे सतां शर्म...'।[1]

वैदिकदेवाः स्वप्रकाशाः अर्थात् ते यथा स्वप्रकाशेन स्वात्मानं प्रकाशयन्ति, तद्वद् सर्वान् पदार्थान् अपि प्रकाशयन्ति। तस्मात् यास्काचार्येण देवशब्दस्य व्युत्पत्तिप्रसङ्गे निगदितम्- 'दीपनाद्वा द्योतनाद्वा'।[2] अर्थात् निरुक्तकारस्य मते देवशब्दः दीपनार्थकात् द्योतनार्थकात् च दा- धातोः निष्पन्नो भवति। नैषधकारेणापि एवम् उक्तम्। तेन एकविंशसर्गे विष्णुदेवमुद्दिश्य 'स्वप्रकाशः' इति विशेषणं प्रयुक्तम्- 'स्वप्रकाशः। जड् एष...'।[3] नैषधचरितमहाकाव्ये देवानां विविधं वैशिष्ट्यं दृश्यते। यथा-देवानां भाषा संस्कृतम् (10/34), ते निर्मलाः (13/147,14/20), घर्महीनाः (14/21), अम्लानाः (14/22), अवाङ्मनसगोचराः (21/54), तै सह विरोधे महाविपद् (14/41) इति। अधुना जिज्ञासा वैदिकदेवानां स्वरूपज्ञानस्य किं प्रयोजनम्? अस्य उत्तरे उक्तं वैदिककर्मेण लौकिककर्मेण च इष्टफलस्य सिद्धिः, यतः देवताः सुखदायिकाः। ते अनिष्टनिवारणं कृत्वा मनुष्याणां सुखं प्रदायन्ति। एतस्मात् कारणात् देवानां स्वरूपज्ञानं सर्वेषाम् अपरिहार्यम्। बृहद्देवताग्रन्थे तस्मात् कथितम् इष्टस्य सिद्ध्यर्थं देवतानां स्वरूपज्ञानं प्रयोजनम्। यावत् पर्यन्तं देवानां स्वरूपज्ञानं न भवति, तावत् पर्यन्तं वैदिककर्मस्य तथा लौकिककर्मस्य फलप्राप्तिः न सम्भवति-

**न हि कश्चिदविज्ञाय याथातथ्येन दैवतम्।**
**लौक्यानां वैदिकानां वा कर्मणां फलमश्नुते।।**[4]

प्रत्येकं देवस्य द्वे रूपे स्तः- शान्तरूपम् उग्ररूपं च। शान्तरूपं सुखदा उग्ररूपं च दुःखदा। वायुदेवः शान्तः भवति यदा स शनैः शनैः वहति, परन्तु अतीव झञ्झया सह वाहितः वायुः उग्रः स्यात्। वस्तुतः अग्निवायुप्रभृतिनां देवतानां सुखदुःखादिरूपं मनुष्यस्य नाधीनम्। तथापि यदि मनुष्याः तेषां यथार्थस्वरूपं जानन्ति, तर्हि ते अनिष्टस्य निवारणम् इष्टस्य च लाभं कर्तुं सफलाः भवन्ति। अधुनापि वैज्ञानिकाः प्राकृतिकशक्तेः स्वरूपज्ञानाय सर्वदा अन्वेषणं कुर्वन्ति। येन ते प्राकृतिकविपर्ययस्य नियन्त्रणं समयानुसारं करिष्यन्ति, एवञ्च सर्वेभ्यः इष्टप्राप्त्यर्थं सर्वदा प्रचेष्टां कुर्वन्ति। पुनः मनुष्याः देवताभ्यः सुखम्, समृद्धिम्, स्वर्गः, मोक्षम् इति प्राप्यन्ते। अतः वक्तुं शक्यते यत् देवतानां स्वरूपज्ञानं सर्वेषां प्रयोजनम्।

---

1. नैषधचरितम्, 6/98
2. निरुक्तम्, 7/4/15
3. नैषधचरितम्, 21/53
4. बृहद्देवता, 1/4

**अनुशीलितग्रन्थपञ्जी-**


1. दत्त, समीर कुमार (सम्पा.), नैषधचरितम् (प्रथमः सर्गः), कलकाताः संस्कृत बुक डिपो, 2002।
2. पन्त, मोहनदेव (सम्पा.), नैषधीयचरितम् (प्रथमः सर्गः), दिल्ली : मोतीलाल बनारसी दास।
3. आचार्य, नारायण राम (सम्पा.), नैषधीयचरितम्, वाराणसीः चौखम्बा विद्याभवन, 2012।
4. विद्यारत्न, निवारणचन्द्र (सम्पा.), नैषधचरित, कलकाताः ववाटप्रेस, 1816।
5. तिवारी, 'यामलेश कुमार (सम्पा.), नैषधीयचरितम्, चौखम्बा सुरभारती प्रकाशन, 2017।
6. दत्त, शिव (सम्पा.), नैषधीयचरित, मुम्वाइः नारायण सागर प्रेस, 1912।
7. शास्त्री, देवर्षि सनाढ्य (सम्पा.), नैषधीयचरितम्, चौखम्बा कृष्णदास एकाडेमी, 2013।
8. मिश्र, गुमान, नैषधकाव्य, श्रीवेङ्कटेश्वर यन्त्रालय, 1952।
9. शुक्ल, चण्डिकाप्रसाद, नैषधपरिशीलन, इलाहावादः हिन्दुस्थानी एकाडेमी, 1992।
10. द्विवेदी, श्री महावीरप्रसाद, नैषधचरितचर्चा, लखनउः गंगा ग्रन्थागार, 1933।
11. झा, देवनारायण, नैषध समीक्षा, नाग पावलिशार्स, दिल्ली : द्विवेदी, इच्छाराम. नलचरितम्, दिल्ली : नाग प्रकाशक, 1660।
12. दत्त जोशा, मथुरा, नैषध का काव्यशास्त्रीय अध्ययन, दिल्ली : परिमल पब्लिकाशन्स, 2015।
13. मुखोपाध्याय, गोविन्दगोपाल, वैदिक साहित्य संकलन, वर्धमान विश्वविद्यालयः 1365।
14. वन्ध्योपाध्याय, श्रीमति शान्ति, वैदिक साहित्येर रूपरेखा, कलकाता : संस्कृत पुस्तक भाण्डार. 2003।
15. वसु, डॉ. योगीराज, वेदेर परिचय, कलकाताः, फार्मा के एल एम प्राइभेट लिमिटेड, 2010।
16. शास्त्री, राजवीर, वैदिककोष, आर्ष साहित्य प्रचार द्रस्ट।
17. सूर्यकान्त, वैदिक कोश, वाराणसी : चौखम्बा कृष्णदास एकाडेमी, 2012।

18. मिश्र, आचार्य श्रीगंगाधर, वैदिक एवं वेदोत्तर भारतीय संस्कृति, चौखम्बा सुरभारती प्रकाशन, 2005।
19. शास्त्री, डॉ. सुखदा, वैदिक शब्दो का अर्थपरिशीलन।
20. पाठक, मनोदत्त, वैदिक ज्ञान विज्ञान कोश, राजपाल, 2011।
21. शर्मा, लीलाधर, भारतीय संस्कृति कोश, राजपाल, 2013।
22. त्रिपाठी, गयाचरण, वैदिक देवताः उद्भव और विकाश, वाराणसी, भारतीय विद्या प्रकाशन, 1981।
23. उनियाल, प्रो. घनश्याम, देवतातत्वविज्ञान, होशियारपुर, कात्यायन वैदिक साहित्य प्रकाशन, 2016।
24. रय, रामकुमार, वृहद्देवता, वाराणसी, चौखम्बा संस्कृत संस्थान, 2019।
25. दत्त, रमेशचन्द्र, ऋग्वेदसंहिता (बंगाली), कलकत्ता, संस्कृत पुस्तक भाण्डार. 1976।
26. शर्मा, शिवदत्त, नैषधचरितम्, लखनऊ, उत्तर प्रदेश संस्कृत संस्थान, 1998।
27. रय, रामकुमार, वैदिक माइथोलोजी, वाराणसी, चौखम्बा विद्याभवन, 2014।

✦✦✦

 ISSN : 0975-1769

# आयुर्वेदे योगतत्त्वम्

**-डॉ. गोबिन्दः दासः***

महाकविना कालिदासेन कुमारसम्भवे उक्तम्- 'शरीरमाद्यं खलु धर्मसाधनमिति'।[1] धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते, तेषु च वपुरेव मुख्यं साधनम्। सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते। बलहीनः जनः न किमपि कर्तुं शक्नोति। मुण्डकोपनिषदः मते- 'नायमात्मा बलहीनेन लभ्यः'।[2] निर्बीजः पुरुषः शक्तिहीनो जनो वा आत्मानुसन्धाने सततमसमर्थं भवति। निरोगशरीरलाभाय तथा आत्मलाभाय शरीरचर्चा करणीया। परन्तु शरीरं व्याधिमन्दिरं भवति। अत्र सर्वे रोगाः निवसन्ति। ते अपशक्तयः यथा शरीररूपकं गृहं प्रविष्टुमसमर्थाः भवेयुः। अतः शरीरस्य यत्नं करणीयम्। तदर्थं सन्ति बहवः उपायाः। तेषु उपायेषु योगायुर्वेद अन्यतमः।

√अयुज् समाधौ, √अयुज् संगमने, √युजिर् योगे वेति धातोः 'घञ्' प्रत्यये योगे योगशब्दस्य निष्पत्तिर्भवति। 'भवतापेन तप्तानां योगो हि परमौषधमि'ति वचनानुसारं संसारस्य मृगमरीचिकायां व्याकुलितान्तःकरणवतां जनानां कृते योग एव परमौषधस्य कार्यं करोति। तस्मात्महर्षिपतञ्जलिना परमौषधस्य कार्यं कुर्वन् योगः चित्तवृत्तिनिरोध[3]त्वेन परिभाषितः। चित्तस्य बाह्याभ्यन्तरविषयाणां परित्यागपूर्वकं स्वकीयस्वरूपे अवस्थानमेव चित्तवृत्तिनिरोध उच्यते, स एव योगरूपेणाभिहितो महर्षिपतञ्जलिना। जनजीवनाय अपेक्षिताः आवश्यकताः पूरयितुं योगः कल्पवृक्षः सदृशः वर्तते। अयं योगः ऐहिकभोगैः सह लोकोत्तरान् भोगान् निखिला विभूतिश्च प्रयच्छति। योगेन साधकः कैवल्यं मोक्षं वा प्राप्नोति। अतो यदि योगशास्त्रं दैनन्दिनजीवनस्याङ्गभूतमिति मत्वा तदनुसारिणीं योगचर्यां यदि कश्चिदाचरति तदा स सर्वदा जीवने स्वस्थ एव

---

* सहायकाचार्यः, संस्कृतविभागः, डेबराथानाशहीदक्षुदिरामस्मृतिमहाविद्यालयः, पश्चिम-मेदिनीपुरः, पश्चिमवङ्गः।

1. कुमारसम्भवम् 5/33
2. मुक्तिकोपनिषद् 3.2.4
3. योगसूत्रम् 1/2

तिष्ठति, दीर्घजीवनञ्च प्राप्नोति। रोगास्तस्य नश्यन्ति, तथा मनुष्यस्य आध्यात्मिक-आधिदैविक-आधिभौतिकेति त्रीणि दुःखानि नश्यन्ति।

को नाम आयुर्वेद इति जिज्ञासायामुच्यते यद्यत्रायुषः अहितकारकाणां व्याधीनां निदानं शमनञ्च विद्यन्ते सः ग्रन्थ आयुर्वेदः।[1] देह-आत्मनोर्योगो जीवनम्, तेन अवच्छिन्नः काल आयुः। यस्मिन् शास्त्रे आयुर्बोधद्वारा आयुष्याणि अनायुष्याणि द्रव्यगुणकर्माणि च ज्ञात्वा तेषां सेवनेन त्यागेन चारोग्येण आयुविषयकं ज्ञानं भवति तदेव आयुर्वेदः।[2] आयुर्वेदीयचिकित्सापद्धतिः न केवलं शुश्रुषाया एव पद्धतिरस्ति अपितु एका सम्पूर्णजीवनपद्धतिरस्ति यस्याः नीति-नियमादीनामनुपालनेन जनाः रोगेभ्यः स्वमेव रक्षित्वा 'जीवेम शरदः शतम्' इत्येवं महामन्त्रं सफलीकर्त्तुं पारयन्ति।

आयुर्वेदाचार्याः योगादिदर्शनशास्त्राणि अनुसृत्य तेषां सिद्धान्तं स्वीकृतवन्तः। तदर्थं तयोः शास्त्रयोर्मध्ये बहुशः साम्यं वर्तते। योगदर्शने यथैव प्रमाणानि सन्ति आयुर्वेदेऽपि तथा। एवं योगे षट्कर्माणां ये प्रतिपाद्यविषयाः ते एव विषयाः आयुर्वेदस्य पञ्चकर्मणि प्रतिपादिताः सन्तीति मे मतिः। योगलक्षणम्, चित्तप्रसादनस्योपायः, चतुर्विधं प्रमाणम्, सृष्टिक्रमः, योगिनां शक्तिः, मोक्षः, फललाभादिषु विषयेषु उभयशास्त्रयोर्मध्येऽपि समत्वमवलोक्यते।

**योगस्य लक्षणम्**

आयुर्वेदे योगेन सह मनसः मोक्षेण सहात्मनः सम्बन्धं विविच्य योगस्य लक्षणं कृतम्। तत्र चरकसंहितायां योगेन सह मनसः मोक्षेन सह आत्मनः सम्बन्धं विविच्य योगस्य लक्षणं प्रतिपादितम्। तद्यथोक्तम्-

**आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्तते।**
**सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे॥**
**निवर्तते तदुभयं वशित्वं चोपजायते।**
**सशरीरस्य योगज्ञास्तं योगमृषयो विदुः॥**[3]

अनेन लक्षणश्लोकेन चर्काचार्येण आत्मना सह मनसः वशीकरणं हि योग इत्युक्तम्। आत्मना सह इन्द्रियस्य, इन्द्रियेण सह मनसः, मनसा सह अर्थस्य (इन्द्रियग्राह्यविषयस्य) सन्निकर्षवशात् जीवः सुख-दुःखञ्चानुभूयते। यदा जीवस्य

---

1. हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
   मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥ चरकसंहिता, सूत्रस्थानम्. 1/41
2. वाचस्पत्यम् पृ. 778
3. चरकसंहिता, शारीरस्थानम् 1/138-139

आत्मनि मनः स्थिरं भूत्वा निश्चलो भवति तदा सुख-दुःखस्य निवृत्तिर्भवति। अस्यामवस्थायां साधकस्य देहः, मनः, आत्मा सर्वमेव स्वनियन्त्रणाधीनो भवति। आत्मनि मनसि च नियन्त्रता हि 'योगः' इति विदुषामभिमतम्। अतः महर्षिणा चरकेणोक्तमात्मना सह मनसः नियन्त्रणं हि योगः इति। तस्यैव योगस्य लक्षणं कृत्वा महर्षिणा पतञ्जलिना चित्तस्य अन्तःकरणस्य वृत्तेः सर्वतो भावेन निरोध एव योगः इत्युक्तम्।[1]

संसारेऽस्मिन् सुख-दुःखानुभूतीनां कारणं मन इति। चञ्चलता एव मनसः धर्मः। अहितविषये इन्द्रियैः मनसः प्रवृत्तिः दुःखस्य कारणं भवति। एवं हितविषये इन्द्रियैः मनसः प्रवृत्तिः सुखस्य कारणं भवति। आयुर्वेदयोगशास्त्रयोः सुखानुभवानुकूलवेदनारूपेण दुःखानुभवः प्रतिकूलवेदनारूपेण च स्वीक्रियते। इन्द्रियार्थसम्बन्धेन मनसः चञ्चलता जायते। तेन च विविधविषयान् प्रति तस्य प्रवृत्तिर्भवति। प्रकारेणानेन कर्मणः सञ्चयो भवति, पुनः सञ्चितेन कर्मणात्मनः सुख-दुःखे प्रवृत्तिर्भवति। 'गायत्र्याः' 'प्रणवस्य' वा पुनः पुनः साधनया अभ्यासेन वा यदा मन आत्मनि स्थिरो भवति तदा तस्य सर्वाः प्रवृत्तयः स्तब्धाः भवन्ति। अतो मनस एकाग्रतया सुख-दुःखानुभवो न भवति। इयमवस्था मनसः 'वशित्वमि'ति नाम्ना प्रसिद्धा आयुर्वेदशास्त्रेषु। सुख-दुःखस्याभावयुक्ता इयमवस्था 'योगः' संज्ञायां संज्ञितो भवति। 'योगेन सशरीरस्य मनसो वशित्वं चोपजायते' इति महर्षेः चरकस्याशयः। अतः योगावस्थायां मनसः शरीरस्य च वशित्वं स्वीक्रियते।

आयुर्वेदशास्त्रे योगस्वरूपं प्रतिपादयन् आयुर्वेदाचार्यस्य विशेषावधानं वर्तते यत् योगः न मात्रं मनांसि शुद्धीकरोति अपितु कार्यस्य दोषानपि अपाकुरुते। पुनश्च चित्तस्यान्तःकरणस्य वृत्तेः सर्वतो भावेन निरोध एव योग इति पतञ्जलिनः अभिप्रायमस्ति। अनेन प्रमाणितं भवति यद्योगलक्षणप्रतिपादने उभयोः शास्त्रकारयोर्मध्ये केवलं शब्दगतपार्थक्यं विद्यते न तु अर्थगतं वैसादृश्यमिति।

### चित्तप्रसादनस्योपायः

चरकसंहितायां वैद्यस्य चतस्रः वृत्तयः कथिताः

**मैत्री कारुण्यमार्तेषु शक्ये प्रीतिरुपेक्षणम्।**
**प्रकृतिस्थेषु भूतेषु वैद्यवृत्तिश्चतुर्विधा।।**[2]

वैद्यस्य इमाः चतस्रः वृत्तयः योगसूत्रेऽपि मैत्रीकरुणामुदितोपेक्षारूपं चतुर्विधं चित्तप्रसादानम्- 'मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्त-

1. योगसूत्रम् 1/2
2. चरकसंहिता, सूत्रस्थानम् 9/26

प्रसादनम्'।[1] व्यासभाष्ये आसां चतसृणां वृत्तीनां प्रतिपादनं एवंविधम्- सुख-दुःख-पुण्याऽपुण्यविषयाणां मैत्री-करुणामुदितोपेक्षाणां चित्ते पुनः पुनः अवतारणं चित्तस्य नैर्मल्यं भवतीति। अत्र यथाक्रमं सुखविषयेषु मैत्रीं कुर्यान्न तु ईर्ष्याम्। दुःखविषयेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति करुणामेव भावयतः पुरुषस्य पराऽपकार-चिकीर्षाकालुष्यं निवर्तते चित्तस्य। पुण्यवत्प्राणिषु सर्वदा मुदितां तथा हर्षमेव कुर्यान्न तु किमेते पुण्यवन्त इति विद्वेषम्। अपुण्यशीलेषु प्राणिषु चोपेक्षामेव भावयेन्नानुमोदनं न वा द्वेषम्। इत्येवं राजसतामसधर्माणां निवृत्तौ सात्त्विकः धर्मः समुद्भवति। तेन चित्तं प्रसन्नं चैकाग्रं सत् स्थितिपदं लभते। एवं द्वेषरागादिप्रपक्षभूतमैत्र्यादिभावनया समुत्पादितप्रसादं चित्तं संप्रज्ञातादिसमाधियोग्यं संपद्यते। 'तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्। दुःखितेषु करुणाम्। पुण्यात्मकेषु मुदिताम्। अपुण्यशीलेषु उपेक्षाम्। एवमस्य भावयतः शुक्लो धर्म उपजायते। ततश्च चित्तं प्रसीदति। प्रसन्नमेकाग्रं स्थितिपदं लभते।'[2] आयुर्वेदशास्त्रे इमाः वृत्तयः एवंविधाः कथिताः-

**मैत्री**- 'मैत्री' शब्दस्यार्थः सौहार्दम्, प्राणिमात्रेषु मित्रता कर्तव्या। योगसूत्रे मैत्र्यादिशब्देन बलसंयमञ्च प्राप्तौ साहाय्यं मिलति। अनेन प्रकारेण रुग्णस्य चरकसंहितायामप्यारोग्यलाभाय औषधिना सह सौहार्दं करणीयमिति कथितम्।

**करुणा**- 'करुणा' शब्दस्यार्थः कृपा दया वा, परदुःखप्रहाणेच्छा। चरकसंहिताया-मप्यस्याः व्याख्या 'आर्तेषु कारुण्यम्' वचनांशे समुपलभ्यते।

**मुदिता**- 'मुदिता' शब्दस्यार्थः हर्षः। चरकसंहितायामपि अस्याः व्याख्या 'शक्ये प्रीति' वचनांशे प्राप्यते।

**उपेक्षा**- 'उपेक्षा' शब्दस्यार्थः त्यागः उदासीनः वा। चिकित्साशास्त्रेऽपि असाध्यरोगस्य उपेक्षाकरणीया इति उक्तम्-

**मैत्री कारुण्यमार्तेषु शक्ये प्रतिरुपेक्षणम्।**
**प्रकृतिस्थेषु भूतेषु वैद्यबुद्धिश्चतुर्विधेति।।**[3] इति

अपि च बृद्धवाग्भटोऽपि कथितम्-

**सर्वत्र मैत्री, करुणाऽऽतुरेषु निरामदेहेषु नृषु प्रमोदः।**
**मनस्युपेक्षा प्रकृति व्रजत्सु वैद्यस्य सद्वृत्तमलङ्करोति।।**[4]

---

1. योगसूत्रम् 1/33
2. योगसूत्रम्, व्यासभाष्यम् 1/33
3. चरकसंहिता, सूत्रस्थानम् 9/26
4. अष्टाङ्गसंग्रहः उ., 50 अ.

उपर्युक्तवचनेन प्रतिपादितं यत्, योगदर्शने वर्णितः चतस्रः वृत्तयः साधकमात्रमपि निरूपणं करणीयम्, तद्वदेव आयुर्वेदशास्त्रेऽपि चत्वारवैद्यस्य प्रतिपादनमस्ति। अत्र स्पष्टं भवति यत्, आयुर्वेदशास्त्रे चिकित्सायाः विनियोगं दृष्ट्वा योगस्योपादेयप्रक्रियायाः निरूपणं प्राप्यते।

## चतुर्विधं प्रमाणम्

भारतीयसंस्कृतेः प्राणस्वरूपमस्ति भारतीयदर्शनशास्त्रम्। प्रमाणेन प्रमेयस्य सिद्धिरिति दार्शनिकानां विचारः। अतः ते कारणं प्रमाणैरात्मा-प्रकृति-परमात्मा-स्वर्ग-मोक्ष-सृष्टि-प्रलय-पुनर्जन्मादीनि सूक्ष्मातिसूक्ष्मतत्त्वानि यथार्थरूपेण ज्ञातवन्तः। प्रमाणैर्वस्तोः यथार्थस्वरूपं ज्ञातुं शक्नोति जिज्ञासु। एभिः पारलौकिकजागतिकसत्यासत्यं च निर्णितुं शक्यते। प्रमाणाभावेन वस्तूनां यथार्थज्ञानं न भवति।

आयुर्वेदशास्त्रेऽपि आध्यात्मिक-दार्शनिकविषयानां विवेचनकाले प्रमाणानां आलोचनास्ति। शास्त्रेऽस्मिन् प्रमाणाय 'परीक्षा' इति शब्दस्य प्रयोगः दृश्यते। चरकसंहितायाः टीकाकारेण चक्रपाणिदत्तेन स्वस्य टीकायां 'परीक्षा' इति शब्दविषये कथितम्- 'परीक्ष्यते व्यवस्थाप्यते वस्तुस्वरूपमनयेति परीक्षा'[1] इति। अर्थात् यया पाञ्चभौतिकविषयस्वरूपं व्यवस्थितरूपेण निरूपितो भवति सा परीक्षा। प्रमाणं हि पदार्थानां वास्तविकस्वरूपस्य बोधं कारयति। अतः वक्तुं शक्ये यत् प्रमाणं परीक्षा वेति शब्दयोः पृथगर्थः नास्ति, तौ अभिन्नार्थकौ। विषयेऽस्मिन् महर्षिणा चरकेणोक्तम्- 'द्विविधमेव खलु सर्वं सच्चासच्च, तस्य चतुर्विधा परीक्षा- आप्तोपदेशः प्रत्यक्षमनुमानं युक्तिश्चेति'।[2] पाञ्चभौतिकसंसारेऽस्मिन् 'सदसदे'ति द्विविधो विषयः। तत्र विधिविषयप्रमाणगम्यं भावरूपमिति सत्पदस्यार्थः। एवमसत् निषेधविषयप्रमाणगम्यम-भावरूपस्यार्थं प्रकटयति। द्विविधविषयस्य परीक्षा चतुर्विधो भवति। तद्यथा- 1. आप्तोपदेशः, 2. प्रत्यक्षः, 3. अनुमानम्, 4. युक्तिश्चेति। परन्तु प्रत्यक्ष-अनुमानागमानि त्रीणि प्रमाणानि। तत्र युक्तिपरीक्षामनुमाने स्वीकरोतीति। अत एव तयोः शास्त्रयोः आधारेण वक्तुं पार्यते यत् प्रमाणानां स्वरूपतः नास्ति भेदः।

## आयुर्वेदानुसारं सृष्टिक्रमः

सृष्टितत्त्वविषये योगायुर्वेदयोर्मध्ये प्रायशः साम्यं परिलक्ष्यते। आयुर्वेदाचार्याः चतुर्विंशतिः तत्त्वानि स्वीकुर्वन्ति। एतेषां मध्ये यथा पृथिव्यप्तेजवाय्वाकाशबुद्ध्य-व्यक्ताहंकाराः इमानि अष्ट तत्त्वानि प्रकृतिरिति, अपि च षोडशतत्त्वानि यथा पञ्च ज्ञानेन्द्रियाः (चक्षुकर्णनासिकाजिह्वात्वचश्चेति) पञ्च कर्मेन्द्रियाः (वाक्पाणीपाद-

1. चरकसंहिता, सूत्रस्थानम् 11/17 चक्रपाणिदत्तः
2. चरकसंहिता, सूत्रस्थानम् 11/17

पायूपस्थश्चेति) पञ्च अर्थाः (शब्दस्पर्शरूपरसगन्धार्थश्चेति) मनश्च विकृतिः तत्त्वानि भवन्ति। एभिः तत्वैः अस्य जगतः सृष्टिरिति तेषां विचारः। एषां नामान्युल्लिख्य चरकेण कथितम्-

**खादीनि बुद्धिरव्यक्तमहंकारस्तथाष्टमः।**
**भूतप्रकृतिरुदिष्टा विकारश्चैव षोडश॥**

**बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।**
**समनस्काश्च पञ्चार्था विकारा इति संज्ञिताः॥**[1]

तथा च-

**पुनश्च धातुभेदेन चतुर्विंशतिकः स्मृतः।**
**मनो दशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी॥**[2]

कस्मात् परं कस्योत्पत्ति इति विषयं स्पष्टीकृत्वा चरकाचार्यः सृष्टेः क्रमविषये कथितम् -

**जायते बुद्धिरव्यक्ताद् बुद्ध्याऽहमिति मन्यते।**
**परं खादीन्यहङ्कारदुत्पद्यन्ते यथाक्रमम्॥**

**ततः सम्पूर्ण सर्वाङ्गो जातोऽभ्युदित उच्यते॥**[3]

अर्थात् अव्यक्तात् बुद्धेः, बुद्धितत्त्वादहंकारस्य, अहंकारात् यथाक्रमं सूक्ष्मपञ्चमहाभूतस्योत्पत्तिर्भवति। ततः सम्पूर्णाङ्गस्य उत्पत्तिकारणात् 'जातः' इति नाम्नाभिधीयते।

अतः योगाचार्याः यदा षड्-विंशतिः तत्त्वानि स्वीकुर्वन्ति तदा आयुर्वेदाचार्याणां मते तत्त्वानि चतुर्विंशतिः इति। एभिः तत्वैः अस्य जगतः सृष्टिरिति तेषां विचारो वर्तते। आयुर्वेदे सृष्टेरुत्पत्तेः प्रक्रियायां प्रकृति-पुरुषयोः संयुक्तरूपेण सहावस्थानं स्वीकृतवान्। अत्राव्यक्तेति पदेन प्रकृति-पुरुषयोर्ग्रहणं करणीयम्। योगाचार्येणाव्यक्तेति पदेन केवलं मूलप्रकृतेर्ग्रहणं कृतम्। परन्त्वायुर्वेदाचार्याः पुरुषोपहितायाः प्रकृतेर्ग्रहणं कृतवृन्तः। आयुर्वेदे चतुर्विंशतिः तत्त्वेषु भौतिकाः भवन्तीन्द्रियाणि। योगमते तु भौतिकाः इन्द्रियाणि अहंकारिकाः न भवन्ति।

### योगिनां शक्तिः

आयुर्वेदे यत्र योगं मुक्तेः साधनमार्गरूपेण योगस्योल्लेखः तत्रैव मुक्तेः प्राक् योगीनां प्राप्तानां सिद्धीनामुल्लेखो वर्तते। यदा साधका अष्टाङ्गयोगैः साधनां कृत्वा

1. चरकसंहिता, शारीरस्थानम् 1/63-64
2. चरकसंहिता, शारीरस्थानम् 1/17
3. चरकसंहिता, शारीरस्थानम् 1/66-67

अन्तिमावस्थायां गच्छन्ति तदा तेषां योगसिद्धिर्भवति। तदानीं योगिषु लक्षणविशिष्ट-स्याविर्भावो भवति। इदं लक्षणविशिष्टं साधारणानां मानवानां मध्ये न जायते। एतत् खलु योगिनां स्वाभाविकी सिद्धिः या 'योगबलमि'ति नाम्ना प्रसिद्धम्। आयुर्वेदेऽष्टौ योगबलानि स्वीकृतानि सन्ति। तद्यथा- आवेश अर्थात् परकायप्रवेशः, चेतस अर्थात् परचित्तज्ञानम्, अर्थानां छन्दसः क्रिया अर्थात् शब्द-स्पर्श-रूप-रस-गन्धार्थानां यथानुकूलं ज्ञानम्, दृष्टि अर्थादतीन्द्रियस्य दर्शनम्, श्रोत्रमर्थादतीन्द्रियस्य श्रवणम्, स्मृति अर्थात् सर्वभावतत्त्वस्मरणम्, कान्तिः इष्टतश्चाप्यदर्शनञ्चेति। तदुक्तं महर्षिणा चरकेण शारीरस्थाने-

**आवेशश्चेतसो ज्ञानमर्थानां छन्दतः क्रिया।**
**दृष्टिः श्रोतं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्॥**
**इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम्।**
**शुद्धसत्वसमाधानात्तत्सर्वमुपजायते॥**[1] इति

एभिः अष्टैश्वर्यैः योगीनां दिव्यबलमुपजायते। शुद्धः सत्व-रज-तमशून्यः मनसः साधनेन संयमेन वा आत्मनि स्थिररूपेण यदा स्थापयितुं समर्थो योगिः भवति तदा तस्मिन् साधके एषां बलानामुत्पत्तिर्जायते।

### मोक्षस्य परिभाषा

योगो मोक्षश्च पृथक् पृथक् द्वे अवस्थे। योगावस्थायां मानवानां शरीरं विद्यते। देहमाधारं मत्वा मनः, इन्द्रियाणि, आत्मा च तत्र विद्यन्ते। शरीरमनसी आत्माधीनौ। परन्तु मोक्षे न शरीरं वर्तते। न मनः न वा इन्द्रियाणि विद्यन्ते। आत्मैतेभ्यो सदा मुक्तरूपेण वर्तते। आयुर्वेदे मोक्षस्य स्वरूपविषये उक्तम्-

**मोक्षो रजस्तमोऽभावात् बलवत्कर्मसंक्षयात्।**
**वियोगः सर्वसंयोगैरपुनर्भव उच्यते॥**[2]

एवं योगस्य समाध्यवस्थायां यदा मनसो रजस्तमसोः गुणाभावो भवति तदा मनसि केवलं सत्त्वगुणो हि विराजते। तदात्मनि नवकर्मणः संयोगोऽपि न भवति। समाधिना पूर्वार्जितस्य कर्मणो विनाशे जाते आत्मा संसाराद्विमुच्यते। इयमवस्था मोक्षः इति कथ्यते।

### मोक्षसाधनानि

योगशास्त्रे यमनियमादि-अष्टाङ्गाः मोक्षस्य प्रारम्भिकसाधनानि भवन्तीति निर्दिष्टानि सन्ति। एषां पालनेन मानवानामाचरणे मनसि च शुद्धतायाति, मनसि

1. चरकसंहिता, शारीरस्थानम् 1/140-141
2. चरकसंहिता, शारीरस्थानम् 1/142

सात्त्विकभावस्योदयो भवति। आत्मा निर्मलतां प्राप्य शनैः शनैः मोक्षमार्गं प्रति तल्लीनं भवितुं वा गच्छति। आयुर्वेदेऽपि मोक्षसाधनस्य प्राथमिकोपायरूपेण यम-नियमयोरुल्लेखः अस्ति। तद्यथोक्तम् -

**सतामुपासनं सम्यगसतां परिवर्जनम्।**
**व्रतचर्योपवासश्च नियमाश्च पृथग्विधाः॥**
**धारणं धर्मशास्त्राणां विज्ञानं विजने रतिः।**
**विषयेष्वरतिर्मोक्षे व्यवसायः परा धृतिः॥**
**कर्मणामसमारम्भः कृतानां चा परिक्षयः।**
**नैष्क्रम्यमनहङ्कारः संयोगे भयदर्शनम्॥**
**मनोबुद्धिसमाधानमर्थतत्त्वपरीक्षणम्।**
**तत्त्वस्मृतेरूपस्थानात् सर्वमेतत्प्रवर्तते॥**[1]

अर्थात् सज्जनानां सङ्गतिः, खलानां दुष्टानां वा सङ्गपरित्यागः, चान्द्रायणादि-व्रतपालनम्, आत्मनिर्मलार्थमुपवासं करणम्, नियमानां पालनम्, धर्मशास्त्राणामभ्यासः, प्रमाणेन यथार्थज्ञानोपलब्धिः, एकान्तवासः, काम-क्रोधादिनां नित्यः परित्यागः, मोक्षसाधककर्मणि प्रवृत्तिः, उत्तमकर्मणः साधनम्, नित्य-नैमित्तिककार्याणां समारम्भः, अहंकारस्य सदैव परित्यागः, ममेदमहमस्मीत्यादिबुद्धिवर्जनम्, तत्त्वार्थस्य परीक्षापूर्वकं ग्रहणादिकं पालयित्वा साधकः यथार्थज्ञानं लभते। तदनन्तरं मोक्षपथि प्रवृत्तिर्भवति।

महर्षेः चरकस्य वचनाज्ज्ञायते यन्मोक्षस्य पूर्वावस्था हि योगोऽतो योगः खलु मोक्षस्य साधनमिति। अत्र योगो न खलु मोक्षः परन्तु योगस्यान्तिमावस्था हि मोक्षः। योगे केवलं शरीरावस्थायां सर्वासां चित्तवृत्तीनामथवा सर्वासां वेदनानां नाशो भवति। मोक्षावस्थायां तु भौतिकशरीरस्य नाशो भवति। मुक्तः पुरुषः जन्म-मरणचक्रेऽस्मिन् संसारे पुनः पुनः नागच्छति। अयं ह्यात्मनो मोक्षस्य चरमो लक्ष्यः। आयुर्वेदानुसारं योगो हि मोक्षस्य सहायकः। अतो योगेन मोक्षेण च सर्वासां वेदनानां विनाशो भवतीति।

**फलप्राप्तिः**

योगशास्त्रे ऐहिकपारलौकिकफललाभाय महत्त्वपूर्णादिशा निर्दिष्टा चास्ति। तत्र प्रसङ्गे योगिनः कथं मुक्तिं प्राप्यते, केन साधनेन ऐहिकफलं झटिति लभ्यते तस्य विचारः शास्त्रेऽस्मिन् कृतः। उक्तञ्च योगसूत्रे- 'तद्वैराग्यादपि दोषबीजक्षये कैवल्यम्',[2] 'सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमि'[3]ति। एवं प्रकारेण मोक्षात्मकं

1. चरकसंहिता, शारीरस्थानम् 1/143-146
2. योगसूत्रम् 3/50
3. योगसूत्रम् 3/55

सिद्धिविशेषं फलं दर्शयति। ततश्च संसारोच्छित्तिः परमानन्दप्राप्तिश्च करतले तिष्ठति। साधकः दिव्यमविनश्वरममृतपदं प्राप्नोति। ते च विषयाः आयुर्वेदशास्त्रेऽपि समानतया स्वीकृताः सन्ति। तत्रायुर्वेदस्य परिभाषायामेव सर्वजीवकल्याणविषयो निहितः अस्तीति निरूपितम्। आयुर्वेदानुसारं तत्त्वानुभूतिमात्यन्तिकज्ञानस्य कारणमस्ति। एवमेव बुद्ध्यहंकारशरीरादिभ्यो नश्वरभावपदार्थेभ्यो मुक्तो भूत्वा आत्यन्तिकज्ञानस्याधिकारी भवति। तज्ज्ञानमेव सत्याबुद्धिरिति कथ्यते। जीवस्य अस्यामवस्थायां रागद्वेषादीनां जागतिकविकाराणां विनाशो भवति। तदनन्तरं साधकः पूर्णतः सत्त्वगुणयुक्तो भूत्वा निवृत्तिमार्गमवलम्ब्य अपवर्गं प्राप्नोतीति आयुर्वेदाचार्यस्याभिमतम्। फलप्राप्तिविषये योगायुर्वेदयोर्मध्ये किञ्चित् स्वरूपतः नास्ति भेदः। अपितु तयोः शास्त्रयोः तुलनात्मकदृष्ट्या वक्तुं पार्यते यत् केवलं शाब्दिकभेदः वर्तते न तु तात्त्विकभेदः।

## आकरग्रन्थाः


### मूलग्रन्थाः

1. चरकसंहिता. महर्षिचरकः, (पूर्वार्द्धः उत्तरर्द्धश्च) सम्पा... प्रो. रामहर्ष सिंह, श्रीचक्रपाणिदत्तविरचितया चौखम्बा सुरभारती प्रकाशन, वाराणसी, संस्करणम्- 2019।
2. पातञ्जलयोगदर्शनम्. महर्षिपतञ्जलिः, वाचस्पतिमिश्र विरचित तत्त्ववैशारदी, विज्ञानभिक्षु कृत योगवार्तिक व्यासभाष्य श्रीनारायणमिश्र, भारतीय विद्या प्रकाशन, वाराणसी, संस्करण, 1998 सन्।
3. पातञ्जलयोगप्रदीप. श्रीस्वामी ओमानन्दतीर्थः, गीताप्रेस, गोरखपुर, अष्टविंश पुनर्मुद्रण वि.सं.- 2064।
4. योगभाष्यम्. व्यासः, सं...नारायणमिश्रः, भारतीय विद्या प्रकाशन, वाराणसी, 1971 सन्।
5. सुश्रुतसंहिता. महर्षिसुश्रुतः, हिन्दी व्याख्या...कविराज, अम्बिकादत्त शास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, षष्ठ संस्करणम्- 1987।

### आधुनिकग्रन्थाः

1. अभेदानन्द, स्वामी, योगशिक्षा (बङ्गभाषया विरचितम्), रामकृष्ण वेदान्त मठ, कलकाता-06, एकादश संस्करणम्, मार्च- 2009।
2. उपाध्याय, श्रीबलदेव. संस्कृतवाङ्मय का बृहत् इतिहास, सप्तदश-खण्ड, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ, वि.सं.- 2063।

3. गुप्त, डॉ. भागवतराम. आयुर्वेद का प्रामानिक इतिहास, चौखम्बा कृष्णदास, अकादमी, वाराणसी, द्वितीय संस्करण, वि.सं.- 2059, सन् 2003।

4. जैन, आचार्यराजकुमार. योग और आयुर्वेद, चौखम्भा ओरियन्टालिया, दिल्ली, प्रथम संस्करण, 2019।

5. ढुङ्गेलः, डॉँ. धरणी. योगदर्शने स्वास्थ्यविज्ञानम्, प्रतिभा प्रकाशन, दिल्ली, प्रथमसंस्करणम्- 2014।

6. Frawley, David. Yoga & Ayurveda, Motilal Banarsidass Publishers Private Limited, Delhi, 2000.

✦✦✦

# स्वास्थ्यमौषधम्

-डॉ. चक्रधरमेहेरः*

**शोधसारांशः**

**आरोग्यं प्रकृतेर्दानं निजाधीनन्तु रक्षणम्।**
**विपरीतो सदा दुःखी सुखिनः स्वास्थमौषधम्॥**

आरोग्यं प्रकृतेर्वरदानं वर्तते। अत एवारोग्यस्य रक्षणम् अस्माकं प्रमुखं दायित्वम्। भारतीयायुर्वेदग्रन्थेष्वपि तदाधारीकृत्य स्वस्थवृत्तादिविषये विस्तृततया वर्णितमस्ति। तत्रोपदिष्टानां नियमानां पालनेनैव उत्तमस्वास्थ्यस्य प्राप्तिर्भवति, व्याधिनाञ्च निराकरणं भवति। यतः आरोग्ययुक्तः पुरुष एव शारीरिक-मानसिक-सामाजिक-धार्मिक-आध्यात्मिक-बौद्धिकदृष्ट्या सर्वविधोत्तरदायित्वानां सम्पादने समर्थो भवति। संस्कृतकाव्यग्रन्थे कुमारसम्भवेऽपि इदं समर्थयता महाकविकालिदासेनोक्तम्- **'शरीरमाद्यं खलु धर्मसाधनम्'**।[1] अत्र तु शरीरेण स्वस्थ एव जनः मानसिकरूपेण स्वस्थस्सन् धर्मादिकार्याणि सम्पादयतीत्यर्थः। अतः शोधलेखेऽस्मिन् उत्तमस्वास्थ्यमाधारीकृत्य वैदिकसंस्कृतवाङ्मये किमुल्लिखितं भारतीयमनीषिभिरिति दिङ्मात्रं परिशीलयामि।

**प्रास्ताविकम्** -

सहस्रवर्षेभ्यः अस्मदृषिभिरङ्गीकृतमिदं यत् मानवजन्म नैकजन्मार्जित-पुण्यकर्मणः कश्चिन्माङ्गलिकः परिणाम इति। यतः मनुष्य एवान्येभ्यः दुर्बलबुद्धिशरीरेभ्यः जन्तुभ्यः प्रज्ञाचरणपुरस्सरं सर्वविधकर्मप्रवृत्तौ सक्षमो भवति। स्वशक्तेः सदुपयोगेन धरायां विद्यमानानां प्राकृतिकसंसाधनानां संरक्षणं बलहीनानाञ्च रक्षणं करोति। सामाजिककर्तव्यानां पालनपुरस्सरं जीवहितविरुद्धानां नियमानां कुरीतिनाञ्च निराकरणं करोति। लौकिकदृष्ट्या आध्यात्मिकदृष्ट्या वा भवतु मानवः अहर्निशं निजसूक्ष्मबुद्ध्या वपुषा च स्वचित्तोत्पन्नाभिलाषपूर्तये प्रयत्नं कुरुते। एतदर्थम् आरोग्यं भवति मानवस्यामोघम् अस्त्रम्। अनेनैवारोग्यास्त्रेण मनुष्यः मनसि आत्मनि च प्रसन्नताम् अवाप्नोति। यतः अलौकिकानन्दावाप्तिनिमित्तमपि धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां प्राप्तावारोग्यं भवति मूलहेतुः। यथोक्तं चरकसंहितायाम्-

---

* सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली।

1. कुमारसम्भवम्

**धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमम्।**
**रोगास्तस्यापहर्तारः श्रेयसो जीवितस्य च॥**[1]

अत एव वैदिकमहर्षयोऽपि सर्वविधारोग्यं कामयन्तः दीर्घायुनिमित्तं प्रार्थयन्ति। तद्यथा –

**तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।**[2]

एवञ्च–

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि ना न्यथेतोऽस्ति न कर्म लिप्यते नरे॥**[3]

अर्थात् संसारेऽस्मिन् धर्मयुक्तनिष्कामकर्माचरन् शतं वर्षाणि जीवितुं वाञ्छेत्0। तदर्थं पूर्णायुः पर्यन्तं मदीया वाणी वाक्शक्त्या समर्था भवतु। नासिकयोः प्राणवायुः, चक्षुषो दृष्टिशक्तिः, श्रोत्रयोः श्रुतिसामर्थ्यं भवतु। केशाः मे अश्वेताः, दन्ताश्च रक्तरहिताः सन्तु। बाहू मे बलवन्तौ तिष्ठताम्। ऊरूश्च गतिशीलौ भवताम्। आत्मा उत्साही भवतु। हृदये स्थिरता वर्तताम्। एवमेव शरीरस्य सर्वाण्यपि अङ्गानि रोगमुक्तानि भवन्तु येन पूर्णायुः यावत् सारोग्यं पर्याप्तं सुखप्राप्तिः स्यात् इति प्रार्थना अथर्ववेदे दृश्यते। तद्यथा –

**वाङ्म आसन्नसो प्राणश्चक्षुरक्ष्णोः .................... प्रियं सर्वस्व पश्यत उत शूद्र उतार्ये।**[4]

## किं नाम स्वास्थ्यम्?

शरीरेन्द्रियात्ममनसां पूर्णस्वस्थता एव स्वास्थ्यमिति। तर्हि किमिदं स्वास्थ्यम् इति चेत् 'स्व'अर्थात् आत्मनि स्वस्मिन् वा 'स्थ'अर्थात् 'स्थित' तस्य च भावः स्वास्थ्यम्। एवमेव शारीरिक-मानसिक-आत्मिकरूपेण स्वात्मनि सनियन्त्रणं

---

1. चरकसंहिता.सू. 01
2. यजु. 36.24
3. यजुर्वेद 40/2 (ईषोपनिषद्)
4. वाङ्मय आसन्नसो प्राणश्चक्षुरक्ष्णोः श्रोतकर्णयोः अपलिता केशा अशोणा दन्ता बहु बाह्वोर्बलम्। ऊर्वेर्वरोजो जङ्घयोर्जवः पादयोः प्रतिष्ठा। अरिष्टानि मे सर्वाऽऽसमाऽनिभृष्टः। तनूस्तन्वा मे सहेदतः सर्वमायुश्शीय। स्योनं मे सीदः पुरुः पृणस्व पवमानः स्वर्गे। प्रियं मा कृणु देवेषु प्रिय राससु मा कृणु। प्रियं सर्वस्व पश्यत उत शूद्र उतार्ये। (अथर्ववेद 19.60.63)

सुखपूर्वकञ्च विचरणं स्वास्थ्यमिति। नाम यदा कश्चिज्जनः व्याधिना ग्रस्तो भवति तदा शरीराङ्गेषु, मनसि आत्मनि वा पीडोत्पद्यते इत्यतः स जनः व्याधिग्रस्तः रोगग्रस्तो वा कथ्यते। तदानीं तस्य व्यवहारेष्वपि न्यूनताः परिलक्ष्यन्ते। परं यदि तद्विपरीतः कश्चिद्वर्तते अर्थात् रोगरहितस्सन् सर्वोत्कृष्टतया व्यवहारं कुरुते तदा सः नीरोगी स्वस्थः इत्यभिधीयते।आयुः परिभाषयन् चरकसंहितायाम् उक्तं यत् -

**शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम्।**[1]

अर्थात् शरीरेन्द्रियात्ममनसां संयोगः आयुरिति। एतेषां संयोगात् जीवस्य सुखकरस्थिति आरोग्यमिति।

वस्तुतः स्वास्थ्यस्य सम्बन्धः शारीरिक-मानसिक-बौद्धिक-सामाजिक-आध्यात्मिकक्रियाभिः सह वर्तते। स एव जनः स्वस्थ इत्युच्यते यः शरीरेण व्याधिरहितः, मनसा द्वन्द्वरहितः, बुद्ध्या चतुरः, सामाजिकोत्तरदायित्वानां निर्वहणे क्षमः, आध्यात्मिकाचरणेषु भक्तिमान् वर्तते।तत्र भारतीयायुर्वेदग्रन्थेषु स्वास्थ्यसम्बद्धाः बहवः उल्लेखाः दृश्यन्ते। तद्यथा -

**समदोषः समाग्निश्च समधातुमलक्रियः।**
**प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते।।**[2]

अत्र स्पष्टतया शारीरिकस्वास्थ्यमभिलक्ष्य निर्दिश्यते यत् यस्य त्रिष्वपि दोषेषु (वात-पित-कफेष्विति) समानता वर्तते अर्थात् अनावश्यकवृद्धिः न्यूनता वा न कस्यचित् दोषस्य परिलक्ष्यते यतः, एते एव त्रयः दोषाः प्राकृतिककर्मद्वारा शरीरस्य नियन्त्रणं कुर्वन्ति इत्यतः कस्याप्येकस्य दोषस्य वृद्धिर्भवति चेत् अवस्थितान्यद्वयस्य न्यूनता दृश्यते। तेन शरीरेषु नानाविधरोगाणाम् उत्पत्तिर्जायते। तथैव एकस्यापि दोषस्य दूषितेन शरीरे विद्यमानानां सप्तधातूनां वैषम्यता दृश्यते। एवमेव त्रयोदशाग्नीनाम् (पञ्चभूताग्निः, सुप्तधात्वग्निः, एकः जठराग्निः) अपि साम्यता अपेक्ष्यते। पुनश्च स्वेद-मूत्र-पुरीषरूपीमलत्रयाणां शरीरान्निष्कासनप्रक्रिया समयेन स्यात्। अर्थात् अत्यधिकमलत्यागः अल्पत्यागो वा वैषम्यतायाःकारणं भवति येन जनः रोगग्रस्तः जायते। एवमेव मनसः इन्द्रियाणाञ्च नियन्त्रणपूर्वकं प्रसन्नात्मा यः जनः तिष्ठति स एव स्वस्थ इति। तदेवानुसरन् वर्तमानसमये विश्वस्वास्थ्यसङ्घटनेन (World Health Organization) अपि स्वास्थ्यविषये उक्तम् -

स्वास्थ्यं नाम सम्पूर्णतया शारीरिक-मानसिक-आध्यात्मिक-सामाजिकभावेन सुस्थता न तु केवलं रोगाणां दौर्बलतायाः वा अभावः।

---

1. चरकसंहिता.सू. 1.42
2. सुश्रूतसंहिता.सू. 15.41

Health is a state of complete physical, mental, spiritual and social wellbeing and not merely the absence of disease or infirmity.[1]

विषयेऽस्मिन् महर्षिचरकः कथयति -

**हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।**
**मानञ्च तच्च यत्रोक्तमायुर्वेद स उच्यते।।**[2]

अत्र सुखायुः दुःखायुः इत्यनयोः तात्पर्यं मानवस्य व्यक्तिगतजीवने जायमानेषु सुखदुःखेषु वर्तते। तथा च हितायुः अहितायुः इत्यनयोः सम्बन्धः तस्य सामाजिक-पक्षैस्साकं वर्तते। अर्थात् यः मनुष्यः सामाजिकदृष्ट्या नाम सामाजिकोत्तरदायित्वानां निर्वहणे सक्षमः, स जनः स्वस्थः वर्तत इति। एवमेव सुखायुः (शरीरेण मनसा च स्वस्थः) हितायुः (सामाजिकक्रियाभिः आध्यात्मिकक्रियाभिश्च स्वस्थः) आयुर्वेदानुसारं स्वस्थव्यक्तिं परिभाषयतः।

**स्वस्थवृत्तस्य लक्षणम्** -

भारतीयायुर्वेदशास्त्रेषु स्वस्थवृत्तस्य देश-काल-ऋतु-प्रकृत्यनुसारम् आहार-विहारादिनां निर्देशः कृतोऽस्ति। यद्यपि इहलोकेऽस्मिन् न कश्चिज्जनः नित्यं तिष्ठति, तथापि स्वथवृत्तस्य पालनेन उत्कृष्टजीवनशैल्या व्याधिनां निराकरणपूर्वकम् आरोग्यपूर्णं जीवनयापनं कर्तुं शक्यते। तत्र सुश्रुतसंहितायां स्वस्थवृत्तस्य लक्षणविषये उपदिष्टं यत् -

**उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता।**
**धीमता यदनुष्ठेयं तदस्मिन् सम्प्रवक्ष्यते।।**[3]

अर्थात् स्वास्थ्यस्य परिरक्षणाय आरोग्याभिलाषी पुरुषः नित्यं शयनादुत्थाय स्वस्थवृत्तस्याचरणं कुर्यादिति।

**काश्यपसंहितानुसारम्** -

**अन्नाभिलाषो भुक्तस्य परिपाकः सुखेन च।**
**सृष्टविण्मूत्रवातत्वं शरीरस्य तु लाघवम्।।**
**सुप्रसन्नेन्द्रियत्वञ्च सुखस्वप्नप्रबोधकम्।**
**बलवर्णायुषी लाभ सौमनस्य समाग्निता।।**

---

1. WHO 1948
2. चरकसंहिता. सू. 1.41
3. सुश्रुतसंहिता. सू. 24.3

**विद्यात् आरोग्यलिङ्गानि विपरीते विपर्ययम्।**[1]

उपर्युक्तपरिभाषानुसारं स्वस्थपुरुषस्य समयेन भोक्तुमिच्छा स्यात्। पाचनक्षमता स्वस्था स्यात्। स्वेदमलमूत्राणां समयेनोचितमात्रया निष्कासनं भवेत्। शरीरं आलस्यादिभाररहितं गत्यात्मकञ्च स्यात्। इन्द्रियाणां मनसश्च स्थितिः नियन्त्रिता प्रसन्नयुक्ता च स्यात्। रात्रौ सुखनिद्रा ब्रह्ममुहूर्ते च सुखजागृतिर्स्यात्। पाचकाग्नि समाना स्यात्।

**स्वस्थवृत्तस्योद्देश्यम् -**

एतावता स्वास्थ्यस्य स्वस्थवृत्तस्य च परिभाषा-लक्षणादि विज्ञाय स्वस्थ-वृत्तस्योद्देश्यविषये ज्ञास्यामः। तत्र महर्षिः चरकः स्वविरचितायुर्वेदग्रन्थे स्वस्थवृत्तस्य द्विविधमुद्देश्यम् अब्रवीत्।

1. स्वस्थजनस्य स्वास्थ्यरक्षणम्। 2. व्याधिना पीडितस्य रोगनिवारणम्। यदुक्तं हि -

**प्रयोजनं चास्य स्वस्थस्य स्वास्थ्यसंरक्षणमातुरस्य विकारप्रशमनञ्च।।**[2]

अपि च

**व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणं च।।**[3]

स्वस्थवृत्तस्योद्देश्यं मुख्यतः स्वास्थ्यस्य रक्षणं कथं स्यात् येन जनः नीरोगी एव तिष्ठेत्। एतदर्थम् आहारविहारादिनां समुचितव्यवस्थापनार्थं दिनचर्या-रात्रिचर्या-ऋतुचर्याणां व्यवस्था कृता वर्तते। यदुक्तम् -

**दिनचर्यां निशाचर्यामृतुचर्यां यथोदिताम्।**
**आचरन् पुरुषः स्वस्थः सदा तिष्ठति नान्यथा।।**

वस्तुतः देश-काल-प्रकृत्यनुसारं नियमानां पालनेन त्रयाणामपि दोषाणाम् (वात-पित-कफानाम्) अवस्था समाना भवति। त्रयोदशाग्नयः अपि समभावेन तिष्ठन्ति। मलक्रियाश्च समानाः भवन्ति। अनेन शरीराङ्गेषु विषमस्थितेरभावः भवति। पुनश्च मनसः आत्मनश्च प्रसन्नेन नीरोगिणः जनस्य सर्वाः क्रियाः प्राकृतरीत्या गच्छति। विकाराणामभावात् स जनः स्वस्थो भूत्वा स्वकार्याणि साधयति। अत एवोक्तम् -

---

1. काश्यपसंहिता, खिलस्थान, पञ्चमोध्यायः
2. चरकसंहिता. सू. 1.12
3. सुश्रुतसंहिता. सू. 1.14

**सर्वमन्यत्परित्यज्य शरीरमनुपालयेत्।**
**तदभावे हि भावानां सर्वाभावः शरीरीणाम्।।**[1]

अर्थादन्यकार्यं परित्यज्य सर्वादौ शरीरस्य यत्नः विधेयः। अपि च -

**नगरी नगरस्येव रथस्येव रथी यथा।**
**स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत्।।**[2]

अर्थात् यथा नगरी (राजा) सम्पूर्णनगरस्य सुरक्षायां जागरुक् भवति, सारथी च रथस्य सुरक्षायां, तथैव बुद्धिमान् पुरुषः स्वशरीरस्य रक्षणे जागरुक् भवति।

एवं रूपेण आरोग्यमभिवाञ्छन् पुरुषः स्वस्थवृत्तस्य नियमानां प्रत्यहं स्वजीवने पालनेन शारीरिक-मानसिक-सामाजिक-आध्यत्मिक-बौद्धिकदृष्ट्या स्वस्थो भूत्वा दीर्घायुरपि प्राप्नोतीत्यत्र न संशयः। यतः अस्माकं वैदिकमहर्षिणामयमाशय आसीत् यत् सर्वेऽपि जीवाः स्वस्थाः, सुखिनः, भद्रदर्शिणः भवन्त्विति। यदुक्तं हि -

**सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुःखभाग्भवेत्।।**

।।इति शम्।।

**समाश्रितग्रन्थावली -**

1. गोरक्षनाथ, चरकसंहिता, चौखम्बा प्रतिष्ठान, दिल्ली।
2. शास्त्री अम्बिकादत्त, सुश्रुत संहिता, चौखम्बा प्रतिष्ठान, दिल्ली।
3. सिंह रामहर्ष, स्वस्थवृत्त विज्ञान, चौखम्बा प्रतिष्ठान, दिल्ली।
4. बालकृष्ण आचार्य, आयुर्वेद सिद्धान्त रहस्य, दिव्य प्रकाशन, हरिद्वार।
5. नौटियाल विनोद, योग और वैकल्पिक चिकित्सा, किताब महल, इलाहाबाद।
6. डॉ. कपिल द्विवेदी, संस्कृतनिबन्धशतकम्, विश्वविद्यालयप्रकाशन, वाराणसी।

✦✦✦

1. चरकसंहिता. सू. 6.7
2. चरकसंहिता. सू. 5.13

# जयरामन्यायपञ्चाननकृता काव्यप्रकाशटीका- एकः विमर्शः

-डॉ. अनसूया महारणा*

**शोधसारः**- अलङ्कारशास्त्रेतिहासे काव्यप्रकाशः तथा तस्य रचयिता कश्मीर-प्रदेशस्य मम्मटः विश्वविश्रुतः। काव्यप्रकाशस्य अध्ययनमध्यापनञ्च तदुद्भव-कालादारभ्य अद्यावधि यथावत् रूपेण प्रचलितमस्ति। वेदान्तदर्शने शारीरकभाष्यवत् तथा व्याकरणशास्त्रे महाभाष्यमिव साहित्यशास्त्रे काव्यप्रकाशस्य अनुपमं स्थानं वर्त्तते।[1] विविध शास्त्रक्लिष्टत्वाच्च ग्रन्थस्यास्य बहवः टीकाग्रन्थाः दृश्यन्ते। ग्रन्थस्यास्य शताधिकाष्टीकाग्रन्थाः सन्ति। कथ्यते हि प्रतिदशकं काव्यप्रकाशस्य नवीना टीका प्रणीयते इति। यद्यपि काव्यप्रकाशस्य बहवः टीकाग्रन्थाः सम्पादिता प्रकाशिताश्च सन्ति, अस्य ग्रन्थस्य अनेके टीकाग्रन्थाः अद्यावधि मातृकारूपेण विद्यन्ते। तेषु अप्रकाशितेषु टीकाग्रन्थेषु जयरामन्यायपञ्चाननप्रणीता 'तिलकटीका' अन्यतमाः। प्रकृते शोधपत्रे तिलकटीकायाः परिचयः, ग्रन्थकर्तुः परिचयः, तस्य कृतयः, तिलकटीकायाः वैशिष्ट्यम् इत्यनेन विषये पर्यालोचनमस्ति।

**प्रमुखशब्दाः**- अलङ्कारशास्त्रम्, काव्यप्रकाशः, मम्मटाचार्यः, तिलकटीका, जयरामन्यायपञ्चाननः।

## उपोद्घातः-

"अलङ्कृतिरलङ्कारः"[2] अनया व्युत्पत्त्या अलङ्कारशब्दः सौन्दर्यस्य वाचको भवति। भावव्युत्पन्नो दोषापगमगुणालङ्कारसम्बलनकृतसौन्दर्यपरः तत्प्रतिपादकत्वादेव अस्य अलङ्कारनाम्ना व्यपदेशः इत्युद्भावयामः। अस्यानुसारेण गुणालङ्काराभ्यां संस्कृतशब्दार्थयोरेव काव्यशब्दस्य मुख्यव्यवहारो भवति। अलङ्कारा अपि शैल्या उत्कृष्टतायां सहायकाः भवन्ति। लौकिककटककुण्डलादयोऽलङ्कारा यथा शरीरादिकं भूषयन्ति तथा काव्यगतानुप्रासादयः शब्दार्थरूपं बाह्यं काव्यशरीरमेवालङ्कुर्वन्तीति न भ्रमितव्यम्, ते खलु काव्यात्मभूतरसमप्युपकुर्वन्तीति अवश्यमेवास्ति तेन सम्बन्धः।

---

* अनुसन्धान प्रशिक्षुः, संस्कृत अध्ययन विभागः, हैदराबाद विश्वविद्यालयः।

1. P.V. Kane-History of Sanskrit poetics.
2. भावे घञ्, पाणिनीय सूत्र- 3.3.10

काव्यशास्त्रपरम्पराप्रारम्भस्यान्वेषणं तु दुष्करमेव। किन्तु उपलब्धेषु ग्रन्थेषु भरतमुनेः नाट्यशास्त्रानन्तरं भामहाचार्यस्य काव्यालङ्कारस्य निर्देशो विद्यते। अलङ्कारशब्दस्य प्राचीनकालादेव प्रचलनप्रयोगश्च परिदृश्यते। अलङ्कारसम्प्रदायस्य प्रवर्त्तकालङ्कारिकेषु ऐतिहासिकदृष्ट्या भामहाचार्यः एव प्रथमाचार्यो वर्त्तते। तदनन्तरं काव्यशास्त्रस्य परम्परा इदानीं यावत् प्रवर्तते।

काव्यसौन्दर्यस्याधायकानि यानि गुणरीतिध्वन्यलङ्कारादितत्त्वानि अलङ्कारशास्त्रं विविनक्ति तानि सर्वाण्यपि तत्त्वानि मूलतो वेदेषु प्राप्तानि भवन्ति, तस्मादलङ्कारशास्त्रमपि स्वोत्पत्यर्थमुपादानानि सामग्रीं वा वेदेभ्य एव लेभे। अलङ्कारशब्दस्य प्राचीनकालादेव प्रचलनप्रयोगश्च परिदृश्यते। अलङ्कृतिशब्दः ऋग्वेदे 'अरङ्कृतिः' रूपेण प्राप्यते।

**का ते अस्त्यरङ्कृतिः सूक्तैः कदा नूनं ते मघ्वं दाशिम।**[1]

किञ्च, वेदवेदाङ्गादिषु केवलमलङ्कारशास्त्रस्य तत्त्वानि समुपलभ्यन्ते न च, तानि शास्त्राणि प्रत्यक्षतयाऽप्रत्यक्षतया वा तस्य शास्त्रीयं निरूपणं कुर्वाणानि दृश्यन्ते। तदीयं शास्त्रीयं निरूपणं तु भरतमुनिसमयात् प्रारब्धं भवति। नाट्यशास्त्रे भरतमुनिः अपि दृश्यकाव्यस्योत्पत्तिस्थलं वेदं मन्यते। तदुक्तम्-

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**[2]

भरतानन्तरं मेधाविरुद्रप्रभृतयः कतिपये विद्वांसोऽजायन्त। परन्तु न तेषां ग्रन्थास्समुपलभ्यन्ते। अतः भामह एव साहित्यशास्त्रस्य प्रमुखाचार्यः इति मन्यते। अलङ्कारसम्प्रदायो भामहेन प्रवर्त्तितोऽपि तद् ग्रन्थव्याख्यातृभिः रुद्रटोद्भटादिभिरेव स्थिरतां प्रापितः। काव्येऽलङ्कारस्य प्राधान्यमपि येन केनापि रूपेण दण्डिनोऽपि स्वीकृतमासीदेव। एतत्सम्प्रदायानुसारिणां मते अलङ्कारा एव काव्यजीवातवः। अलङ्कारहीनं काव्यस्वीकरणं तथैवोपहासास्पदं यथा उष्णतारहितमग्निस्वीकरणम्। एतदेवोक्तं पीयूषवर्षजयदेवेन-

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती।।**[3]

### अलङ्कारशास्त्रे काव्यप्रकाशस्य स्थानम्-

एकादशशताब्द्यां काश्मीरे लब्धजन्मा आचार्यो मम्मटः अतिप्रसिद्धः काव्यशास्त्रज्ञः आसीत्। सः "काव्यप्रकाशः" नाम ग्रन्थं व्यरचयत्। अस्य पितुर्नाम जैयटः आसीत्।

---

1. ऋग्वेद. 7.29.3.
2. नाट्यशास्त्रः- 1.17
3. चन्द्रालोकः- 1.8

मम्मटस्य पाण्डित्येन प्रायः सर्वे एव टीकाकाराः मुग्धाः आसन्। तेष्वनेके तं 'वाग्देवतावतारः' इति उपाधिना अमण्डयन्। झलकीकरनाम्ना भट्टवामनाचार्येण स्वस्य काव्यप्रकाशस्य व्याख्यायाम् अस्य काव्यप्रकाशस्य षट्चत्वारिंशट्टीकानां नामोल्लेखनं लेखनमकरोत् येन ग्रन्थस्य अस्य महत्वं ज्ञायते।

आचार्यो मम्मटः काव्यप्रकाशं प्रणीय आलङ्कारिकाणां समक्षे स्वस्मात् प्राग्वर्त्तिनां सहस्राब्देषु सञ्जातानामाचार्याणां कृतीः सम्यगवग्राह्य तासां सारभारं निहितवान्। रसगुणालङ्कारादीनां सर्वेषां महत्त्वमुपादेयत्वं वैशिष्ट्यञ्च यद्यदस्ति तत्तत् सकलं साधुतया अपि दर्शितवान्।

संस्कृतकाव्यजगतः शास्त्रीयपरम्परायां काव्यप्रकाशस्य मूर्धन्यं स्थानं निर्विवादमेव। काव्यप्रकाशः 'काव्यं प्रकाशतेऽनेन अस्मिन् वेति' विग्रहे करणाधिकरणयोश्च पुंसि संज्ञायां घः प्रायेण इति 'घ'प्रत्ययेन निष्पन्नः शब्दः। अत्र काव्यं किमिति प्रश्ने कश्चिदाह मन्मनो मनुते यदेव कवयं तदेव काव्यम्। काव्यप्रकाशः भारतीयालङ्कार-शास्त्रस्य अद्वितीयः ग्रन्थः। अलङ्कारशास्त्रे काव्यप्रकाशस्य विशिष्टं स्थानं वर्त्तते। दशषु उल्लासेषु काव्यशास्त्रस्य निरूपणमभवत्। "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति काव्यलक्षणं काव्यप्रकाशस्य अनुक्रमसूचिः। काव्यप्रकाशो हि काव्यालङ्कारग्रन्थः। असौ हि तावत्पर्यन्तानुभूतकाव्यसम्बद्धसिद्धान्तानां सारसङ्ग्रहः। अत्र हि अनेके काव्यशास्त्रसम्बन्धसिद्धान्ताः निरूपिताः। समये समये एतादृशानां मनीषिणां आचार्याणाम् आविर्भावः अभवत् यत् तैः काव्यभेदविषये नूतनमार्गः प्रशस्तः कृतः। काव्यशास्त्रे तादृशः प्रतिभासम्पन्नः व्यक्तित्वोदयः अभवत् सः मम्मटाचार्यः नाम्ना परिचितः।

**आचार्यमम्मटः-**

संस्कृतसाहित्ये मम्मटाचार्यस्य स्थानमतीवमहत्त्वपूर्णम्। ख्रीष्टब्दीयस्य एकादशशतकस्य उत्तरार्धभागे आचार्योऽयं काश्मीरभुवमलञ्चकार इति विद्वद्भिः निश्चितम्। मम्मटात्पूर्वं काव्यशास्त्रस्य क्षेत्रे ये सिद्धान्ताः निर्धारिता अभूवन् तेषां सर्वेषां सिद्धान्तानां विवेचनं कुर्वन् काव्यस्वरूपस्य तस्याङ्गानाञ्च विशदं विवेचनमकरोत्। काव्यशास्त्रे बहवः आचार्याः अभवन्। ते सर्वेऽपि काव्यशास्त्रस्य कमपि विशेषं सिद्धान्तं स्वीकृत्य स्वस्य ग्रन्थे साहित्यशास्त्रस्य विवेचनं कृतवन्तः। काव्यस्य प्राणभूततत्त्वं किम्? इति चिन्तयन्तः एते आचार्याः नानाविधसिद्धान्तानां स्थापनां कृतवन्तः। अतः आचार्यभरतात् आरभ्य जगन्नाथपर्यन्तं साहित्यस्य विविधाः विचारपरम्पराः आगताः। महामुनिभरतात् प्रवर्त्तितायाः काव्यशास्त्रधारायाः प्रवाहे मम्मटात् प्राग् रसालङ्कारः-रीतिः-वक्रोक्तिः-ध्वन्यादयो विविधा वादाः प्रचलिता लक्ष्यन्ते। रसध्वनिपरम्परा आचार्येण आनन्दवर्धनेन समर्थिता। एषा परम्परा मम्मटाचार्येण

सम्मार्जिता। आनन्दवर्धनाचार्यकृतायाः ध्वनेरुद्भावनाया अनन्तरं आचार्यभट्टनायको महिमभट्टश्च ध्वनिसिद्धान्तध्वंसाय याः याः युक्तीः समुपस्थापयामासुः तासां सर्वासां युक्तीनां खण्डनं कृत्वा मम्मटाचार्यः ध्वनिसिद्धान्तं प्रतिष्ठापितमकार्षीत्। यथा यथा ध्वनेः खण्डनं अभवत् तथा तथा ध्वनेः मण्डनपि अभवत्। यस्मिन् काले ध्वनेः विरोधः भवति स्म तस्मिन्नेव काले मम्मटाचार्यरूपि जाज्वल्यमाननक्षत्रोदयः अभवत्। तेन काव्यप्रकाशप्रहरणेन ध्वनिविरोधिनां खण्डनं कृत्वा ध्वनेः पुनः स्थापना कृता। काव्यप्रकाशोऽयमलङ्कारशास्त्रग्रन्थेष्वेकतमो निबन्धः। यस्मिन् खल्ववगते काव्यस्य निर्माणे स्वरूपदोषगुणालङ्कारादीनामवधारणे च शक्तिरुन्मिषति तदलङ्कारशास्त्रम्। काव्यप्रकाशः भारतीयालङ्कारशास्त्रस्य अद्वितीयः ग्रन्थः। अलङ्कारशास्त्रे काव्यप्रकाशस्य विशिष्टं स्थानं च वर्तते। काव्यशास्त्रमूर्धन्यभूतस्य गभीरस्य, अनपेक्षितोक्तिमधुरस्य नवशताब्दीनामनन्तरं साम्प्रतं विंशशताब्द्यामपि पूर्ववदेवोपयोगितया प्रामाणिकतया च विराजते काव्यसंसारप्रकाशकस्य मम्मटविरचितस्य काव्यप्रकाशस्य।

काव्यप्रकाशे दशोल्लासाः सन्ति यत्र नाट्यविषयं परित्यज्य काव्यशास्त्रीय समस्तविषयाणां विवेचनं दृश्यते। अस्मिन् ग्रन्थे 143 कारिकाः, 212 सूत्राणि एवं 605 सङ्ख्यकाः श्लोकाः विद्यन्ते। अत्र कारिकाः सूत्राणि च स्वयं मम्मटेन विरचिताः एवं उदाहरणानि तु अन्यत्र सङ्कलिताः।

**काव्यप्रकाशस्य टीकाः व्याख्याश्च-**

काव्यप्रकाशस्य नैकाः टीकाः अनेकाः व्याख्याश्च समुपलभ्यन्त इति विदित पूर्वमेव। अधस्तात् तासु कासाञ्चन नामानि तासां कर्तृनामानि च निर्दिश्यन्ते।जिज्ञासुभिः परिश्रमेणोपयोक्तुं शक्या एवात्र संक्षेपेणोल्लिख्यन्ते।

तत्र प्रथमा टीका आचार्यमाणिक्यचन्द्रसूरिकृता 'काव्यप्रकाशसङ्केतः[1]', द्वितीया रुय्यकापराभिधरूचककृता 'काव्यप्रकाशसङ्केतः[2]', तृतीया सोमेश्वरभट्टेन विरचिता 'काव्यादर्शसङ्केतः[3]', चतुर्थी (नरहरि) सरस्वतीतीर्थकृता 'बालचित्तानुरञ्जनीटीका[4]', पञ्चमी गुर्जरदेशपुरोहितजयन्तभट्टकृता 'काव्यप्रकाशदीपिका' (1294ख्री.) एवं 'काव्यप्रकाशविवेकः' इत्याख्या टीका श्रीधरठक्कुरतर्काचार्येण विरचिता (1225 ख्री.)। 'काव्यप्रकाश-दीपिकाटीका[5]' महामहोपाध्यायश्रीचण्डीदासेन रचिता, 'काव्यप्रकाशदर्पणः' इत्याख्या टीका विश्वनाथकविराजेन विरचिता (1300-1380

1. आनन्दाश्रमग्रन्थमाला मैसुरे च प्रकाशितम्- 1159-60 ख्री.
2. Calcutta Oriental Journal, Vol II, P-1-75
3. राजस्थान पुरातनग्रन्थमालायाम्, जोधपुर।
4. वाराणस्या कृता (टीकाकृज्जन्म 1298)।
5. वाराणस्या सरस्वतीभवनग्रन्थमालाया मुद्रिता।

ख्री.), काव्यप्रकाशस्य 'बालबोधिनीटीका[1]' वामनाचार्यझलकीकरेन रचिता (1882 ख्री.)। एवं श्रीविद्याचक्रवर्तीकृता 'सम्प्रदायप्रकाशिनी', त्रिवेन्द्रनगरे साहित्यचूडामणिना सह मुद्रिता। परमानन्दचक्रवर्तीभट्टाचार्यकृता 'विस्तारिकाटीका' वारणासीसंस्कृत-विश्वविद्यालयेन मुद्रिता। काव्यप्रकाशस्य 'सारबोधिनीटीका' श्रीवत्सलाञ्छनभट्टाचार्यैः कृता। काव्यप्रकाशस्य अपरा टीका 'मधुमतिव्याख्या' रवि (पाणि) ठक्कुरेन विरचिता। कमलाकरभट्टकृता 'कमलाकरी' टीका वाराणस्यां मुद्रिता। 'निदर्शना (सारसमुच्चयः)' राजानकेन आनन्देन रचिता। 'काव्यप्रकाशादर्शः' इत्याख्या टीकामहेश्वरभट्टाचार्येन विरचिता। भीमसेनदीवक्तकृता 'सुधासागरः' इत्याख्याटीका चौखम्बासंस्कृतग्रन्थमालायां मुद्रिता।

## प्रकृतशोधस्य उद्देश्यम्-

यद्यपि काव्यप्रकाशस्य बहवः टीकाग्रन्थाः सम्पादिता प्रकाशिताश्च सन्ति अस्य ग्रन्थस्य अनेके टीकाग्रन्थाः अद्यावधि मातृकारूपेण विद्यन्ते। तेषु अप्रकाशितेषु टीकाग्रन्थेषु जयरामन्यायपञ्चाननप्रणीतं **'तिलकटीका'** अन्यतमा। शोधप्रबन्धस्य स्वातन्त्र्यं विचिन्त्य अस्य पूर्वशोधकार्य परिशीलनं कृतम् परन्तु कुत्रापि तिलकटीकायाः सम्पादनं प्रकाशनञ्च एतावत् पर्यन्तं न जातम्। अत्र जयरामप्रणीततिलकटीकायाः पाठसमीक्षात्मकं सम्पादनम् इति शोधप्रबन्धे मम प्रयासः स्वतन्त्रः एव। एषा टीकायाः सम्पादनार्थं पूर्वशोधकार्यपरिशीलनं निरीक्षणं च मया कृतम्। अतः अस्याः टीकायाः प्रकाशनेन विद्वांसः पाठकाश्च लाभान्विताः भवेयुः अपि च तिलकव्याख्याकारः जयरामो महानैयायिकः तादृशस्य प्रसिद्धनैयायिकस्य अप्रकाशितायाः व्याख्यायाः प्रकाशोन्मुखं कार्यं येन गवेषकाः निश्चप्रचं सन्तुष्टान्तरङ्गा बभूवुः इतिशोधप्रबन्ध-वनमाशणरूपप्रयत्नः मया विधीयते।

## आचार्यः जयरामन्यायपञ्चाननः तस्य कृतयश्च-

षोडशशताब्दीकेन जयरामन्यायपञ्चाननाख्येन पण्डितेन तिलकनाम्ना काचित् टीका विरचिता। पाण्डुलिप्यागारेषु विद्यमानासु सूचिकासु एतस्याः अपरं नाम **'जयरामी टीका'** इति, **'रहस्यदीपिका'** इति च निर्दिष्टं वर्तते। एतेषाम् आचार्याणां कृतिमाध्यमेन ज्ञायते यद् अयं कश्चन महान् नैयायिकः आसीदिति। आचार्यः जयरामपण्डितस्य रामचन्द्र (रामभद्र) भट्टाचार्यसार्वभौमस्य शिष्यः, तथा जनार्दनव्यासस्य[2]

1. पुना नगरे प्रकाशितम्।
2. **न्यायसिद्धान्तमञ्जरी-** (ep.MS.No.231, Nyaya, Govt. Sanskrit Library, Banaras) Begins.... नत्वा जनार्दनव्यासो जयरामं जगद् गुरुम्। Ends- नरीनर्ति च जिह्वाग्रे यस्य वाग्देवता परा। गुरुं तं परमं नौमि जयरामाभिधं सदा।।1।। न्यायपञ्चानन-श्रीमज्जयराममुखाम्बुजात्। श्रुत्वा न्यायमशेषं तु कृतिरेषा मया कृता।।2।।

लौगाक्षीभास्करस्य[1] च गुरुः आसीत्। काव्यप्रकाशस्य व्याख्यातृषु आचार्यः श्रीवत्सलाञ्छनः स्वस्य 'सारबोधिनी' व्याख्यायां तथा आचार्यः भीमसेनः स्वस्य 'सुधासागर' टीकायाञ्च आचार्यस्य जयरामस्य नामोल्लेखं कृतवन्तौ यस्मात् इदं ज्ञायते यद् अयम् आचार्यः जयरामः तेषां पूर्ववर्त्ती टीकाकारः इति। एवमेव पण्डितः विश्वेश्वरः स्वस्य 'अलङ्कारकौस्तुभः' इति ग्रन्थे सर्वप्रथमम् अस्य आचार्यस्य नाम 'जयरामन्यायपञ्चानन' इति निर्दिशति। आचार्यः जयरामः "तत्त्वचिन्तामणिदीधितिः" इत्यस्य ग्रन्थस्य प्रणेतुः रघुनाथशिरोमणेः परवर्त्ती नैयायिकः, यतोहि सः तत्त्वचिन्तामणिदीधितिग्रन्थस्योपरि टीकां विरचितवान्। अस्य जयरामाचार्यस्य कृतिषु "न्यायसिद्धान्तमाला" इति ग्रन्थे अस्य कालः 1750 सम्वत् (1694ख्री) इति निर्दिष्टः। अयं वङ्गदेशीयः। कृष्णानगरस्य वङ्गप्रदेशस्य राजा रामकृष्णः तस्य आश्रयिता आसीत्। जयरामन्यायपञ्चाननभट्टाचार्यः न्यायशास्त्रे महानैपुण्यं प्राप्तवानासीत्। अतः न्यायशास्त्रे बहून् ग्रन्थान् व्यरचयत्। यथा-

- ➢ न्यायसिद्धान्तमाला[2] (न्यायसूत्रव्याख्या)
- ➢ पदार्थमाला[3]
- ➢ न्यायकुसुमाञ्जलीकारिकाव्याख्या
- ➢ तत्वचिन्तामणीदीधितिटीकाग्रन्थः- "गूढार्थविद्योतनी"[4] इत्याख्यः।
- ➢ तत्त्वचिन्तामण्यालोकविवेकः (रहस्यम्)- जयदेवस्य आलोकस्य उपरि उपटीका/उपव्याख्या।
- ➢ गुणकिरणावलिप्रकाशदीधितिविवृतिः- दीधितेः उपटीका, 'किरणावलि' ग्रन्थस्योपरि वर्द्धमानस्य टीकायाः उपव्याख्या।

एतदतिरिच्य पाण्डुलिप्यागारसूचिकासु एतस्य अन्येषां ग्रन्थानां नामानि प्राप्यन्ते। परं कदाचित् ते ग्रन्थाः पूर्वोक्तानां ग्रन्थानामेव कश्चन भागः स्यात् इति विद्वद्भिः

---

1. **पदार्थमालाप्रकाश**- Fol. 4 (MS.No. 921. Nyaya. Govt. Sanskrit Library] Banaras)- श्रीमता सकलशास्त्रपारंगमत्वजनित तेजोविशेषवता तत्तद्वादिनिरासप्रसूतजयो रमतेऽस्मिन्नित्यन्वर्थ जयरामसंज्ञावृता .... पदार्थानां द्रव्यगुणादीनां माला तत्प्रतिपादकशब्द-विशेषाणां विलक्षणविन्यासरूपा तन्नामको ग्रन्थविशेष इति यावत्। ....स्वग्रन्थे निवेशितायाः पदार्थमालासंज्ञायाः।
2. गोपिनाथ कविराजः अनेन आचार्येण इदं पुस्तकं सम्पादितं प्रकाशितञ्च।
3. In his न्यायसिद्धान्तमाला he refers three times (pp 4, 7, 9) to his पदार्थमाला।
4. (In MS. No 466, Nyaya section, Govt. Sanskrit library, Banaras)-
श्रीविश्वेशमशेषमङ्गलभुवं भूयोऽभिवाद्यादरान्। मूर्ध्न्याधाय च रामभद्रचरणद्वन्वारविन्दद्वयम्। गूढाज्ञानघनावृता न विषयपोद्बोधिनी दीधितिम्। तस्माच्छ्रीजयराम एष तनुते गूढार्थविद्योतनम्।।

चिन्त्यते। तानि च नामानि-

अन्यथाख्यातितत्त्वम्, शब्दालोकरहस्यम्, शब्दालोकविवेकः, आकांक्षावादः, सन्निकर्षतत्त्वविवेकः, आख्यातवादटिप्पणी आख्यातवादव्याख्यासुधा, समासवादः, उद्देश्यविधेयबोधस्थलीविचारः, सामग्रीवादः, कारकव्याख्या 'कारकवादः', सामान्यलक्षणदीधीतिटिप्पणी, जातिपक्षवादः, जयरामीन्यायः, विशिष्टवैशिष्ट्यवादः, सन्निकर्षवादः, विषयतावादः, लघुसन्निकर्षवादः, व्याप्तिवादटीका, नञर्थविवृतितत्त्वविवरणम्, उपाधिवादः, गुणशिरोमणिटीका, पक्षतावादः, पदार्थखण्डनम्, प्रतियोगितावादः, अनुमानजयरामी, व्युत्पत्तिवादटिप्पणी, समासतत्त्वम्, स्वत्वनिरूपणम्, स्वत्ववादः।

## आचार्यस्य जयरामस्य काव्यप्रकाशटीकाः-

महान् नैयायिकस्सन् अपि एते आचार्याः अलङ्कारशास्त्रेऽपि निपुणतां प्राप्तवन्तः इति एतेन विरचितया तिलकनाम्न्या टीकया ज्ञायते। पाण्डुलिप्यागारसूचिकाभ्यः एतत् टीकामधिकृत्य केचन सङ्केताः समुपलभ्यन्ते। तत्र प्रधानतया **चेन्नैनगरे अडयार्** इति दीयमाने स्थले विद्यमाने पाण्डुलिप्यागारे अस्याः टीकायाः पुरातनीया प्रतिकृतिः काचित् उपलभ्यते। यद्यपि इयं प्रतिकृतिः अपूर्णा तथापि भागः समुपलभ्यते। तन्नाम आदितः तृतीयोल्लासपर्यन्तस्य ग्रन्थस्य टीका, तथा षष्ठोल्लासादारभ्य अष्टमोल्लासपर्यन्तस्य ग्रन्थस्य टीका इति षण्णां उल्लासानां टीकाभागाः समुपलभ्यन्ते।

तथा **मैसूरुनगरस्य पौरस्त्यानुसन्धानकेन्द्रे** अस्या टीकायाः द्वे मातृके समुपलभ्येते। तयोः एकस्यां मातृकायां प्रथमोल्लासादारभ्य नवमोल्लासपर्यन्तस्य ग्रन्थभागस्य टीका समुपलभ्यते। अन्यस्याञ्च प्रतिकृतौ दशमोल्लासभागः समुपलभ्यते। तस्मात् एका एव मातृका कदाचित् द्विधा विभक्ता स्यात् इति ऊहितुं शक्नुमः। एवं **भण्डारकरपौरस्त्यानुसन्धानकेन्द्रे** अस्याः टीकायाः काचित् कर्गजपत्रप्रतिकृतिः उल्लासत्रयात्मिका समुपलभ्यते।

एतदतिरिच्य श्रीकृष्णशर्मणः रसप्रकाशटीकया सह प्रकाशितस्य काव्यप्रकाशस्य पुस्तके एतस्याः टीकायाः सम्पूर्णा एका कर्गजपत्रप्रतिकृतिः वाराणसीनगरस्य सरस्वतीभवनस्य ग्रन्थागारे समुपलभ्यते इति निर्दिष्टं वर्त्तते। राजस्थानमध्येऽपि च मिथिलायामपि अस्याः टीकायाः प्रतिकृतयः सन्ति इति काटालोगमध्ये सूचितमस्ति। इत्थञ्च अस्याः टीकायाः प्रतिकृतयः सप्त इति एभ्यः सङ्केतेभ्यः ज्ञायते।

## तिलकटीकायाः वैशिष्ट्यम्-

ख्रीष्टीयषोडशशताब्दीतः एव एतैः प्रौढनैयायिकैः पण्डितप्रवरैः श्रीजयरामन्यायपञ्चाननभट्टाचार्यैः काव्यप्रकाशतिलकनाम्ना टीका व्यरचि। तत्र भट्टाचार्यशब्दो वङ्गप्रान्तेषु

प्राचीनादेव कालात् न्यायशास्त्रप्रवीणेषु रूढ इति सुप्रज्ञातमेव विदुषाम्। नैयायिकस्य जयरामन्यायपञ्चाननस्य तिलकटीका इति विषये किञ्चिदिह प्रतिपाद्यते–

प्राय: प्रसिद्धै: प्राचीनै: पण्डितैर्विशेषतो नैयायिकै: काव्यप्रकाशे टीका विरचयद्भिर्बहु पराक्रान्तम्, तत्र हेतु: काव्यप्रकाशस्य पठनपाठनादौ विपुलप्रचारशालित्वं, बह्वर्थगर्भपरिमिताक्षरवत्वं, मान्यतमत्वं चेति मन्यामहे। तत्र काव्यप्रकाशस्य वह्वीषु टीकासु जयरामकृततिलकटीका एव सर्वा: अतिशेते, यतोऽस्यां विस्तृतायां टीकायां कारिकावृत्त्युदाहरणानां पृथक् पृथक् व्याख्यानानि सोपपत्तिकानि विस्तृतानि च सन्ति। प्राचीनानां टीकाकाराणां मतानि च क्वचित्साधकतया निर्दिष्टानि। प्राचीनेषु टीकाकारेषु प्रथमोल्लासे "इति मिश्रा:" इत्यादिपदेन सुबुद्धिमिश्र:, "प्रदीपकार:" इत्यनेन गोविन्दठक्कुरपकृत: काव्यप्रदीपस्य, "दर्पणकार:" इत्यादिना च काव्यप्रकाश-दर्पणकृतो विश्वनाथस्य च नामानि अस्यां टीकायां समुल्लिखितानि। काव्यप्रकाशस्य टीकाकार: परमानन्दचक्रवर्त्याचार्यं बहुवारं निर्दिशति, अपि च "महामहोपाध्याय-चण्डीदासस्य" मतं समुल्लिखितम्। एवमेव अन्यत्र "मण्डनाचार्यस्य" मतञ्च दूषयति। वाक्यपदीयकारस्य "भर्तृहरे:" मतमपि स्वटीकायाम् उल्लिखति। एवमेव काव्यप्रकाशस्य अप्रकाशितटीकाया: टीकाकार: मुरारीमिश्रस्य मतञ्च उल्लिखति। अपि च ध्वन्यालोककार: 'आनन्दवर्धनाचार्य:', 'अलङ्कारसर्वस्वकार:', 'दशरूपककार:', 'कालिदास:', 'भामह:' एतेषामाचार्याणां श्लोकानां विवरणं अस्यां टीकायां प्राप्यते। टीकायां मध्ये पाणिनीयसूत्राणां, न्यायवाक्यानां प्रयोग: दृश्यन्ते। एवमेव पञ्चमोल्लासे वेदमन्त्राणां बहुप्रयोग: टीकाकारै: क्रियते।

काव्यप्रकाशस्य त्रय अंशा: कारिकावृत्त्युदाहरणञ्च। कारिकाभाग: सूत्र इति नाम्ना ज्ञायते। एतत् सूत्राणां व्याख्याभाग: वृत्ति: नाम्ना व्यवह्रियते। अस्मिन् ग्रन्थे उदाहरणानि अन्यग्रन्थात् नीयन्ते मात्र कारिका एवं वृत्तिभागस्य रचयिता सम्बन्धे मतभेद: दृश्यते। परन्तु काव्यप्रकाशस्य कारिकाभाग: वृत्तिभागस्यच कर्ता मम्मट: एव अस्य नास्ति सन्देह:।

भरतमुनिप्रणीता या कारिका सा अलङ्कारसूत्रनाम्ना व्यवह्रियते मम्मटप्रणीता तु वृत्ति: सैव काव्यप्रकाशनामभाक् इति वङ्गीयानां प्रवाद:। किन्तु टीकाकार: जयराम: कारिकाकर्ता वृत्तिकर्ताश्च अभिन्न: एव स्वटीकायाम् उल्लिखति।

**प्रकृतशोधस्य फलानि–**

अप्रकाशिताया एतस्या मातृकायास्सम्पादनस्य फलम् एतद्भवति यत्–

- न्यायदर्शनविचक्षणस्य जयरामभट्टाचार्यस्य काव्यप्रकाशमधिकृत्य प्रमाणभूतमाशयं वयं ज्ञातुं प्रभवाम:।

- काव्यप्रकाशग्रन्थस्य नूतना एका टीका प्रकाशयिष्यते।
- अलङ्कारशास्त्रवाङ्मये नूतनव्याख्याग्रन्थस्य परिचयः सम्पादनञ्च।
- मम्मटाचार्याणां काव्यप्रकाशग्रन्थस्य सुलभावगमाय एकस्य उपकरणस्य आविष्कारः।
- भारतीयज्ञानपरम्परायां (Indian knowledge System) पाण्डुलिपिविज्ञानस्य महत्त्वप्रतिपादनम्।
- अनेन प्रकारेण काव्यप्रकाशस्य महत्त्वमपि समेधत इति मम विश्वासः।

**उपसंहारः-**

संस्कृतसाहित्यस्य महान् लक्षणग्रन्थः मम्मटाचार्यस्य काव्यप्रकाशः काव्य-स्वरुपस्यावगमनार्थं संस्कृतकाव्यशास्त्रीणां निमित्तं अद्यावधि प्रामाणिकग्रन्थः वर्त्तते। काव्यशास्त्रस्य सर्वोत्तमसाररूपतत्त्वानां सङ्कलनं कृत्वा काव्यप्रकाशे तेषां तत्त्वानां सम्यग् उपस्थापनं कृतम्। पूर्वाचार्याणां विषयप्रतिपादने याः न्यूनताः आसन् ताः विषयदृष्ट्या परिपूर्णाः भवेयुः तदर्थं प्रयत्नः कृतः एवमेव साहित्यशास्त्रस्य रसध्वनिगुणदोषालङ्कारादितत्त्वानां यथार्थ मूल्याङ्कनं कृत्वा काव्यप्रकाशे तेषां संस्थापनमपि कृतम्। सङ्क्षेपेण सूत्रशैल्या परिमितशब्दैः विशेषविषयाणां प्रतिपादनं मम्मटाचार्यैः स्वीयकाव्यप्रकाशे क्रियते। काव्यप्रकाशस्य बहवः टीकाग्रन्थाः सन्ति परन्तु तिलक-टीकातुल्यं विस्तरेण विषयाणां प्रतिपादनं नान्यत्र दृश्यते इति टीकायाः किञ्चित् माहात्म्यम्। प्रस्तुतं शोधप्रपत्रम् मम पिएच्. डि. शोधप्रबन्धस्योपरि आधारितः भवति। शोधप्रबन्धार्थं मया काव्यप्रकाशस्य तिलकटीकायाः तिस्त्रः मातृकाः स्वीकृत्य तेषां सम्पादनमध्ययनञ्च कृतम्।

**सन्दर्भाः-**

- डॉ. जगदीश चन्द्र मिश्रः, 2017, अलङ्कारशास्यस्येतिहासः, चौखम्बा सुरभारती प्रकाशन, के. 37/ 117, गोपालमन्दिर लेन, वाराणसी- 221001।
- झलकीकरभट्टवामनाचार्य, 1933, काव्यप्रकाशः- बालबोधिनी टीका, Bhandarkar Institute Press, Bhandarkar Oriental Research Institute, Poona- 4.
- आचार्य विश्वेश्वर सिद्धान्तशिरोमणि, काव्यप्रकाशः, ज्ञानमण्डल लिमिटेड, "आज" भवन, सन्त कबिर मार्ग, वाराणसी- 221001.
- डॉ. सत्यव्रत सिंह , काव्यप्रकाशः, चौखम्बा विद्याभवन, वाराणसी- 221001।

- Dr. S.N. Ghosal Sastri, 1973, Kāvyaprakāśa-commentary Rasaprakāśa, Chaukhamba Sanskrit Series Office, Varanasi.
- P.V. Kane, 1972, History of Sanskrit poetics, Motilal Banarasi Das publishers, Delhi.
- S.K.De, 1925, History of Sanskrit poetics-Vol-II, Calcutta Oriental press, 107, Calcutta-1925.
- Gopinatha Kaviraja, 1928, Nyāya Siddhānta Mālā, Jayakrishna Dasgupta vidya vihara press, Gopala Mandir Lane, Banaras City.
- Theodor Aufrecht, Leipzig, 1891, Catalogues Catalogorum.
- S. Kuppuswami Sastri, Prof, P.P. Subhramanya Sastri, C. Kunhan raja, 1937, New Catalogues Catalogorum, University of Madras.


✦✦✦

संस्कृतविमर्शः ( जुलाई-दिसम्बर 2022 ) अङ्कः-23 ISSN : 0975-1769

# शिशुपालवधस्य सर्वङ्कषाटीकायाः कोशोद्धृतीनां प्रामाणिकताविचारः

-डॉ. मृत्युञ्जयगराँइ *

**प्रबन्धसारः**

महाकविमाघकृतं शिशुपालवधमिति महाकाव्यं पण्डितसमाजे विशेषादृतम्। महाकाव्यस्यास्य सम्यगर्थबोधे बहवष्टीकाः विरचिताः सन्ति। तासु मल्लिनाथकृता 'सर्वङ्कषा'नाम्नी टीकाऽतीवोत्कृष्टा। अन्वयमुखेन टीकायामस्यां सर्वेषां श्लोकानां हृदयग्राही व्याख्या प्रदत्ता। श्लोकस्थितानां शब्दानां पदानां वा सम्यगर्थं प्रतिपादयितुं टीकायामस्याम् अमर-विश्वप्रकाश-मेदिनी-हलायुध-वैजयन्ती-अनेकार्थसंग्रह-त्रिकाण्ड-शाश्वतकोशादीनामुद्धृतिः बहुत्र प्रतिपादिता। परन्तु एतासामुद्धृतीनां प्रामाणिकताऽस्ति न वेति शङ्का सततमुपजायते विद्वद्भिः। एवं शङ्कानिवारणे प्रबन्धेऽस्मिन् प्रयत्नः क्रियते।

**सङ्केतशब्दाः**

कोशः, शिशुपालवधम्, सर्वङ्कषाटीका, अमरकोषः, विश्वप्रकाशः, हलायुधकोशः, वैजयन्तीकोषः, मेदिनीकोशः, शाश्वतकोशः।

**प्रस्तावना**

संस्कृतमहाकाव्यधारायां शिशुपालवधस्य प्रशस्तं स्थानमस्ति। विंशतिसर्गेषु महाभारतीयां कथामाश्रित्य महाकविमाघेन प्रणीतमिदं काव्यम्। संस्कृतसाहित्ये पाण्डित्यमयीशैल्याः चरमोत्कर्षो दृश्यते शिशुपालवधे। शब्दवैचित्र्यं खलु महाकाव्यस्यास्य महत् वैशिष्ट्यम्। महाकविमाघस्य नवीन-नूतन-शब्दानां सङ्गीतात्मकझंकारोऽर्थबोधस्य प्रतीक्षारहितेऽपि समाकर्षति सर्वान् हृदयान्। अतः सहृदयानां समीपे माघकाव्यं तावदतीव जनप्रियकाव्यम्। अत्यधिकजनप्रियत्वात् महाकाव्यस्यास्य काले काले विद्वद्भिः बहवष्टीकाः विरचिताः सन्ति। तासु 'सर्वङ्कषा' नाम्नी टीका अतीवोत्कृष्टा। दक्षिणभारतीय-महोपाध्याय-कोलाचल-मल्लिनाथसूरी अस्याः टीकायाः स्रष्टा।

* सहायकाचार्यः (अंशकालिकः), रामकृष्णमहाविद्यालयः, मधुबनी, बिहारः।

अन्वयमुखेन शिशुपालवधस्य सर्वश्लोकानां हृदयग्राही व्याख्या प्रदत्ता सर्वङ्कषायाम्। व्याख्यानकाले प्रसङ्गानुसारेणात्रालंकार-व्याकरण-दर्शन-काम-कोश-धर्म-सङ्गीत-ज्योतिष-नीतिशास्त्रादीनामालोचनमपि परिलक्ष्यते। एवमालोचनं न तु अमूलकमपितु युक्तिनिष्ठम्। यथोक्तं श्रीमता मल्लिनाथेन-

**इहान्वयमुखेनैव सर्वं व्याख्यायते मया।**
**नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते।।**[1]

वस्तुतस्तु एषु आलोचनेषु कोशात्मिकालोचनाऽतीव मनोग्राही। शिशुपालवधस्य बहूनां ख्याताख्यात-दुरूहशब्दानां पदानां वार्थसमर्थने मल्लिनाथेन बहुविधाः कोशोद्धृतयः प्रदत्ताः। शिशुपालवधस्यार्थबोधे रसबोधे च यासां महान् उपयोगोऽस्ति। श्लोकानां सम्यगर्थं प्रतिपादयितुं टीकायामस्यां बहुत्रामर-विश्वप्रकाश-मेदिनी-हलायुध-वैजयन्ती-अनेकार्थसंग्रह-त्रिकाण्डशेष-शाश्वतकोशादीनामुद्धृतिः प्रतिपादिता। एवमुद्धृतीनां प्रामाणिकताऽस्ति न वेति शङ्का जायते विद्वद्भिः। एवं शङ्कानिवारणेऽत्र प्रयत्नः कृतः। विंशतिसर्गेषु एवं बहुविधा उद्धृतयः सर्वङ्कषाटीकायां परिदृश्यन्ते। परन्तु विस्तृतिभयात् कतिपयानामुद्धृतीनां प्रामाणिकताविश्लेषणमत्र सम्यकतया प्रतिपाद्यते।

**अमरकोषः**

संस्कृतवाङ्मये कोशशास्त्रपरम्परायां प्रख्यातः कोशग्रन्थस्तावत् अमरकोषः। अमरसिंहोऽस्य प्रणेता। 'नामलिङ्गानुशासनम्' इत्येतदस्यापरं नाम। स्वर्गादिकाण्डं, भूवर्गादिकाण्डं, सामान्यादिकाण्डं चेत्यत्र त्रीणि काण्डानि सन्ति। काण्डत्रयेऽत्रानेके वर्गाः सन्ति। टीकाकारमल्लिनाथेनार्थव्याख्यायाः समर्थनेऽमरकोशस्य बहुविधा उद्धृतिः प्रदत्ता सर्वङ्कषाटीकायाम्। तासां कतिपयानां विश्लेषणमत्र प्रदर्शितम्।

**1. पतत्पतङ्गप्रतिमस्तपोनिधिः।** (शिशु.1/12)

शिशुपालवधस्य पद्येऽस्मिन् 'पतङ्गः' इत्यस्य पदस्यार्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-

"पतन् यः पतङ्गः सूर्यः स प्रतिमोपमानं यस्य सः। 'पतङ्गौ पक्षिसूर्यौ च' इत्यमरः।"

'पतङ्ग' शब्दस्तावत् पुंलिङ्गशब्दः। कोशशास्त्रे पक्षि तथा सूर्यार्थे शब्दोऽयं प्रयुज्यते। मल्लिनाथेनात्र सूर्यार्थे एव शब्दोऽयं व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन अमरकोशस्योद्धृतिः प्रदत्ता। अमरकोषग्रन्थस्य तृतीय-काण्डस्य तृतीये वर्गे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता उद्धृतिः एवमेवास्ति-

---

1. सर्वङ्कषा, भूमिकाश्लोकः 8

**पतङ्गौ पक्षिसूर्यौ च पूगः क्रमूकवृन्दयोः।**
**पशवोऽपि मृगाः वेगः प्रवाहजवयोरपि॥** (अमर. 3/3/20)

**2. तपेन वर्षाः शरदा हिमागमो।** (शिशु.1/66)
**'वर्षाः'**

सर्व. "वर्षा प्रावृट् तपेन ग्रीष्मेण। 'स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम्' इति चामरः।"

संस्कृतभाषायां 'वर्षा' खलु स्त्रीलिङ्गान्तः तथा नित्यबहुवचनान्तशब्दः। आषाढः श्रावणः इति मासद्वयं तावत् वर्षाकालः। प्रावृट् इति वर्षा-शब्दस्य नामान्तरम्। टीकाकारेण मल्लिनाथेनात्र प्रावृट्-अर्थे हि शब्दोऽयं व्याख्यातः। व्याख्यानस्यास्य समर्थने तेन अमरकोशस्य उद्धृतिः प्रदत्ता। अमरकोषग्रन्थस्य प्रथम-काण्डस्य चतुर्थे वर्गे एवमुद्धृतिः परिलक्षिता। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः।**
**स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्स्त्रियाम्॥**[1]

**3. उदितं प्रियां प्रति सहार्दमिति।** (शिशु. 9/69)

'हार्दम्'

सर्व. "प्रियां प्रति प्रियामुद्दिश्य हृदयस्येदं हार्दं प्रेम। 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः।"

कोशग्रन्थे 'प्रेमन्' इति शब्दस्य प्रेमन् (पुं-प्रेमा), प्रियता, हार्द, प्रेमन् (क्ली०-प्रेम), स्नेह चेति नामान्तराणि सन्ति। टीकाकारेण मल्लिनाथेनापि 'हार्द' इति शब्दोऽत्र प्रेमार्थे स्नेहार्थे वा प्रयुक्तः। एवमर्थसमर्थने तेन अमरकोशस्य उद्धृतिः प्रतिपद्यते। अमरकोषग्रन्थस्य प्रथम-काण्डस्य सप्तमवर्गे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः-

**प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम्।**
**इच्छाकाङ्‌खा स्पृहेहा तृड्‌वाञ्छा लिप्सा मनोरथः॥**

(अमरकोषः, 1/7/27)

**विश्वप्रकाशः**

श्रीमहेश्वरसूरिणा प्रणीतः प्रख्यातः कोशग्रन्थस्तावत् विश्वप्रकाशः। ग्रन्थेऽस्मिन् मुख्यतया प्रकरणद्वयं वर्तते- वर्णप्रकरणम्, अव्ययप्रकरणं चेति। कोशस्यास्य सर्वङ्कषायां बहुविधा उद्धृतिः परिदृष्टा। तासां कतिपयानि निदर्शनानि-

---

1. अमरकोषः 1/4/19

**4. अनन्यगुर्वास्तव केन केवलः।** (शिशु. 1/35)

शिशुपालवधस्य पद्येऽस्मिन् 'केवलः' इत्यस्य पदस्यार्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्–

"केवलः कृत्स्नः। 'केवलः कृत्स्न एकः स्यात्केवलश्चावधारणे' इति विश्वः।"

'केवल' इत्येवं शब्दः त्रीषु लिङ्गेष्वेव प्रयुक्तः। कोशशास्त्रेऽस्य निश्चितः, एकः, कृत्स्नः (समग्रः), निर्णयः, ज्ञानम्, कुहनादयो बहुविधा अर्थाः परिदृश्यन्ते मल्लिनाथेनात्र 'केवल' शब्दः पुंलिङ्गे कृत्स्नार्थे समग्रार्थे वा व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन विश्वप्रकाशस्योद्धृतिः प्रदत्ता। विश्वप्रकाशग्रन्थस्य लान्तवर्गे एवमुद्धृति ईषदन्यरूपेण परिदृष्टा। तत्र प्राप्ता उद्धृतिः एवमेवास्ति–

**केवलो ज्ञानभेदे स्यात् केवलश्चौककृत्स्नयोः।**
**निर्णीते केवलश्चोक्तं केवलः कुहने क्वचित्॥**[1]

**5. अन्यैव लक्ष्मीरिति युक्तमेतत्।** (शिशु. 3/12)

**'लक्ष्मीः'**

सर्व. "लक्ष्मी शोभा पद्मा च। 'शोभा सम्पत्तिपद्मासु लक्ष्मीः श्रीरपि गद्यते' इति विश्वः।"

'लक्ष्मी' इत्यस्य स्त्रीलिङ्ग-शब्दस्य कोशशास्त्रे विष्णुपत्नी-शोभा-सम्पत्ति-पद्म-श्री-मुक्तादयोऽर्थाः परिदृश्यन्ते। टीकाकारेण मल्लिनाथेनात्र शोभार्थे तथा पद्मार्थे शब्दोऽयं व्याख्यातः। एवमर्थस्य समर्थने तेन विश्वप्रकाशस्य उद्धृतिः प्रदत्ता। विश्वप्रकाशस्य अनेकार्थशब्दपरिच्छेदे मान्तवर्गे मल्लिनाथेनोक्ता उद्धृतिरियमन्यरूपेण प्राप्ता। तत्रोक्ता सम्पूर्णा उद्धृतिः एवमेवास्ति–

**लक्ष्मीः श्रीशिवसम्पत्तिपद्मशोभाप्रियङ्गुषु।**
**किर्मी पलाशे शालायां हेमपुत्र्यामुदीरिता॥**[2]

**6. स्तोकेन नाक्रमत वल्लभपालमच्चैः।** (शिशु. 5/56)

**'वल्लभः'**

सर्व. "वल्लभपालमुत्तमाश्वपालम्। 'वल्लभो दयितेऽध्यक्षे कुलीनेऽश्वेऽपि वल्लभः' इति विश्वः।"

---

1. विश्वप्रकाशः, अनेकार्थशब्दपरिच्छेदः/ लान्तवर्गः/ लत्रिकम्, 134।
2. विश्वप्रकाशः, अनेकार्थशब्दपरिच्छेदः/ मान्तवर्गः/ मद्विकम्, 30।

'वल्लभ' इत्यस्य पुंलिङ्ग-शब्दस्य कोशशास्त्रे प्रिय-अध्यक्ष-उत्तमाश्वादयोऽर्थाः लक्ष्यन्ते। मल्लिनाथेनात्र उत्तमाश्वार्थे एव शब्दोऽयं व्याख्यातः। अस्यार्थस्य समर्थने विश्वप्रकाशस्य उद्धृतिः तेन प्रदत्ता। विश्वप्रकाशस्य प्रथमे परिच्छेदे भान्तवर्गे मल्लिनाथेनोक्ता उद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**वल्लभो दयितेऽध्यक्षे कुलीनाश्वे च वल्लभः।**
**दुर्लभः कर्चूरे न्याये दुष्प्राप्ये वल्लभेऽपि च॥**[1]

## हलायुधकोशः अभिधानरत्नमाला वा

भट्टहलायुधप्रणीतः 'अभिधानरत्नमाला' नाम कश्चन् प्राचीनकोशः। ग्रन्थकारस्य नामानुसारेण यस्य कोशस्य ख्यातिः सर्वत्र परिव्याप्ता। कोशेऽस्मिन् स्वर्ग-भूमि-पाताल-सामान्य-अनेकार्थकाण्डानि सन्ति कोशस्यास्योद्धृतिः निम्ने विश्लेषिता-

**7. कुलैर्न भेजे फणिनां भुजङ्गता।** (शिशु. 1/63)

**'भुजङ्गता'**

सर्व. "फणिनां सर्पाणां कुलैर्वर्गैर्भुजङ्गता सर्पता, विटत्वं च। 'भुजङ्गो विटसर्पयोः' इति हलायुधः।"

कोशग्रन्थे 'सर्प' इत्यस्य विषधर-पृदाकु-भुजग-भुजङ्ग-अहि-आशीविष-चक्रिन्-व्याल-सरीसृप-कुण्डलिन्-गूढ़पाद-फणिन्-दर्वीकर-दीर्घपृष्ठ-दन्दशूक-विलेशय-उरग-पन्नग-भोगीन्-जिह्मग-पवनाशन-गोकर्ण-कञ्चुकिन्-कुम्भीनस्-फणधर-भोगधर-व्याड-द्विजिह्व-व्याल-सर्पादीनि बहूनि नामान्तराणि परिलक्षितानि। टीकाकारेण मल्लिनाथेनापि 'भुजङ्गता' इत्येवं शब्दोऽत्र सर्पस्यैव पर्यायरूपेण व्याख्यातः। व्याख्यानस्यास्य समर्थने तेन हलायुधकृतस्य हलायुधकोशस्य अभिधानरत्नमालायाः वा उद्धृतिः प्रदत्ता। हलायुधकोशस्य 'पातालकाण्डम्' नाम तृतीये काण्डे एवमुद्धृति ईषदन्यरूपेण परिलक्षिता। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**विषधरदन्दशूकपवनाशनसर्पसरीसृपोरगव्याल-**
**भुजगभुजङ्गकुम्भीनसपन्नगनागभोगिनः।**
**अहिफणभृत्पृदाकुकाकोदरकञ्चुकिचक्रिगूढपाद्**
**द्विरसनकाद्रवेयदर्वीकरदृक्श्रुतयो भुजङ्गमाः॥**[2]

---

1. विश्वप्रकाशः, अनेकार्थशब्दपरिच्छेदः/ भान्तवर्गः/ भत्रिकम्, 26
2. हलायुधकोशः, 3/18

**8. गण्डूषमुज्झितवता पयसः सरोषम्।** (शिशु. 5/36)

**'गण्डूषम्'**

सर्व. "गण्डूषं मुखपूरणम्। मुखान्तर्गतं पय इत्यर्थः। 'गण्डूषो मुखपूरणः' इति हलायुधः।"

'गण्डूष' इत्यस्य पुंलिङ्ग-शब्दस्य कोशशास्त्रे मुखपूरण-प्रसृतिपरिमित-हस्तिशुण्डाग्रभागादयोऽर्थाः परिदृश्यन्ते। मल्लिनाथेनात्र मुखपूरणार्थे हि'गण्डूष'-शब्दस्योल्लेखः कृतः। अस्य समर्थने तेन हलायुधकोशस्योद्धृतिः प्रदत्ता। हलायुधकोशस्य 'सामान्यकाण्डम्' नाम चतुर्थकाण्डे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः-

**सिंहनादो भवेत् क्ष्वेडा गण्डूषो मुखपूरणम्।**
**प्रभावतां वदन्त्यार्याः प्रभुतां प्रभविष्णुताम्॥**[1]

**वैजयन्तीकोषः**

कोशशास्त्रपरम्परायां सुबृहत् कोशस्तावत् वैजयन्तीकोषः। यादवप्रकाशाचार्येण विरचितोऽयं कोशः। अत्राष्ट काण्डाः परिदृश्यन्ते। तद्यथा- स्वर्गकाण्डः, अन्तरिक्ष-काण्डः, भूमिकाण्डः, पातालकाण्डः, सामान्यकाण्डः, द्व्यक्षरकाण्डः, त्र्यक्षरकाण्डः, शेषकाण्डश्चेति। सर्वङ्कषायामस्य कोशस्य बहुविधा उद्धृतिरस्ति। तद्यथा-

**9. स मुग्धकान्तास्तनसङ्गभङ्गुरैः।** (शिशु. 1/47)

शिशुपालवधस्य पद्येऽस्मिन् 'मुग्धौ' इत्यस्य पदस्यार्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-

**मुग्धौ नवौ 'मुग्धः सौम्ये नवे मूढे' इति वैजयन्ती।**

कोशग्रन्थे सौम्य-नव-मूढ-मोहिनि-कोमलादिष्वर्थेषु 'मुग्ध' इति शब्दस्य प्रयोगोऽस्ति। मल्लिनाथेनात्र नवार्थे 'मुग्ध' इति शब्दो व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन वैजयन्तीकोशस्योद्धृतिः प्रदत्ता। वैजयन्तीकोशग्रन्थस्य 'द्व्यक्षरकाण्डम्' नाम षष्ठकाण्डस्य 'अर्थवल्लिङ्गाध्यायः' नाम चतुर्थेऽध्याये एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता उद्धृतिः एवमेवास्ति-

**मुग्धं सौम्ये नवे मूढे मूढो मोहिनि तन्द्रिते।**
**मृद्वतीक्ष्णे कोमले च बद्धोपरतयोर्यतः॥** (वैजयन्ती० 6/4/12)

---

1. हलायुधकोशः, 4/100

**10. तमःस्वभावेस्तेऽप्यनं प्रदोषमनुयायिनः।** (शिशु. 1/47)

**'प्रदोषम्'**

सर्व. "प्रदोषं प्रकृष्टदोषम्। 'प्रदोषो दुष्टरात्र्यंशौ' इति वैजयन्ती।"

'प्रदोष' इति शब्दस्तावत् कोशशास्त्रे रात्रिप्रारम्भार्थे दुष्टरात्रिरित्यर्थे वा प्रयुज्यते। मल्लिनाथेनापि 'प्रदोष' इति शब्दोऽत्र 'दुष्टरात्रिः'-इत्यर्थे व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन वैजयन्तीकोशस्योद्धृतिः प्रदत्ता। वैजयन्तीकोशग्रन्थस्य 'त्र्यक्षरकाण्डः' नाम सप्तमकाण्डस्य 'पुंल्लिङ्गाध्यायः' नाम प्रथमेऽध्याये एवमुद्धृतिरन्यरूपेण परिलक्षिता। तत्र प्राप्ता उद्धृतिः एवमेवास्ति-

**प्रसादो स्वाच्छत्र्यानुरोधौ पर्यायोऽवसरे क्रमे।**
**प्रदोषौ दोषरात्र्यंशौ प्रणिधिः प्रार्थने चरे॥** (वैजय० 7/1/55)

**अनेकार्थसंग्रहः**

हेमचन्द्राचार्यप्रणीतः प्रख्यातः कोशग्रन्थः। कोशस्यास्य उद्धृतीनां विश्लेषणं निम्ने प्रतिपादितम्-

**11. पतत्यधो धाम विसारि सर्वतः।** (शिशु. 1/2)

**'धाम'**

सर्व. "इदं तु सर्वतो विसारि धामाधः पतति। 'धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः' इति हेमचन्द्रः।"

'धामन्' इत्येवं क्लीबलिंगशब्दस्य हि कोशशास्त्रे रश्मि-गृह-देह-स्थान-जन्म-प्रभावादयोऽर्थाः परिदृश्यन्ते। मल्लिनाथेनात्र 'रश्मि'-इत्यर्थे एव 'धामन्'-शब्दो व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन हेमचन्द्रकृतस्यानेकार्थसंग्रहस्योद्धृतिः प्रदत्ता। 'अनेकार्थसंग्रहः' इति ग्रन्थस्य 'द्विस्वरकाण्डम्' नाम द्वितीयकाण्डे 'द्विस्वरनान्ता' नामांशे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**धनुःशब्दः पियालद्रौ राशिभेदे धनुष्यपि।**
**धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः॥**[1]

**12. यस्यमजिह्मा महतीमपङ्काः।** (शिशु. 3/57)

**'अपङ्काः'**

सर्व. "अपङ्काः कर्दमरहिताः, निष्पापाश्च। 'पङ्कोऽघे कर्दमे' इति हैमः।"

---

1. अनेकार्थसंग्रहः, द्विस्वरकाण्डम्/ द्विस्वरनान्ता/ 273।

संस्कृतभाषायां 'पङ्क' शब्दस्तावत् पुंल्लिङ्गे तथा क्लीबलिङ्गे प्रयुक्तः। कोशशास्त्रेऽस्य पापं कर्दमः इत्यर्थद्वयं लक्ष्यते। मल्लिनाथेनात्र कर्दमार्थे एव 'पङ्क'-शब्दो व्याख्यातः। अर्थव्याख्यानस्यास्य समर्थने तेन हेमचन्द्रकृतस्यानेकार्थसंग्रहस्योद्धृतिः प्रदत्ता। 'अनेकार्थसंग्रहः' इति ग्रन्थस्य 'द्विस्वरकाण्डम्' नाम द्वितीयकाण्डे 'द्विस्वरकान्ता' नाम अंशे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः-

**पङ्कोऽघे कर्दमे पाकः वचने शिशुदैत्ययोः।**
**वको रक्षोभिदि श्रीदे शिवमल्लीवकोटयोः॥**

(द्विस्वरकाण्डम्/ द्विस्वरकान्ता/12)

**मेदिनीकोशः नानार्थशब्दकोशः वा**

मेदिनिकारनिर्मितोऽयं कोशः पण्डितमहले विशेषादृतः। 'नानार्थशब्दकोशः' इत्यस्यापरं नाम। अत्र वर्गद्वयं विद्यते- शब्दवर्गोऽव्ययवर्गश्चेति। सर्वङ्कषायामस्योद्धृतिः स्वल्पमात्रेणोपस्थापिता। यथा-

**13. यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः।** (शिशु. 2/65)

शिशुपालवधस्य पद्येऽस्मिन् 'इनः' इति पदस्यार्थविश्लेषणे सर्वङ्कषाटीकायां मल्लिनाथेनोक्तम्-

**इनोऽर्कः। 'इनः पत्यो नृपार्कयोः' इति मेदिनी।**

'इन' इत्येवं पुंलिंगशब्दस्य खलु कोशशास्त्रे पतिः, सूर्यः, राजा चार्थाः सन्ति। मल्लिनाथेनात्र अर्कार्थे सूर्यार्थे वा 'इन'-शब्दोऽयं प्रयुक्तः। एवमर्थस्य समर्थने तेन मेदिनीकारस्य मेदिनीकोशस्योद्धृतिः प्रदत्ता। 'मेदिनीकोशः' इति ग्रन्थस्य 'शब्दवर्गः' नाम प्रथमे वर्गे विंशतितमे नान्तवर्गे एवमुद्धृतिः परिलक्षिता। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**अन्नं भक्ते च भुक्ते स्यादिनः पत्यौ नृपार्कयोः।**
**उन्नं क्लिन्ने च स सुरते कृत्स्नं सर्वाम्बुकुक्षिषु॥**[1]

**त्रिकाण्डशेषः**

अमरकोषस्य परिशिष्टरूपेण कोशोऽयं विद्वत्समाजे सुप्रंशसितः। श्रीपुरुषोत्तम-देवनृपतिवरेण निर्मितोऽयं कोशः। अत्र काण्डत्रयं वर्तते। काण्डत्रये षष्ठविंशतिवर्गा अपि सन्ति। मल्लिनाथेन बहुत्र कोशस्यास्योद्धृतिः प्रदत्ता। तासां प्रामाणिकता निम्ने प्रतिपादिता।

---

1. मेदिनीकोशः, शब्दवर्गः/ नान्तवर्गः/ नद्विकम्/2

**14. लसिद्विच्छेदसिताङ्गसङ्गिना।** (शिशु. 1/8)

**'च्छेदः'**

सर्व. "विसच्छेदो मृणालखण्डः। 'छेदः खण्डोऽस्त्रियाम्' इति त्रिकाण्डशेषः।"

'छेदः' इत्येवं पुंलिंगशब्दस्तावत् कोशशास्त्रे खण्डार्थे प्रयुज्यते। टीकाकारेण मल्लिनाथेनापि एवमर्थे हि 'छेद'-शब्दोऽयं व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन पुरुषोत्तमदेवस्य त्रिकाण्डशेषस्योद्धृतिः प्रदत्ता। 'त्रिकाण्डशेषः' इति ग्रन्थस्य तृतीये काण्डे'संकीर्णवर्गः' नामद्वितीये वर्गे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**लेशस्तूपपदं गन्धोऽनुबन्धेषत्करावपि।**
**छेदः खण्डोऽस्त्रियां गलिः शपनं शमनं शमः॥**

(त्रिकाण्डशेषः, 3/2/9)

**15. फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि।** (शिशु. 2/59)

**'समीक्ष्योक्ते:'**

सर्व. "समीक्ष्योक्ते सांख्योक्तेः। 'सांख्यं समीक्षम्' इति त्रिकाण्डः।"

'समीक्ष' इत्येवं क्लीबलिंगशब्दस्य हि कोशशास्त्रे 'सांख्यम्' इत्यर्थोऽस्ति। टीकाकारेण मल्लिनाथेनापि सांख्यार्थे एव 'समीक्ष'-शब्दोऽयं व्याख्यातः। एवमर्थव्याख्यानस्य समर्थने तेन पुरुषोत्तमदेवस्य त्रिकाण्डशेषस्य उद्धृतिः प्रदत्ता। 'त्रिकाण्डशेषः' इति ग्रन्थस्य तृतीये काण्डे 'संकीर्णवर्गः' नाम द्वितीये वर्गे एवमुद्धृतिः परिदृष्टा। तत्र प्राप्ता सम्पूर्णा उद्धृतिः-

**ऋषिः शास्त्रकृदाचार्यः शास्त्रं तु स्मृतिरागमः।**
**सांख्यं समीक्षं स्याद्दिव्यदोहदं तूपयाचितम्॥**[1]

**शाश्वतकोशः अनेकार्थसमुच्चयः वा**

शाश्वतप्रणीतोऽयं प्रख्यातः कोशः। 'अनेकार्थसमुच्चयः' इत्यस्य मूलं नाम। समग्रे ग्रन्थे 807 श्लोकाः विद्यन्ते। सर्वङ्कषायामस्योद्धृतिरपि परिदृष्टा। तासां प्रामाणिकता प्रदर्शिता-

**16. प्रफुल्लतापिच्छनिभैरभीषुभिः।** (शिशु. 1/22)

शिशुपालवधस्य पद्येऽस्मिन् 'अभीषुभिः' इत्यस्य पदस्यार्थविश्लेषणे सर्वङ्कषा-टीकायां मल्लिनाथेनोक्तम्-

---

1. त्रिकाण्डशेषः, द्वितीयकाण्डः/ सङ्कीर्णवर्गः/ 13

**"शुभ्रैरभीषुभिरन्योन्यरश्मिभिः 'अभीषु प्रगहे रश्मौ' इति शाश्वतः"**

'अभीषु' इत्येवं पुंलिंगशब्दस्य खलु कोशशास्त्रे किरण-प्रगह-कामानुरागादयोऽर्थाः परिदृश्यन्ते। मल्लिनाथेनात्र रश्म्यर्थे किरणार्थे वा 'अभीषु'-शब्दोऽयं प्रयुक्तः। एवमर्थस्य समर्थने तेन शाश्वतप्रणीतस्य शाश्वतकोशस्यानेकार्थसमुच्चयस्य वा उद्धृतिः प्रदत्ता। 'शाश्वतकोशः' इति ग्रन्थस्य 699तमे श्लोके एवमुद्धृतिः परिलक्षिता। तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**अभीषु प्रगहे भासि बर्हिर्दर्भहुताशयोः।**
**अर्यः स्वामिनि वैश्ये च निकृतिः शठशाठ्ययोः।**

**17. स्वपनवारितुषारभृतः स्तनाः।** (शिशु. 6/24)

**'तुषारः'**

सर्व. "वारितुषारभृतः, जलशीकरधारिण इत्यर्थः। 'तुषारौ हिमशीकरौ' इति शाश्वतः।"

संस्कृतभाषायां 'तुषार' इति शब्दस्तावत् पुंलिंगशब्दः। कोशशास्त्रेऽस्य हिम-शीकर-देशभेद-कर्पूरभेदविशेषादयः अर्थाः परिदृश्यन्ते। मल्लिनाथेनात्र शीकरार्थे शितलार्थे वा 'तुषार' इति शब्दो व्याख्यातः।एवमर्थव्याख्यानस्य समर्थने तेन शाश्वत-प्रणीतस्य शाश्वतकोशस्य अनेकार्थसमुच्चयस्य वा उद्धृतिः प्रदत्ता। 'शाश्वतकोशः' इति ग्रन्थस्य 611तमे श्लोके एवमुद्धृतिः परिदृष्टा तत्र प्राप्ता सम्पूर्णा उद्धृतिः एवमेवास्ति-

**सपिण्डपुत्रौ दायादौ मातङ्गौ श्वपचद्विपौ।**
**श्वशुर्यौ देवरश्यालौ तुषारौ हिमशीकरौ॥**

**निष्कर्षः**

शिशुपालवधं शब्दवैचित्र्येण सुशोभितमनवद्यं महाकाव्यम्। ख्याताख्यात-दुरूह-शब्दानां तथा पदानां समारोहः महाकाव्यस्यास्य महानाकर्षनीयविषयः। तथोक्तं समालोचकेन- 'नवसर्गगते माघे नवशब्दो न विद्यते'। एषां शब्दानां तथा पदानामर्थविश्लेषणे टीकाकारेण मल्लिनाथेन बहुत्र बहुनां कोशग्रन्थानामुद्धृतिः प्रदत्ता सर्वङ्कषाटीकायाम्। अत्र श्लोके श्लोके विकीर्णा अस्ति अमरकोशस्य तथा विश्वप्रकाशस्योद्धृतिः। तथाच मेदिनी-हलायुध-अनेकार्थसंग्रह-वैजयन्ती-त्रिकाण्ड-शाश्वतकोशादीनामुद्धृतिरपि सम्यकतया प्रसङ्गानुसारेण प्रतिपादिता। एतासामुद्धृतीनाम् उत्सः प्रायः शुद्धः तथा प्रामाणिकः। कासांचित् उद्धृतीनां केवलम् ईषत् परिवर्तनं दृश्यते। अन्यथा उद्धृतिविषये

नास्ति कश्चन सन्देहः। कोशशास्त्रं प्रति असामान्यं वैदग्ध्यं विना एवमुद्धृतिरसम्भवा एव। अतएव कोशशास्त्रे खलु मल्लिनाथः आसीत् सचेतनः सुदक्षपण्डितः– इत्यत्र नास्ति संशयः।

**सन्दर्भग्रन्थाः**


1. कुलकर्णी, नारायण नाथजी सम्पादकः(1929)। शाश्वतकोशः। पुना : अरियेन्टल बुक एजेन्सी।
2. जोशी, जयशङ्कर सम्पादकः(1879 शकाब्दाः)। हलायुधकोशः। वाराणसी : सरस्वती भवन।
3. दास, श्रीकृष्ण सम्पादकः (1916)। त्रिकाण्डशेषः। बोम्बे : भेङ्कटेश्वर प्रेस।
4. द्विवेदी, बालमुकुन्द (1976)। संस्कृत कोष उद्भव और विकास। इलाहावाद : स्मृति प्रकाशन।
5. दूर्गाप्रसाद सम्पादकः (1905)। शिवदत्तेन वासुदेवेन च संशोधितम्। शिशुपालवधम् (सर्वङ्कषाटीका-समेतम्)। बोम्बे : निर्णयसागरप्रेस।
6. शर्मा, हरदत्त, एन.जि. सरदेशाइ च सम्पादकौ (1941)। नामलिङ्गानुशासनम् (अमरकोशोद्घाटन-टीका-सहितम्)। पुना : ओरियेण्टाल बुक एजेन्सी।
7. शास्त्री, हरगोविन्द सम्पादकः (2008)। वैजयन्तीकोषः। वाराणसी : चौखम्भा भारती अकादमी।
8. स्थवीर, शीलस्कन्ध सम्पादकः (1911)। रत्नगोपाल भट्ट संशोधकः। विश्वप्रकाशः। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
9. होशिङ्ग, जगन्नाथ शास्त्री सम्पादकः (1968)। मेदिनीकोशः। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
10. होशिङ्ग, जगन्नाथशास्त्री, घनानन्दपाण्डेय, जनार्दन तारादत्ति च सम्पादकाः (1969)। अनेकार्थसंग्रहः। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।


✦✦✦

# नाऽभिधालक्षणाभ्यां व्यञ्जनायाः गतार्थत्वम्

-राजकुमार-मण्डलः *

**शोधसारः**

शब्दस्य कार्यं हि अर्थप्रतिपादनम्। तत्र शब्दनिष्ठशक्त्या अर्थस्य प्रतिपादनं भवति। एवं, शब्दनिष्ठार्थप्रतिपादनशक्तेः वृत्तिशब्देन व्यवहारः शास्त्रे क्रियते। तत्र त्रयोऽर्थाः भवन्ति। वाच्यः, लक्ष्यः, व्यङ्ग्यश्चेति। त्रयाणाम् अर्थानां प्रतिपादनाय तिस्रः वृत्तयः स्वीक्रियन्ते आलङ्कारिकैः। तत्र वाचकः शब्दः अभिधावृत्त्या वाच्यम् अर्थं प्रतिपादयति। लाक्षणिकः शब्दः लक्षणावृत्त्या लक्ष्यार्थं प्रतिपादयति। व्यञ्जकः शब्दः व्यञ्जनावृत्त्या व्यङ्ग्यार्थं प्रतिपादयति। तत्र व्यङ्ग्यार्थस्य प्रतिपादनम् अभिधावृत्त्या लक्षणावृत्त्या वा शक्यं वेति विचारः आलङ्कारिकैः निरूपितः। शास्त्रान्तरेषु व्यञ्जनावृत्तेरङ्गीकारोऽपि नास्ति। परन्तु, अभिधावृत्त्या लक्षणावृत्त्या वा व्यङ्ग्यार्थस्य प्रतिपादनमशक्यमिति अलङ्कारशास्त्रस्य ग्रन्थेषु प्रतिपादितम्। अयमेव विषयः "नाऽभिधालक्षणाभ्यां व्यञ्जनायाः गतार्थत्वम्" इति शीर्षकात्मके शोधप्रबन्धेऽस्मिन् प्रतिपाद्यते।

**प्रमुखशब्दाः**- वृत्तिः, अभिधा, लक्षणा, व्यञ्जना, ध्वनिः।

## आमुखम्

शब्दस्य कार्यं हि अर्थप्रतिपादनम्। तत्र शब्दनिष्ठशक्त्या अर्थस्य प्रतिपादनं भवति। एवं, शब्दनिष्ठार्थप्रतिपादनशक्तेः वृत्तिशब्देन व्यवहारः शास्त्रे क्रियते। तत्र त्रयोऽर्थाः भवन्ति। वाच्यः, लक्ष्यः, व्यङ्ग्यश्चेति। त्रयाणाम् अर्थानां प्रतिपादनाय तिस्रः वृत्तयः स्वीक्रियन्ते आलङ्कारिकैः। तत्र वाचकः शब्दः अभिधावृत्त्या वाच्यम् अर्थं प्रतिपादयति। लाक्षणिकः शब्दः लक्षणावृत्त्या लक्ष्यार्थं प्रतिपादयति। व्यञ्जकः शब्दः व्यञ्जनावृत्त्या व्यङ्ग्यार्थं प्रतिपादयति। तत्र व्यङ्ग्यार्थस्य प्रतिपादनम् अभिधावृत्त्या लक्षणावृत्त्या वा शक्यं वेति विचारः आलङ्कारिकैः निरूपितः। शास्त्रान्तरेषु व्यञ्जनावृत्तेरङ्गीकारोऽपि नास्ति। परन्तु, अभिधावृत्त्या लक्षणावृत्त्या वा व्यङ्ग्यार्थस्य

* शोधच्छात्रः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्, वेलुडमठम्, हाओडा, ७११२०२, पश्चिमबङ्गः

प्रतिपादनमशक्यमिति अलङ्कारशास्त्रस्य ग्रन्थेषु प्रतिपादितम्। अयमेव विषयः "नाऽभिधालक्षणाभ्यां व्यञ्जनायाः गतार्थत्वम्" इति शीर्षकात्मके शोधप्रबन्धेऽस्मिन् प्रतिपाद्यते।

**शोधपद्धतिः**

शोधप्रबन्धेऽस्मिन् व्यञ्जनावृत्तेः अङ्गीकारस्य अपेक्षणीयता प्रतिपादिता। तत्र इतरवृत्तिद्वयेन व्यङ्ग्यार्थस्य प्रकाशनमशक्यमिति युक्त्या प्रतिपादितम्। वस्तुतः, अत्र विश्लेषणात्मिका पद्धतिरेव आश्रिता वर्तते।

नाऽभिधया व्यङ्ग्यार्थप्रतिपादनम्

अभिधाव्यापारः सङ्केतितार्थं प्रतिपादयति। तदुक्तं दर्पणकृता-

**तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा**[1]। इति।

एवं, सङ्केतितमर्थं प्रतिपाद्य अभिधावृत्तिः विरता भवति। 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्' इति नयेन सङ्केतितार्थं प्रतिपादयितुः अभिधावृत्तेः निवृत्तिः अङ्गीकार्यैव भवति। ततः, व्यङ्ग्यार्थस्य प्रतिपादनाय व्यञ्जनाख्यव्यापारान्तरं स्वीकार्यं भवति। यतो हि, व्यङ्ग्यार्थः न शब्दस्य सङ्केतितार्थः, तस्मात् न अभिधया व्यङ्ग्यार्थस्य प्रतिपादनं शक्यम्। तदुक्तं दर्पणकृता- "अभिधायाः संकेतितार्थमात्र-बोधनविरताया न वस्त्वलङ्काररसादिव्यङ्ग्यबोधने क्षमत्वम्"[2] इति।

**वाच्यार्थव्यङ्ग्यार्थयोः भेदः**

साहित्यदर्पणकारैः वाच्यार्थव्यङ्ग्यार्थयोः भेदः निरूपितः-

**बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्।**
**आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः।।**[3] इति।

वाच्यार्थबोधाय केवलं शब्दार्थसम्बन्धज्ञानम् अपेक्षते। तस्मात्, शब्दार्थ-सम्बन्धज्ञानवता वाच्यार्थः सुतरामवबुध्यते। व्यङ्ग्यार्थस्य बोधाय शब्दार्थसम्बन्धज्ञानं पर्याप्तं नास्ति। व्यङ्ग्यार्थस्य बोधः सहृदयस्यैव भवति। एवं, वाच्यार्थस्य व्यङ्ग्यार्थस्य च बोद्धा पृथगेव भवति।

स्वरूपं नाम प्रकृतिः। वाच्यार्थस्य व्यङ्ग्यार्थस्य च प्रकृतिः भिन्ना भवति। अयं विषयः उदाहरणेषु अत्यन्तं स्पष्टं भवति। ध्वनिकारैः आनन्दवर्धनैः वाच्यार्थस्य

---

1. साहित्यदर्पणः, लक्ष्मीटीकोपेतः, पृष्ठम्- 31
2. साहित्यदर्पणः, लक्ष्मीटीकोपेतः, पृष्ठम्- 294
3. साहित्यदर्पणः, लक्ष्मीटीकोपेतः, पृष्ठम्-300

व्यङ्ग्यार्थस्य च स्वरूपभेदः नैकेषु उदाहरणेषु प्रदर्शितः। अत्र तानि उदाहरणानि उपस्थाप्यन्ते। यथा,

**भ्रम धार्मिकविस्रब्धः स शुनकोऽद्य मारितस्तेन।**
**गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन॥**

अत्र भ्रम इति लोटा भ्रमणस्य विधिः वाच्यार्थतया बोध्यते। परन्तु, प्रकरणपर्यालोचनेन भ्रमणस्य प्रतिषेध एव तात्पर्यार्थतया प्रतीयते। भ्रमणस्य निषेधोऽत्र व्यङ्ग्यार्थः। एवं, वाच्यार्थोऽत्र विधिरूपः, व्यङ्ग्यार्थश्च निषेधरूप इति वाच्यार्थस्य व्यङ्ग्यार्थस्य च स्वरूपभेदः उदाहरणेऽस्मिन् स्पष्टं दृश्यते।

**अत्था अत्र निमज्जति अत्राहं दिवसकं प्रलोकय।**
**मा पथिक रात्र्यन्धक शय्यायां मम निमङ्क्ष्यसि॥**

अत्र मा इत्यव्ययेन निषेधः वाच्यार्थतया बोध्यते। परन्तु, प्रकरणपर्यालोचनया विधिरेव तात्पर्यार्थतया प्रतीयते। एवं, वाच्यार्थोऽत्र निषेधरूपः, व्यङ्ग्यार्थश्च विधिरूप इति विशेषः वाच्यव्यङ्ग्यार्थयोः।

**व्रज ममैवैकस्या भवन्तु निःश्वासरोदितव्यानि।**
**मा तवापि तया विना दाक्षिण्यहतस्य जनिषत॥**

अत्र व्रज इति लोटा गमनस्य विधिः वाच्यार्थरूपेण बोध्यते। परन्तु, तात्पर्यार्थरूपेण गाढमन्युरूपो नायिकाया अभिप्रायोऽत्र व्यङ्ग्यार्थतया प्रतीयते। एवमत्र वाच्यार्थस्य व्यङ्ग्यार्थस्य च भेदः स्पष्टं प्रतीयते।

**प्रार्थये तावत्प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमो निवहे।**
**अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे॥**

अत्र प्रसीद, निवर्तस्वेति क्रियापदाभ्यां विधिः निषेधो वा वाच्यार्थतया बोध्यते। परन्तु, चाटुरूपो वल्लभाभिप्रायोऽत्र व्यङ्ग्योऽर्थः। एवम्, एतेषु उदाहरणेषु वाच्यार्थस्य व्यङ्ग्यार्थस्य च स्वरूपभेदः स्पष्टं प्रतीयते।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च संख्यायां भेदो भवति। यथा, गतोऽस्तमर्कः इत्यत्र सूर्यास्तगमनरूप एक एव वाच्यार्थः। परन्तु, बोद्धादिभेदात् अस्मादेव वाक्यात् नैका व्यङ्ग्यार्थाः प्रतीयन्ते। यथा, काञ्चिदभिसारिकां प्रति वाक्यमिदमुच्यते चेत् कान्ताभिसरणरूपो व्यङ्ग्यार्थः प्रतीयते। क्रीडन्तं बालं प्रति उच्यमाने सति गृहगमनरूपो व्यङ्ग्यार्थः प्रतीयते। काञ्चित् वियोगिनीं प्रत्युच्यमाने सति नायकस्य आगमनकालरूपो व्यङ्ग्यार्थः प्रतीयते। एवं, बोद्धादिभेदे अस्माद्वाक्यात् नैके व्यङ्ग्यार्थाः प्रतीयन्ते, वाच्यार्थस्तु सर्वथा एक एव।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च निमित्तभेदो वर्तते। निमित्तं नाम कारणम्। वाच्यार्थस्य प्रतीतौ शब्दोच्चारणमात्रं कारणम्। यस्य शब्दस्य उच्चारणं जातं, तस्य शब्दस्य ज्ञानं, शब्देन अभिधेयस्य अर्थस्य च ज्ञानं बोद्धुरपेक्षितं भवति वाच्यार्थस्य प्रतीतौ। व्यङ्ग्यार्थस्य प्रतीतौ पूर्वोक्तं न पर्याप्तं भवति। व्यङ्ग्यार्थस्य बोद्धा प्रतिभानैर्मल्यादिगुणान्वितः भवेदेव।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च कार्यभेदो वर्तते। अत्र कार्यं नाम फलमुद्देश्यं वेति। वाच्यार्थेन प्रतीतिमात्रं जायते। व्यङ्ग्यार्थेन च चमत्कारो जन्यत इति विशेषः।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च प्रतीतौ भेदो वर्तते। वाच्यार्थस्य प्रतीतिः शाब्दबोधस्वभावभूता वर्तते। अत्र प्रतीतौ चमत्कारस्य सुखस्य चाऽभावात् केवलरूपेयं प्रतीतिः। व्यङ्ग्यार्थस्य प्रतीतिः सुखचमत्कारसहिता शाब्दबोधस्वभावरूपा चेति विशेषः।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च प्रतीतौ कालभेदो वर्तते। शब्दोच्चारणानन्तरमेव वाच्यार्थस्य प्रतीतिः भवति। ततः व्यङ्ग्यार्थस्य प्रतीतिः परं भवति। एवं, वाच्यार्थः पूर्वभावी, व्यङ्ग्यार्थश्च पश्चाद्भावीति विशेषः।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च आश्रयभेदो वर्तते। आश्रयो नाम आधारः। वाच्यार्थस्य आश्रयभूतं शब्दमात्रं वर्तते। व्यङ्ग्यार्थस्य तु आश्रयः शब्दः, शब्दैकदेशः, वर्णः, प्रकृतिप्रत्ययादिः, वाच्यलक्ष्यव्यङ्ग्यभूतः त्रिविधोऽर्थश्चेत्यादिः।

वाच्यार्थस्य व्यङ्ग्यार्थस्य च विषयभेदो वर्तते। अत्र विषयो नाम उद्देश्यम्। अर्थात्, वाच्यार्थस्य उद्देश्यं भिन्नं, व्यङ्ग्यार्थस्य चोद्देश्यं भिन्नं भवति। भेदोऽयम् उदाहरणेन स्पष्टो भवति। यथा,

**कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।**
**सभ्रमपद्माघ्रायिणि वारितवामे सहस्वेदानीम्॥**

अत्र वाच्यार्थस्य उद्देश्यभूता सम्बोध्या सखी नायिका, व्यङ्ग्यार्थस्य च उद्देश्यभूतो नायकः इति विशेषः।

एवं, वाच्यार्थस्य व्यङ्ग्यार्थस्य च महान् भेदो वर्तते। ततः, सङ्केतितं वाच्यार्थं प्रतिपादयता अभिधाव्यापारेण असङ्केतितः व्यङ्ग्यार्थः नैव प्रतिपाद्यते।

**विशेषः**

वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्चेति ध्वनेः त्रैविध्यमालङ्कारिकैः अङ्गीकृतम्। तत्र वस्तुध्वनेः अलङ्कारध्वनेश्च यथा कथञ्चित् अभिधया लक्षणया वा बोधाङ्गीकारे सत्यपि रसध्वनेः बोधस्तु अभिधया लक्षणया वा कथमपि न सम्भवति।

अत्र हेतुं प्रतिपादयन् वक्ति दर्पणकारो विश्वनाथः-

**प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।**
**किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा।।**[1] इति।

अभिधा लक्षणा वा स्वव्यापारात् पूर्वतः विद्यमानं वस्तु एव बोधयति। यथा, घटशब्दः अभिधया शब्दव्यापारात् पूर्वतः विद्यमानं घटं बोधयति। गङ्गाशब्दोऽपि लक्षणया पूर्वतः शब्दव्यापारात् प्राक् विद्यमानं तीरं बोधयति। रसादिस्तु शब्दव्यापारात् पूर्वं विद्यमानो न भवति। अपि तु शाब्दबोधानन्तरमेव रसादीनामुत्पत्तिः भवति। तस्मात्, अभिधाव्यापारात् लक्षणाव्यापारात् वा प्राक् रसादेः विद्यमानत्वाऽभावात् अभिधया लक्षणया वा रसादीनां बोधोऽशक्यः।

## लक्षणया न ध्वनेः गतार्थत्वम्

तत्र लक्षणया सह व्यञ्जनायाः महान् भेदो वर्तते। लक्षणाप्रवृत्तेः निमित्तत्रय-मालङ्कारिकसम्प्रदाये प्रसिद्धम्। तदुक्तं दर्पणकृता-

**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता।।**[2] इति।

अर्थात्, लक्षणायाः प्रवृत्तौ अभिधावृत्त्या प्रतिपादितस्य अर्थस्य बाधोऽपेक्षते। ततः, मुख्यार्थेन सह सम्बद्धोऽर्थविशेषः लक्षणया बोध्यते। तत्र पुनः, रूढिवशात् प्रयोजनवशाद्वा लक्षणायाः प्रवृत्तिः स्वीकार्या भवति। एवञ्च, लक्षणायाः प्रवृत्तौ हेतुत्रयं - मुख्यार्थबाधः, मुख्यार्थसम्बन्धः, रूढिः प्रयोजनं वेति।

यथा, गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य मुख्यार्थः जलप्रवाहः, घोषशब्दस्य मुख्यार्थः आभीरपल्ली। तत्र जलप्रवाहे आभीरपल्ल्या असम्भवात् मुख्यार्थबाधः। तस्मात् गङ्गाशब्दस्य जलप्रवाहरूपमुख्यार्थेन सम्बद्धः गङ्गातीरः लक्ष्यते। अत्र पुनः, आभीरपल्ल्याः पावनत्वातिशयबोधनं प्रयोजनं वर्तते। एवं, हेतुत्रयस्य सद्भावात् अत्र लक्षणया गङ्गाशब्दस्य तीररूपार्थः निश्चीयते। ध्वन्यालोकग्रन्थे काव्यप्रकाशग्रन्थे च लक्षणायाः व्यङ्ग्यप्रतिपादनाशक्यता निरूपिता। तस्मात्, अनयोः ग्रन्थयोः दिशा लक्षणया ध्वनेः गतार्थत्वाऽभावः प्रतिपाद्यते।

## ध्वनिकारनयः

आनन्दवर्धनविरचिते ध्वन्यालोकग्रन्थे ध्वनिविरोधिनः त्रयो वादाः निरूपिताः- ध्वनेरन्तर्भावः सेत्स्यति। भाक्तवादस्य पुनः त्रयो विकल्पाः प्रस्तुताः- ध्वनिः भक्तिश्चेति

1. साहित्यदर्पणः, लक्ष्मीटीकोपेतः, पृष्ठम्- 302
2. साहित्यदर्पणः, लक्ष्मीटीकोपेतः, पृष्ठम्- 35

घटकलशाविव पर्यायशब्दाविति प्रथमविकल्पः। भक्तिः ध्वनेः लक्षणमिति द्वितीयविकल्पः। भक्तिः ध्वनेः उपलक्षणमिति तृतीयविकल्पः। ध्वनिकारैः स्वग्रन्थे सर्वेषामेषां विकल्पानां दूषणं विहितम्।

## भक्तिः ध्वनिश्च न पर्यायशब्दौ

तत्र भिन्नरूपत्वात् भक्तेः ध्वनेश्च पर्यायत्वं भवितुं नार्हति। तदुक्तं ध्वनिकृता-

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः॥**[1] इति।

अर्थात्, अत्र भक्तिर्नाम लक्षणावृत्तिः। ध्वनिपदेन व्यञ्जकशब्दः, व्यञ्जकार्थः, व्यञ्जनाव्यापारः, व्यङ्ग्योऽर्थः, ध्वनिकाव्यमिति पञ्च अर्थाः ग्राह्या भवन्ति। वाच्यभिन्नस्य अर्थस्य यत्र वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं भवति, व्यङ्ग्यं च प्रधानं भवति तत्र ध्वनिरिति व्यवहारः। यत्र उपचारमात्रं भवति तत्र भक्तिरिति व्यवहारः। पुनः, प्रयोजनवत्यां लक्षणायां चत्वारः व्यापाराः प्रवर्तन्ते- अभिधा, तात्पर्यवृत्तिः, लक्षणा, व्यञ्जना चेति। यथा, गङ्गायां घोषः इत्यत्र आदौ अभिधावृत्त्या वाच्यार्थोपस्थितिः, ततः तात्पर्यवृत्त्या उपस्थितपदार्थानामन्वयप्रतिपादनेन वाक्यार्थोपस्थितिः, ततः मुख्यार्थबाधस्य बोधः, ततः लक्षणावृत्त्या लक्ष्यार्थोपस्थितिः, ततः पुनः तात्पर्यवृत्त्या पदार्थान्वयमूलको वाक्यार्थोपस्थितिः, ततः प्रयोजनार्थस्य व्यञ्जनावृत्त्या बोध इति चत्वारः व्यापाराः प्रवर्तन्ते। परन्तु, यदा ध्वनेरभावः स्वीक्रियते, तदा प्रयोजनार्थस्य प्रतिपादनाय व्यञ्जनाव्यापारस्य प्रवृत्तिः नास्ति। परन्तु, तत्रापि लक्षणा तु प्रवृत्तेत्यतः ध्वनेः भक्तेश्च पर्यायत्वं भवितुं नार्हति। तदुक्तं लोचनकृता- "यत्र लक्षणाव्यापारात्तृतीया-दन्यश्चतुर्थः प्रयोजनद्योतनात्मा व्यापारो वस्तुस्थित्या सम्भवन्नप्यनुपयुज्यमानत्वेना-नाद्रियमाणत्वादसत्कल्पः। 'यमर्थमधिकृत्य' इति हि प्रयोजनलक्षणम्। तत्रापि लक्षणास्तीति कथं ध्वननं लक्षणा चेत्येकं तत्त्वं स्यात्"।[2]

## भक्तिः न ध्वनेः लक्षणम्

भक्तिः लक्षणम्, ध्वनिः लक्ष्यमिति अस्य द्वितीयपक्षस्य आशयः। असाधारणो धर्मो हि लक्षणं भवति। यो धर्मः सम्पूर्णं लक्ष्यं व्याप्य तिष्ठति, लक्ष्यातिरिक्ते कुत्रापि न तिष्ठति, स एव धर्मो लक्षणं भवति। एवञ्च, यो धर्मः सम्पूर्णे लक्ष्ये तिष्ठति, लक्ष्यातिरिक्ते च तिष्ठति, स धर्मः लक्षणं भवति। एतादृशो धर्मो लक्षणपदवाच्यो भवति चेत्तल्लक्षणम् अतिव्याप्तिदोषयुतमिति उच्यते। यो धर्मः लक्ष्यस्य एकदेशे तिष्ठति, लक्ष्यस्य अन्यदेशे न तिष्ठति, लक्ष्यातिरिक्ते च न तिष्ठति, स धर्मो लक्षणपदवाच्यो भवति चेत्तल्लक्षणम् अव्याप्तिदोषयुक्तमिति उच्यते। यो धर्मो लक्ष्ये

1. ध्वन्यालोकः, पृष्ठम्- 118
2. ध्वन्यालोकः, लोचनम्, पृ- 118

एव न तिष्ठति, लक्ष्यातिरिक्ते च तिष्ठति, स धर्मो लक्षणपदवाच्यो भवति चेत्तल्लक्षणम् असम्भवदोषयुतमित्युच्यते। एवञ्च, लक्षणं सर्वदा अतिव्याप्त्यादिदोषरहितं स्यात्।

प्रकृते, भक्तिः लक्षणम्, लक्ष्यश्च ध्वनिः। अर्थात्, यत्र यत्र भक्तिः, तत्र तत्र ध्वनिः भवेदेव। परन्तु, यत्र ध्वनिरस्ति, तत्रापि भक्तिर्वर्तते इति अतिव्याप्तिः। किञ्च, यत्र ध्वनिरस्ति, तत्र भक्तिः न विद्यते इति अव्याप्तिः। एवम्, अतिव्याप्त्यव्याप्तिदोषयुतत्वात् भक्तिः न ध्वनेः लक्षणं भवति। तदुक्तं ध्वनिकृता-

**अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तथा।**[1] इति।

अत्र लक्ष्यभूतो ध्वनिः, लक्ष्यातिरिक्ते ध्वनिभिन्ने स्थले भक्तेः सत्त्वं कैश्चिदुदाहरणैः प्रदर्श्य ध्वनिकृता आदौ भक्तेः ध्वनिलक्षणत्वे अतिव्याप्तिः प्रदर्शिता। यथा,

**परिम्लानं पीनस्तनजघनसङ्गादुभयत-**
**स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**
**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः**
**कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्॥**

रत्नावल्याः श्लोकोऽयम्। सागरिकायाः मदनशय्यायाः वर्णनं करोति राजा विदूषकं प्रति श्लोकेऽस्मिन्। अत्र सागरिकायाः बिसिनीपत्रशयनं सागरिकायाः देहसन्तापं वदति इत्यर्थः। बिसिनीपत्रशयनस्य वचनकर्तृत्वं न सम्भवतीति मुख्यार्थबाधः। ततः लक्षणया वदति इत्यस्य प्रकटयति इत्यर्थः सम्पद्यते। प्रकटनक्रियानिरूपितकर्तृत्वं तु बिसिनीपत्रशयनस्य युक्तमेव भवति। अत्र ध्वनेः विषयो नास्ति। तथापि भक्तिस्तु वर्तते। कविना प्रकटनक्रियायाः कथनाय वदतीति क्रियापदस्य प्रयोगेन न किमपि चारुत्वं सम्भावितम्। एवं, कविना अत्र प्रकटनक्रियायाः प्रतिपादनाय प्रकटयति इति क्रियापदं प्रयुक्तं स्याच्चेदपि न किञ्चिच्चारुत्वहानिरत्र सम्भाव्येत। एवं, व्यङ्ग्यकृतं प्राधान्यमत्र नास्त्येव। तस्मान्नायं ध्वनेर्विषयः। ध्वनेर्विषयः ध्वनिकृताऽपि निरूपितः। तद्धि-

**उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन्।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत्॥**[2] इति।

अत्र ध्वन्यतिरिक्तेन न केनचिच्चारुत्वं प्रकाश्यते इति ग्रन्थकृतः तात्पर्यम्। पूर्वोक्तश्लोके प्रकटनक्रियायाः प्रतिपादनाय वदतीति क्रियापदप्रयोगेन न किमपि

1. ध्वन्यालोकः, पृष्ठम्- 118
2. ध्वन्यालोकः, पृष्ठम्- 123

चारुत्वं सम्पादितं भवति। साक्षात्प्रकटयतीति क्रियापदप्रयोगेन न कापि चारुत्वहानिर्वा सम्पाद्येत। अतः न तत्र ध्वनेः विषयः। एवं, ध्वन्यतिरिक्ते भक्तेः सत्त्वात् भक्तेः ध्वनिलक्षणत्वे अतिव्याप्तिः।

### रूढिलक्षणायामतिव्याप्तिः

लक्षणायाः त्रिषु निमित्तभूतेषु रूढिप्रयोजनयोः अन्यतरोऽन्यतमः। रूढिमाश्रित्य प्रवृत्तायाः लक्षणायाः रूढिलक्षणेत्याख्या। प्रयोजनमाश्रित्य प्रवृत्ता लक्षणा प्रयोजनवती लक्षणेति कथ्यते। तत्र प्रयोजनवत्यां लक्षणायां प्रयोजनार्थस्य प्रतिपादनाय व्यञ्जनाया अपेक्षा भवति। एवं, प्रयोजनवत्यां लक्षणायां ध्वनिरस्तीति निर्विवादं विद्वत्सु। परन्तु, रूढिलक्षणायां तु ध्वनिः नास्त्येव। तदुक्तं ध्वनिकृता–

**रुढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।**
**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः॥**[1] इति।

लावण्यमिति शब्दोऽत्र उदाहृतः। आदिपदेनाऽत्र आनुलोम्यं, प्रातिलोम्य-मित्यादिशब्दाः स्वीकर्तुं शक्यन्ते। लवणस्य भावः लावण्यम्, अर्थात्, लवणयुक्तत्वमिति लावण्यशब्दस्य मुख्योऽर्थः। परन्तु, अधुना लावण्यशब्दस्य सौन्दर्यमित्यर्थे प्रसिद्धिः वर्तते। सौन्दर्यमिति न लावण्यशब्दस्य मुख्योऽर्थः, लावण्यशब्दस्य सौन्दर्यार्थे सङ्केताऽभावात्। तस्मात्, लक्षणावृत्त्या लावण्यशब्दस्य सौन्दर्यमित्यर्थः प्रतिपाद्यते। एवं, रुढिलक्षणायां भक्तिरस्ति, ध्वनिस्तु नास्तीति भक्तेः ध्वनिलक्षणत्वे अतिव्याप्तिः। कुत्रचित्, लावण्यादिशब्दसन्निधाने ध्वनिः सत्त्वेऽपि अतिव्याप्तिर्वार्यते इति वक्तुं न शक्यते। तत्र लावण्यादिशब्दसन्निधाने ध्वनिसत्त्वेऽपि लावण्यादिशब्दप्रयोगमूलक-ध्वनेरभावात् अतिव्याप्तिः तदवस्थः तिष्ठति। तर्हि तत्र तत्र प्रदेशेषु ध्वनेः बीजभूतं किमिति चेत् व्यञ्जकत्वमेव ध्वनेः बीजभूतं, न तु लावण्यादिशब्दप्रयोगः। तदुक्तं ध्वनिकृता– "तथाविधे च विषये क्वचित्सम्भवन्नपि ध्वनिव्यवहारः प्रकारान्तरेण प्रवर्तते। न तथाविधशब्दमुखेन"[2] इति।

### प्रयोजनार्थप्रतिपादनं न लक्षणया

तुष्यतु दुर्जनन्यायेन भक्तिध्वन्योः साहचर्यनियमे स्वीक्रियमाणेऽपि लक्षणाव्यापारस्य व्यञ्जनाव्यापारस्य च विषयभेदः सर्वथा सोढव्य एव भवति। अर्थात्, लक्षणाव्यापारेण सकलध्वनिविषयः व्याप्तो नैव भवति। प्रयोजनवत्यां लक्षणायां प्रयोजनार्थस्य प्रतिपादनं कथमपि लक्षणाव्यापारेण न सम्भवति। तदुक्तं ध्वनिकृता–

---

1. ध्वन्यालोकः, पृष्ठम्- 124
2. ध्वन्यालोकः, पृष्ठम्- 124

**मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।**
**यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः॥**[1]

प्रयोजनमुद्दिश्य लक्षणाव्यापारस्य प्रवृत्तौ प्रयोजनवती लक्षणेति लक्षणाविशेषः। यथा, गङ्गायां घोषः इत्यत्र जलप्रवाहे घोषस्य आधेयत्वाऽसम्भवात् मुख्यार्थबाधे सति गङ्गापदस्य जलप्रवाहसम्बद्धः गङ्गातीररूपार्थः लक्ष्यते। अत्र शीतत्वपावनत्वातिशयबोधनं प्रयोजनम्। इदमेव प्रयोजनं प्रतिपादयितुं गङ्गातीरशब्दस्य साक्षात्प्रयोगो न कृतः प्रयोक्त्रा। एवञ्च, लक्षणायाः फलमिदं शीतत्वपावनत्वातिशयस्य बोधनम्। अस्य प्रयोजनरूपार्थस्य प्रतिपादनम् अभिधाव्यापारेण न शक्यते, गङ्गापदस्य शीतत्वाद्यर्थे सङ्केताऽभावात्। लक्षणाव्यापारेणाऽपि अस्य प्रयोजनरूपार्थस्य प्रतिपादनम् अशक्यम्। लक्षणाप्रवृत्तौ मुख्यार्थबाधः, मुख्यार्थसम्बन्धः, रुढिप्रयोजनयोरन्यतर इति त्रयो निमित्तभूताः। अत्र लक्षणाव्यापारेण शीतत्वादिप्रयोजनरूपार्थस्य प्रतिपादनं तदैव शक्यं, यदा मुख्यार्थबाधः स्यात्। अर्थात्, अधुना तीररूपार्थस्य बाधो वक्तव्यः, तीररूपार्थस्य च मुख्यार्थत्वमपि वक्तव्यं भवति। परन्तु, नाऽत्र गङ्गापदस्य तीररूपार्थः मुख्यार्थः, न वाऽत्र तीररूपार्थस्य बाधोऽस्ति। एवं, लक्षणाप्रवृत्तेः निमित्ताऽभावात् न लक्षणया प्रयोजनरूपार्थस्य प्रतिपादनं शक्यम्। तुष्यतु दुर्जनन्यायेन प्रयोजनरूपार्थस्य प्रतिपादनं लक्षणाव्यापारेण भवतीत्युच्यते चेदपि अनवस्था आपद्येत। शीतत्वाद्यर्थः लक्षणया प्रतिपादितश्चेत्, अत्रापि प्रयोजनं वक्तव्यं, एवं परम्परया प्रयोजनकथनाऽऽपत्तिः। एतत्सर्वं प्रतिपादितं मम्मटाचार्यैः काव्यप्रकाशे-

**नाभिधा समयाभावात् हेत्वभावान्न लक्षणा।**
**लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो।**
**न प्रयोजनमेतस्मिन् न च शब्दःस्खलद्गतिः॥**
**एवमप्यनवस्था स्याद् या मूलक्षयकारिणी।**[2]

यद्यत्र शीतत्वपावनत्वादिविशिष्टो तीररूपार्थो लक्षणाव्यापारेण प्रतिपाद्यते इति उच्यते, एतदपि युक्तं नास्ति। तत्र ज्ञानस्य विषयो भिन्नः, फलञ्च भिन्नं भवति। गङ्गायां घोष इत्यत्र लक्षणाजन्यज्ञानस्य विषयो हि गङ्गातटः, फलञ्च शीतत्व-पावनत्वातिशयः। विषयफलयोश्च कार्यकारणभावः वर्तते। एवं, विषयो हि कारणं, फलञ्च कार्यम्। कार्यकारणयोः युगपदुपस्थितिः नाङ्गीक्रियते। कार्यस्य प्राक् कारणस्य उपस्थितिरपेक्षते। एवं, विषयफलयोः कारणकार्ययोः युगपदुपस्थितेः असम्भवात् प्रयोजनविशिष्टे लक्षणेति मतमपि अयुक्तमेव। तदुक्तं मम्मटाचार्यैः-

---

1. ध्वन्यालोकः, पृष्ठम्- 125
2. काव्यप्रकाशः, पृष्ठम्- 54-57

**प्रयोजनेन सहितं लक्षणीयं न युज्यते॥**
**ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्।**
**विशिष्टे लक्षणा नैवं विशेषाः स्युस्तु लक्षिते॥**[1] इति।

**भक्तेः ध्वनिलक्षणत्वे अव्याप्तिः**

यत्र भक्तिः नास्ति, तत्र ध्वनेः सत्त्वञ्चेत् भक्तेः ध्वनिलक्षणत्वे अव्याप्तिदोषः। तत्र प्राथम्येन ध्वनिकाव्यस्य द्विधा भेदः स्वीक्रियते- अविवक्षितवाच्यः, विवक्षिताऽन्य-परवाच्यश्चेति। विवक्षितान्यपरवाच्यो नाम अभिधामूलध्वनिः। अर्थात्, अत्र वाच्यार्थमाश्रित्य ध्वनिः। एवम्, अभिधामूलध्वनौ मुख्यार्थबाधादिलक्षणाप्रवृत्तिप्रयोजकाः नैव भवन्ति। अर्थात् विवक्षितान्यपरवाच्यध्वनौ भक्तेः स्पर्श एव नास्ति, परन्तु ध्वन्युपस्थितिः सर्वेषामनुभवगोचरैव। एवम्, भक्तेः असत्त्वस्थले ध्वनेः सत्त्वात् भक्तेः ध्वनिलक्षणत्वे अव्याप्तिदोषः। तत्र अभिधामूलध्वनौ गौणीलक्षणायाः सर्वदा अङ्गीकारे सति भक्तेः सत्त्वं प्रतिपादयितुं शक्यमित्यतो नाऽव्याप्तिः। वस्तुतः, असंलक्ष्यक्रमव्यङ्ग्ये क्रमस्य अभावात् कथमपि भक्तेः सत्त्वं प्रतिपादयितुं न शक्यते। तस्मात्, असंलक्ष्यक्रमव्यङ्ग्ये अव्याप्तिदोषस्तु कथमपि निराकर्तुं न शक्यते। एवम्, भक्तेः ध्वनिलक्षणस्य असंलक्ष्यक्रमव्यङ्ग्ये अव्याप्तिः ध्वनिकारस्य ग्रन्थेन स्फुटा भवति। तदुक्तं लोचनकृता- "नन्वत्राङ्गीकृतैव मध्ये लक्षणा, कथं तर्ह्युक्तं विवक्षितान्यपरेति? तद्भेदोऽत्र मुख्योऽसंलक्ष्यक्रमात्मा विवक्षितः। तद्भेदशब्देन च रसभावतदाभासतत्प्रशमभेदास्तदवान्तरभेदाश्च, न च तेषु लक्षणया उपपत्तिः"[2] इति।

लक्षणायाः बीजं वाचकत्वम्, ध्वनेः बीजं व्यञ्जकत्वम्। तदुक्तं ध्वनिकृता-

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**
**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥**[3] इति।

एवं, बोद्धृस्वरूपादिभेदाः लक्ष्यव्यङ्ग्यार्थयोरपि साधारणाः भवन्ति। तस्मात्, यथा अभिधाव्यापारेण व्यङ्ग्यार्थस्य प्रतिपादनं न शक्यते, तथा लक्षणाव्यापारेणऽपि व्यङ्ग्यार्थस्य प्रतिपादनमशक्यम्।

**विमर्शः**

अभिधाव्यापारेण व्यङ्ग्यार्थस्य प्रतिपादनम् अशक्यम्। वाच्यार्थं प्रतिपाद्य अभिधावृत्तिः निवृत्ता भवति। शब्दबुद्धिकर्मणां विरम्य व्यापाराऽभावः इति नयेन वाच्यार्थप्रतिपादनानन्तरम् अभिधावृत्तेः निवृत्तिः स्वीकर्तव्यैव भवति। पुनः, व्यङ्ग्यार्थस्य

1. काव्यप्रकाशः, पृष्ठम्- 58-60
2. ध्वन्यालोकः, लोचनम्, पृष्ठम्- 130
3. ध्वन्यालोकः, पृष्ठम्- 127

वाच्यार्थत्वं कथमपि न सम्भवति, वाच्यस्य व्यङ्ग्यस्य च बोद्धृस्वरूपादिभेदानां सत्त्वात्। अर्थात्, व्यङ्ग्यार्थे सङ्केताऽभावात् व्यङ्ग्यार्थः न अभिधाव्यापारेण प्रतिपाद्यो भवति।

लक्षणाव्यापारेण व्यङ्ग्यार्थस्य प्रतिपादनमपि अशक्यम्। मुख्यार्थबाधादिनिमित्त-सद्भावे लक्षणावृत्तेः प्रवृत्तिः भवति। तत्र अभिधामूलध्वनौ मुख्यार्थबाधादिनिमित्तानाम् अभावात् लक्षणावृत्तेः प्रवृत्तिः कथमपि न सेत्स्यति। तस्मात्, अभिधामूलध्वनिः लक्षणाव्यापारेण प्रतिपाद्यो न भवति। लक्षणामूलध्वनौ यद्यपि मुख्यार्थबाधादिनिमित्तसद्भावे लक्षणाव्यापारस्य प्रवृत्तिरस्ति। परन्तु, तत्र प्रयोजनरूपार्थस्य प्रतिपादनं लक्षणाव्यापारेण कथमपि न शक्यते। एवम्, अभिधाव्यापारेण लक्षणाव्यापारेण वा व्यङ्ग्यार्थस्य प्रतिपादनमशक्यम्। तस्मात्, आलङ्कारिकैः अभिधां लक्षणाञ्च अतिरिच्यव्यञ्जनाव्यापारः स्वीकृतः।

## ग्रन्थसूची

1. मिश्रः, विश्वनाथः। (2011)। साहित्यदर्पणः (लक्ष्मीटीकोपेतः)। कृष्णमोहन-शास्त्री (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।
2. मिश्रः, विश्वनाथः। (2016)। साहित्यदर्पणः (विमलाटीकोपेतः)। शालिग्राम-शास्त्री (सम्पा.)। दिल्ली : मोतीलालबनारसीदास।
3. मम्मटः। (2003)। काव्यप्रकाशः (सरलाव्याख्योपेतः)। डॉ. कपिलदेवगिरि (सम्पा.)।वाराणसी : चौखम्बासंस्कृतसंस्थान।
4. आनन्दवर्धनः। (वि.सं. 2061)। ध्वन्यालोकः (लोचनोपेतः)। डॉ. गङ्गासागरराय (सम्पा.)। वाराणसी : चौखम्बासंस्कृतभवन।
5. आनन्दवर्धनः। (2009)। ध्वन्यालोकः। डॉ. नगेन्द्रः (सम्पा.)। वाराणसी : ज्ञानमण्डललिमिटेड।

✦✦✦

 ISSN : 0975-1769

# भक्तिमार्गालोके श्रीजीवगोस्वामी

-अमलकुमार कर*

**शोधसारः-**

भक्तिरेव प्रधानतया अभिधेयभूता। भक्तिं विना हृदि श्रीकृष्णभजनं कदापि न सम्भवति। अस्यैव मुख्यतत्त्वस्य प्रतिपादने प्रयासं विहितवान् वृन्दावनस्य अन्यतमो गोस्वामी श्रीजीवगोस्वामी। यद्यपि स श्रीभागवतम् अवलम्ब्य ग्रन्थसमूहं रचयामास तथापि तस्य सूक्ष्माः विचाराः सर्वान् मुग्धान् कुर्वन्ति। श्रीकृष्ण एकः अद्वितीयश्च। तं विहाय न कापि गतिर्वर्तते। तत् कथं सम्भवति, कथं तस्य भगवतः समीपं गन्तुं शक्यते, कथं वा तदनुगतो भवितुं शक्यते, के यथार्था भक्ताः, कस्तावत् भक्तिलाभस्य मार्गः इत्यादयो विषयाः तेन नूतनतया आलोचिताः। विविधशास्त्रवाक्यानि समुद्धृत्य श्रीभागवतसिद्धविषयान् समर्थितवान् सः। तस्य पाण्डित्यप्रतिभया विचारशक्त्या च इयं भगवद्भक्तिः सम्यक्तया ग्रथिता या सर्वान् अनायासेन आकर्षति। तस्य मते इयं भक्तिर्न केवलं धर्मविषयिणी, अपि तु दार्शनिकविषयिण्यपि। भक्तिः नित्या सर्वफलदात्री निर्गुणा परमसुखस्वरूपा निष्कामरूपा सर्वाश्रयविवेकस्वरूपा। तस्मात् विविधाचरणेन भक्त्या श्रीकृष्णसिद्धिर्लभ्यते। वैधी भक्तिः शरणापत्तिगुरुसेवामहाभागवत-प्रसङ्गतत्परिचर्यासामान्यवैष्णवसेवाश्रवणकीर्तनस्मरणपादसेवार्चनापराधतदुपशमनवन्दन-दास्यसख्यात्मनिवेदनादिभिरेवसम्भवति। तस्मात् श्रीकृष्णस्य लाभे भक्तिरेव श्रेष्ठो मार्गः।

कूटशब्दाः- भगवान्, भक्तिः, भक्तः, भक्तेर्भेदः, भक्तेः आचरणानि।

**उपोद्घातः**

वृन्दावनस्य षट्सु गोस्वामिषु अन्यतमस्तावत् श्रीजीवगोस्वामी। स बहूनां ग्रन्थानां प्रणेता। तेषु व्याकरणदर्शनकाव्यादिषु ग्रन्थेषु प्रत्येकं सादृश्ये सत्यपि भाषारीतिनीतिविषयगाम्भीर्येण तेषु प्रत्येकं प्रत्येकस्मात् भिन्नम्। प्रायेण त्रिंशदुत्तर-चतुर्दशशततमशकाब्दात् पञ्चत्रिंशदुत्तरचतुर्दशशततमशकाब्दस्य मध्यवर्तिनि काले[1]

---

* सहकारी अध्यापक, आलिपुरद्वार महिला महाविद्यालय, पश्चिमवङ्ग।

1. लघुतोषिणीग्रन्थस्य उपसंहारे

आविर्भूतः स वैष्णवधर्मस्य साहित्यस्य च प्रभूतोन्नतिं साधितवान्। स सर्वशास्त्रज्ञः चतुर्वेदज्ञश्च आसीत्। तस्य असंख्येषु ग्रन्थेषु एकस्तावत् षट्सन्दर्भः भागवतसन्दर्भो[1] वा। तत्त्वं भगवान् परमात्मा कृष्णः भक्तिः प्रीतिः इत्येते षट् युगपत् षट्सन्दर्भा इत्युच्यन्ते। यद्यपि प्रत्येकं सन्दर्भः भिन्नः वर्तते तथापि प्रतिसन्दर्भं समानतन्त्रता वर्तते। अर्थादत्र अधिकारी विषयः सम्बन्धः प्रयोजनमित्येते वर्णिताः।

भारतीयदर्शने स्वीकृतेषु प्रमाणेषु शब्दप्रमाणं तावत् मुख्यमिति स्वीकरोति। अत्र भागवतपुराणात् शब्दप्रमाणं श्रेष्ठं[2] यत् तत्त्वसन्दर्भे वर्णितम्। ततो द्वितीयसन्दर्भे भगवतो वैशिष्ट्यं, तृतीये परमात्मस्वरूपवैशिष्ट्यं, कृष्णसन्दर्भे श्रीकृष्णस्य वैशिष्ट्यं, पञ्चमे च भक्तिः का किं तत्प्रयोजनम् कथं तया भगवत्प्राप्तिरूपं कार्यं साधितं भवति तथा अन्तिमसन्दर्भे परमपुरुषार्थविचारः कृतः। अत्र प्रीतिर्नाम भगवत्प्रीतिः।

भक्तिं विना न किञ्चित् कार्यं सिध्यति। कस्मिंश्चित् विषये किमपि प्राप्तव्यं चेत् भक्त्यैव तत् सम्भवति। श्रीलमहोदयः भागवतवक्तव्यप्रसङ्गे भगवन्तं विना न किमपि सम्भवतीत्याह। उक्तं च- "कृष्णस्तु भगवान् स्वयम्"।[3] कृष्ण एवाभिधेयः। वस्तुतस्तु जीवः मायया आवृत इत्यतः दुःखेन पीडितः। अत्र श्रीकृष्णपराङ्मुखाः सन्तः ये जीवनं यापयन्ति तेषां कृते प्रतिपदं दुःखं प्रधानबाधकं भवति। श्रीकृष्णपराङ्मुखतायाः विपरीता कृष्णसम्मुखताप्राप्तिः या अभिधेया। कृष्णसाम्मुख्यं नाम कृष्णस्योपासना।

वैष्णवाः प्राक्तनजन्मनां संस्कारान् स्वीकुर्वन्ति। तेषां मते पूर्वजन्मनः संस्कारवशादेव भगवतः अनुग्रहात् ते परस्मिन् जन्मनि अनायासेन कृतार्थाः भवन्ति। अन्येषां जीवानां तथा न भवति। यतो हि ते मायां त्यक्तुं न शक्तुवन्ति आलिङ्गितुं चेच्छन्ति। यथा निधौ सत्यपि दारिद्र्यस्य दूरीभावो न भवति यावता ते यत्नपरायणाः न भवन्ति तथा एते पराङ्मुखाः जीवाः भगवत्स्वरूपस्य वर्णनश्रवणाभ्यां तथा प्रयत्नेन कृतार्था भवन्ति। अयं प्रयत्न एव भक्तिः।

भज्-धातोः क्तिन्प्रत्यये भक्तिशब्दस्य निष्पत्तिः।[4] अस्यार्थः सेवा आराधना श्रद्धा च। यस्य सेवा क्रियते तस्य प्रीतिविधानमेव सेवाफलम्।[5] अर्थात् भक्तिर्नाम स्वप्रीतेः स्वसुखस्य वा कामनां न कृत्वा सेव्यस्य प्रीतिविधानम्। वस्तुतस्तु जीवः

---

1. सन्दर्भाः विख्यातः श्रीमद्भागवतस्य वै, भक्तिरत्नाकर-7
2. शब्द एव मूलप्रमाणम्, तत्त्वसन्दर्भः 21 पृः
3. भागवतपुराण
4. भज्-धातुः सेवार्थे उक्तः, यया सर्वमवाप्यते इति तटस्थं लक्षणम्।
5. "भज इत्येष वै धातुः सेवायां परिकीर्तितः- अत्र सेवाशब्देन स्वरूपलक्षणम्"- भक्तिसन्दर्भः.- 216, पृ. 238

श्रीकृष्णस्य स्वदास:। स्वप्रभो: प्रीतये सेवा एव दासस्य कर्तव्यमात्रम्। सेवयैव स सार्थको भवितुं नार्हति। तस्माद् भक्तिरेव अनुष्ठेया।

ज्ञानकर्मयोगाद्यनुष्ठानानि अपेक्ष्य भक्तेरनुष्ठानमधिकतया ग्राह्यम्। यतो हि श्रवणमननादिना तत्त्वस्यानुभवो भवति। निष्कामकर्मणो योगस्य चानुष्ठानेन तत्त्वानुभवो भवति। तस्मात् तत्सर्वं किञ्चित् भक्तिसममित्युक्तम्। भक्तिरेव श्रेष्ठा। शुद्धभक्त्या परतत्त्वस्य भजनं कर्तव्यम्। तदा कर्मज्ञानादे: अपेक्षा न भवति। भक्त्या यत् फलं प्राप्यते तत् सदैव श्रेष्ठम्। तत् ज्ञानकर्मादे: सहायतां विनैव स्वीयफलदानेन परतत्त्वस्य साम्मुख्यसम्पादने समर्थम्। मायामोहितानां जीवानां कृष्णपराङ्मुखतां दूरीकर्तुं ये मार्गा: सन्ति तेषु भक्तिरेव श्रेष्ठमार्ग:। सकामकर्मभि: इहलोकस्य परलोकस्य वा भोगो भवति। किन्तु निष्कामकर्मभि: चित्तशुद्धौ सत्यामपि श्रीकृष्णसेवा न भवति, न वा योगेन मायाया विनाशात् निर्विशेषब्रह्मात्मभावे सति श्रीकृष्णसेवा भवति। किञ्च, कर्मणा ज्ञानेन योगेन च यत् फलं प्राप्यते तत्र भक्ते: साहाय्यमपेक्षते। भक्तिनिरपेक्षतया कर्मज्ञानयोगा: स्वस्वफलप्रदाने समर्था न भवन्ति। किन्तु भक्ति: कर्मज्ञानयोगान् विहायैव स्वफलदाने समर्था।

भक्ते: अनुष्ठानेन ज्ञानं वैराग्यं च स्वत एवोत्पद्येते। ज्ञानं वैराग्यं च भक्तेरेव आत्मजौ। तस्मात्तौ तदा सदा तत्सेवायामेव रतौ। अत: भक्तिमतो जनस्य ज्ञानवैराग्यलाभाय पृथक्प्रयासो नापेक्षते। तस्मात् कर्मज्ञानवैराग्याणां लाभे प्रयासमकृत्वा भगवद्भक्ते: लाभे प्रयत्न: कर्तव्य:। किन्तु कर्मविशेषभूतानि देवभजनानि नित्यनैमित्तिकानि वा कर्माणि न कर्तव्यानि। यदि स्वधर्मपालनस्य उद्देश्यं हरितोषणमेव भवति तर्हि हरितोषकस्वधर्मस्य फलं श्रवणादिरुचिलक्षणादिर्भक्तिरेव भवति। भक्त्यैव अनुगतज्ञानस्य वैराग्यादिगुणानां च लाभो भवति। तस्मात् साक्षात् श्रवणादिरूपा भक्तिरवश्यं कर्तव्या।

भक्तिविशिष्टा जना: गुणवन्तो भवन्ति तथा सर्वोत्तमत्वेन परिगण्यन्ते।[1] अत्र जातिकुलादे: स्थानं न स्वीक्रियते। चण्डालोऽपि हरिभक्तिपरायणो भूत्वा श्रेष्ठ: पूज्यश्च भवति। तस्मात् भक्त्या भगवान् सदैव वसति। यद्यपि ज्ञानमार्गं स्वीकुर्वन्तो वदन्ति यत् प्रारब्धकर्मणो भोगेनैव विनाशो भवति। ज्ञानं प्रारब्धं कर्म नाशयितुं न शक्नोति। किन्तु भक्ते: प्रभाव: असामान्य:। भक्त्या प्रारब्धकर्मणामपि विनाशो भवति। तस्मात् भक्ति: सर्वै: समाश्रयणीया। तदर्थं सर्वादौ सत्सङ्ग: कर्तव्य:। सत्सङ्गे कृते भक्तिलाभ: असामान्यो भवति। अनेन श्रीकृष्णस्य भजने इच्छा जायते तथा भक्तौ रुचिर्जायते। अर्थात् आदौ श्रद्धा, तत: रति: ततश्च भक्तिरुत्पद्यते। मायाबद्धानां जीवानां चित्ते भक्तेरुन्मेषस्य सत्सङ्ग एव हेतु:। एतं विना भक्तेरुन्मेषो

1. मुचि हये शुचि हय् यदि हरि भजे।
शुचि हये मुचि हय यदि हरि त्यजे।। भक्तिसन्दर्भ:-४४-४७ पृ.

भवितुमेव नार्हति। अनेन सर्वदा श्रीकृष्णस्य कथाश्रवणे अवकाशः लभ्यते। ततः जीवचित्तस्य मालिन्यं दूरीभवति तथा साधूनां कृपा समुपलभ्यते। एतेषां कृपयैव भक्तिरुन्मिषति। यतो हि तेषां हृदये श्रीभगवान् सदैव विराजते। अयं सदाचार एव वैष्णवाचारः। सत् नाम श्रीभगवान् एव। स यस्य हृदये सर्वदा राजते सोऽपि सत्स्वरूपः। तस्मात् सत्सङ्गोऽपि मायाबद्धानां जीवानामवश्यं कर्तव्यम्।

भक्तिर्द्विविधा– वैधी रागानुगा च। शास्त्रशासनाय यस्याः भक्तेः प्रवृत्तिः सैव वैधी भक्तिः। शास्त्रानुसारं सर्वैरपि जीवैः कृष्णभजनं कर्तव्यम्। तन्न क्रियते चेत् नरकयातना उपभोक्तव्या भवति। इत्थं शास्त्रोक्तानां यातनादीनां भयेन यदा जनः कृष्णभक्तौ प्रवर्तते तदा वैधी भक्तिः सा। अत्र कश्चित् कृष्णप्रीतिविधानरूपः सङ्कल्पो न तिष्ठति।

शिक्षागुरवो नैके भवितुमर्हन्ति। किन्तु दीक्षागुरुरेक एव भवति। स नरदेहरूपाया नौकायाः कर्णधारः। संसारसमुद्रस्य पारं गन्तुं नरदेहः सुदृढनौकावत् वर्तते। श्रीभगवतः अनुकम्पारूपेण वायुना गच्छती सा नौका श्रीगुरुरूपस्य कर्णधारस्य साहाय्येन संसाराकूपारपारं गन्तुं समर्था भवति। तस्मात् तस्य शरणागतिः संसारिजीवानामवश्यं कर्तव्यम्।

यो जनः भक्तिमार्गमवलम्ब्य गुरुं निश्चिनोति स यथार्थभक्तः। किन्तु कञ्चित्कालं स वैष्णवो न वा इति विचारः कर्तव्यः। यदि स न वैष्णवः तर्हि स गुरुत्वेन न स्वीकार्यः। यतो हि दीक्षाग्रहणेन इष्टदेवोपास्तौ अधिकारो भवति। इष्टदेवस्य उपासनां कर्तुं तेन सह सम्बन्धस्थापनम् आवश्यकम्। तेन सेवया माधुर्यास्वादनेन च अन्यं कृतार्थं कर्तुं शक्यते। किञ्च, यः न श्रीकृष्णस्योपासकः तस्य कृष्णमन्त्रेण दीक्षा शास्त्रविरुद्धा। श्रीकृष्णोपासका वैष्णवा एव भक्तिमार्गं जिगमिषुभ्यः जनेभ्यो दीक्षां प्रदातुं समर्थाः। यो गुरुः अन्यं श्रीकृष्णस्य भजनाय दीक्षितं करोति तेन शब्दब्रह्मणि श्रीकृष्णे निष्णातेन भवितव्यम्। तेन शिष्यप्रश्नानां समाधानं शीघ्रं कर्तुं शक्नुयात्। अन्यथा स शिष्यस्य श्रीकृष्णविषयिण्या अनुभूतेः निष्ठायाश्च उत्पादने असमर्थः स्यात्। किञ्च, नैके दीक्षाग्रहणात् प्राक् इदं सर्वमविचार्यैव दीक्षाग्रहणं कुर्वन्ति। तस्य दीक्षागुरोः मात्सर्यादिवशात् यदि कश्चित् महाभागवतजनस्य सेवायै अनुमतिं न प्राप्नोति तर्हि तस्य शिष्यस्य उभयविधसंकटः समुपस्थितो भवति। तदा तस्य कर्तव्यं तावत् दूरात् तस्य गुरोः सम्माननम्। यदि स गुरुः वैष्णवविद्वेषापन्नस्तर्हि तं परित्यज्य अन्यस्य महाभागवतस्य सेवा कर्तव्या।

भक्तिशिक्षा ग्राह्या चेत् भक्तिमार्गस्य प्रवृत्तिहेतुः तदनुसारेण कर्तव्याकर्तव्य-ज्ञानहेतुस्तथा अर्चनादिविषयकं ज्ञानम्– इति द्विविधो विधिः स्मर्तव्यः। शरणागतिर्नाम श्रीकृष्णभजनाय अनुकूलविषयाणां ग्रहणं, प्रतिकूलविषयाणां वर्जनं, स रक्षिष्यतीति

विश्वास:, तेषां रक्षकत्वेन वरणम्, तत्रात्मसमर्पणम्, तत्कृपाभिन्ना न काचित् गतिर्विद्यते- इति षड्विधा शरणागति:। समीचीना शरणागति: शरणागताय शीघ्रं फलं प्रयच्छति। शरणागतान् सर्वविधदु:खेभ्यो भगवान् उद्धृत्य स्वमाधुर्यदानेन कृतार्थान् करोति। इयं शरणागतिरेव प्रथमत: कर्तव्या।

शरणागति: नास्ति चेत् न कश्चित् तदीयो भवितुं शक्नोति। शरणागत्या सर्वाभीष्टसिद्धौ सत्यामपि भगवच्छास्त्रोपदेशकस्य श्रीगुरो: नित्यसेवा कर्तव्या। यतो हि श्रीगुरो: प्रसन्नतैव विविधानर्थनाशस्य श्रीभगवत: प्रसन्नतायाश्च मूलभूता। अत्र श्रीगुरो: सेवा अवश्यं कर्तव्या। तस्य सेवा नाम अन्येषामपि वैष्णवानां सेवा कर्तव्या। श्रीगुरो: महतां च सेवया कर्मादिजाड्यस्य संसारभयस्य तत्कारणभूतस्य अज्ञानस्य च नाशो भवति। अनेन श्रीभगवतश्चरणे भक्तिलाभाय भगवत: श्रवणकीर्तनस्मरणपाद-सेवार्चनवन्दनदास्यसख्यात्मनिवेदनानां विविधभक्तीनामाचरणमावश्यकम्।[1]

श्रवणम्- भक्तिमार्गे प्रथमं तावत् श्रवणम्। श्रवणं नाम श्रीभगवतो नामरूपगुणलीलादे: श्रवणेन्द्रियेण ग्रहणम्। अधमोऽपि श्रोता सकृत् भगवन्नामश्रवणेन मुक्तिफलं लब्धुं शक्नोति। उत्तमस्य विषये तु संशय एव नास्ति। उत्तमो जन: नामश्रवणेन परां भक्तिं लब्धुं समर्थो भवति। किञ्च, रूपश्रवणेनापि तस्या लाभे समर्थो भवति स:। विश्वसृष्टिस्थितिलयरूपा लीलावतारविनोदरूपा- एतयोर्द्वयोर्मध्ये द्वितीयैव श्रवणे प्रशस्यतरा। यद्यपि एतयोरन्यतरेण तत् सम्भवति तथापि नामश्रवणमेव प्रथमं कर्तव्यम्। अनेन अन्त:करणं शुद्धं भवति। शुद्धान्त:करणरूपं श्रवणमेव योग्यम्। रूपे अन्त:करणे उदिते सति गुणस्फुरणं भवति। तत: नामरूपगुणानां सम्यक्तया स्फुरणे जाते लीलाया: स्फुरणं सम्यक् भवति। इदं श्रवणं कर्तुमिष्यते चेत् कीर्तनकारिणा भवितव्यम्। कीर्तने कृते श्रवणमपि सम्भवति। महाजनेन नामरूपगुणलीलादिषु कीर्तितेषु श्रवणं कर्तव्यम्। तत्र पुन: भागवतश्रवणम् अत्यन्तमभीष्टं श्रेष्ठं च। यतो हि तत् तादृशप्रभावविशिष्टं शब्दमयं परमरसात्मकं च। तस्मात् महता उभयो: सम्पादने सति अधिकं श्रेष्ठत्वम् अर्जितं भवति। किञ्च, श्रीभगवदपेक्षया श्रीकृष्णस्य नामरूपगुणलीलाश्रवणेन परमफलस्य प्राप्तिर्भवति।

कीर्तनम्- श्रवणात्परं कीर्तनं कर्तव्यम्। श्रवणाभावे कीर्तनमज्ञातं भवति। तस्मात् तदेव पूर्वमावश्यकम्। किन्तु यदि महाजनानां कीर्तनश्रवणे सौभाग्यं न भवति तर्हि ते पृथक्तया कीर्तनीया:। कीर्तनेऽपि क्रमेण नामरूपगुणलीलानां व्रत: विधेय:। तस्मादेव नामकीर्तनं कर्तव्यम्। तेन श्रीकृष्णे प्रेमभक्तिर्जायते। संसारभोगरूपस्य पापस्य क्षय: नामकीर्तनस्यैव आनुषङ्गिकं फलम्। अन्यथा तत् फलदाने बाधकं

---

1. श्रवणं कीर्तनं विष्णो: स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यामात्मनिवेदनम्।। भक्तिसन्दर्भ:-169, भा. पु.-7/5/23

भवति। विषयेऽस्मिन् दशानामपराधानां त्यागः श्रीजीवगोस्वामिना उक्तः-

**1. साधूनां निन्दा**- श्रीनाम्ना साधवः प्रसिद्धाः भवन्ति। तेषामवमाननं निन्दा वा कथञ्चिदपि न सोढव्यम्। अयमेव नामापराधः।

**2. विष्णुशिवयोः गुणनाम्नोः पृथक्त्वचिन्तनम्**- वस्तुतस्तु शिवो विष्णोरेव अवतारः। यः शिवः स एव विष्णुः। तेषां भेदचिन्ता नोचिता। स एव सर्वेश्वरः।

**3. गुरोः अवज्ञा**- यः नामाश्रयेण भगवत्कृपां लब्ध्वा गुरुपदं लब्धवान् तस्य अवज्ञा भगवदवज्ञेव वर्तते।

**4. वेदादिशास्त्रनिन्दा**- अनेन नामापराधो भवति। ये एतत् कुर्वन्ति ते पाषण्डाः सन्ति।

**5. हरिनाम्नि अर्थवादकल्पना**- हरिनाम्नि न कोऽपि अर्थवादो भवति। तस्य सामर्थ्यं सर्वत्र शास्त्रेषु उक्तम्। तस्मात् श्रीनाम्नः महिमानं ये न स्वीकुर्वन्ति तेऽपि अपराधिनः।

**6. नाम्ना पापनिवृत्तिः**- नामोच्चारणेन सर्वाणि पापानि दूरीभवन्तीति ज्ञात्वा नामश्रवणं कृत्वापि यदि कश्चित् पापकर्मसु प्रवर्तते तर्हि सोऽपि नामापराधः। एतस्मात् परं शतं प्रयत्ना अपि व्यर्थाः।

7. धर्मव्रतादीनां शुभकर्मणां फलं हरिनामफलसमानमिति चिन्त्यते चेत् नाम्नः महिमा नश्यति। धर्मादिशुभकर्मभिः दैहिकं सुखं जायते, निष्कामतया अनुष्ठीयमाने च चित्तशुद्धिर्जायते। नामग्रहणेन तु श्रीभगवत्प्रेमलाभो भवति। तस्मादेतयोः साम्यं कदापि न चिन्त्यम्।

**8. नामग्रहणे असावधानता**- माहात्म्यश्रवणे सावधानतायाः अभावेन अनिच्छा न सह्या। अनेन औदासीन्यं प्रकाशते।

9. नामादिश्रवणे उदासीनस्य अहमित्यभिमानेन विषयभोगे रतिः।

10. श्रद्धाहीनेभ्यः पराङ्मुखेभ्यः उपदेशश्रवणे अनिच्छुकेभ्यः उपदेशप्रदानम्- श्रीभगवन्नाम्नि रतिः स्थातव्या। आग्रहशून्याः श्रोतारः न स्युः। किन्तु श्रवणात् प्राक् सर्वेऽपि श्रोतारः श्रद्धाहीना एव भवन्ति। तस्मादत्र विमुखानां जनानामेव विषये उक्तमिति ग्राह्यम्। एतादृशस्य जनस्योपदेशः अपराध एव।

यदि असावधानतायाः नामापराधो भवति तर्हि अस्य नामापराधस्य निराकरणाय सततनामकीर्तनेन प्रायश्चित्तं कर्तव्यम्। अर्थात् नाम्नः सततं कीर्तनेनैव तस्य निवृत्तिर्भवति।

**स्मरणम्**- तृतीयमाचरणं तावत् स्मरणम्। नामकीर्तनं न परित्यज्य स्मरणं

कर्तव्यम्। स्मरणं नाम मनसा तस्यानुसन्धानम्। सर्वेभ्यो विषयेभ्यो चित्तं समाकृष्य सामान्यतया भगवति स्थापनमेव धारणा। विशेषेण रूपादीनां चिन्तनं ध्यानम्। इदं ध्यानं यदि अविच्छिन्नं भवति तर्हि तत् ध्रुवानुस्मरणमित्युच्यते। यदा केवलं ध्येयमात्रस्य स्फुरणं भवति तदा समाधिर्भवति। एवं समाधावेव स्मरणं सार्थकम्।[1]

**पादसेवा**- यदि रुचिः शक्तिश्च तिष्ठतः तर्हि कीर्तनस्मरणादिकं न परित्यज्य भगवत्पादसेवनं कर्तव्यम्। केचित् सर्वदा स्मरणस्य सिद्धये पादसेवां कुर्वन्ति। पादसेवनमित्यत्र पादशब्दस्यार्थः भक्तिः तथा सेवनं नाम देशकालोचितं परिचर्यादिकम्। श्रीमूर्तेः दर्शनं स्पर्शः परिक्रमणं मन्दिरगमनं गङ्गापुरीद्वारकामथुरादितीर्थगमनम् इत्यादीनि पादसेवनानि इत्युच्यन्ते।

**अर्चनम्**- तदनन्तरम् अर्चनं कर्तव्यम्। अर्चने यदि श्रद्धा भवति तर्हि दीक्षागुरोः समीपे दीक्षाग्रहणं सुकरं भवति। किन्तु पञ्चरात्रादिविध्यनुसारेण अर्चनस्यावश्यकता नास्ति। शरणागत्यादिषु केनचित् एकेनैव परमपुरुषार्थसिद्धिः सम्भवति। तथापि श्रीनारदादीन् भक्तिमार्गाचार्यान् अनुसरन्तो जनाः श्रीभगवता सह दीक्षाविधानेन सम्बन्धविशेषं स्थापयितुमिच्छन्तः श्रीगुरोः समीपे दीक्षाग्रहणं कृत्वा अवश्यमर्चनं कुर्युः। दीक्षामन्त्रः देवस्वरूप इति मत्वा अर्चनं कर्तव्यम्। ये धनिका गृहस्थाः तेषां कृते अर्चनमार्ग एव मुख्यः। यदि तदकृत्वा निष्किञ्चनवत् स्मरणादिष्वेव प्रवर्तन्ते तर्हि तेषां वित्तशाठ्यं प्रकाशितं भवति। सर्वैरपि दीक्षितैः अर्चना कर्तव्या। अन्यथा तेषामधोगतिर्भवति। तस्मात् पूर्वं दीक्षाग्रहणं ततश्च अर्चनम्। अस्मिन् अर्चने सावधानता अवलम्बनीया। अन्यथा नामापराधो जायते। यद्यपि अनादर एव सर्वेषां नामापराधानां मूलभूतः तथापि अनादरस्य परित्यागेन अर्चनं कर्तव्यम्।

**वन्दनम्**- कीर्तनस्मरणवत् स्वतन्त्रतया वन्दनमपि अनुष्ठेयम्। ये अनन्त-गुणैश्वर्यस्य श्रवणात् तदीयगुणानुसन्धानपादसेवादिषु दैन्यभावमापन्नाः केवलं नमस्कारे एव अध्यवसाययुक्ताः भवन्ति तेषामेव अस्मिन् वन्दने अधिकारः। इत्थमयं नमस्कारः तस्य अर्चनत्वेन अतिदिश्यते।

दास्यम्- श्रीविष्णोः दासत्वाभिमानमेव दास्यम्। उक्तं च-

**त्वयोपभुक्तस्रग्गन्धवासोऽलङ्कारचर्चिताः।**
**उच्छिष्टभोजिनो दासास्तव मायां जयेम हि॥**

भजनप्रयासो नास्ति चेदपि तादृशाभिमानेनैव सिद्ध्यति। अनेनाभिप्रायेण अर्चनादेः परं तस्य निर्देशः कृतः। किन्तु अन्यानि भजनानि अस्मादेव दास्यात् श्रेष्ठानि भवन्ति।

---

1. नामरूपध्यानधारनासमाधयः पञ्चविधाः, भक्तिसन्दर्भः-304

**सख्यम्**- हिताशंसनरूपो बन्धुभाव एव सख्यमित्युच्यते। इदं सख्यं प्रेमयुक्तं भावनमयमित्यतः दास्यापेक्षयापि उत्तमत्वात् दास्यात्परं पठितम्। भगवद्विषये हिताशंसनमेव सख्यम्। भक्तविषये भगवता या हिताकांक्षा क्रियते तस्या नित्यत्वात् भक्तानां सख्यसेवापि नित्या भगवद्विषयिणी हिताकांक्षामयी च।

**आत्मनिवेदनम्**- देहात् शुद्धात्मानं यावत् समेषां पदार्थानां सर्वथा भगवति समर्पणमेव आत्मनिवेदनम्। आत्मनः कृते प्रयासाभावः स्वस्य साध्यसाधनानां तस्मिन् समर्पणं तथा तमुद्दिश्यैव प्रयत्नः इत्येव तस्य स्वरूपम्। "तन्मे भवान्खलु वृतः पतिरङ्गजायामात्मार्पितश्च भवतोऽत्र विभो विधेहि" इति भागवतपुराणस्थे श्रीरुक्मिणीदेव्याः वाक्ये इदमात्मनिवेदनमेव प्रकाशितम्। केचन तु देहार्पणं शुद्धक्षेत्रज्ञार्पणं वा आत्मार्पणमिति वदन्ति। श्रीहरिं प्रति समष्टिरूपेण आत्मनिक्षेपकृतवैशिष्ट्य-प्राप्तिहेतुभूता स्मरणादिमयी उपासनैव आत्मार्पणम्।

एवं श्रवणार्चनादिभिः भगवत्प्रीतिसम्पादनमेव भक्तेः फलम्। एतानि आचरणानि वैधभक्तौ अन्तर्भवन्ति। यतो हि एतानि शास्त्रविधिसापेक्षाणि। रागानुगा भक्तिस्तु एतस्या भिन्ना। रागात्मकविषयेभ्यो रागानुगा भक्तिर्भवति। विषयिणः स्वाभाविके विषये यत् प्रेमातिशय्यं तदेव रागपदवाच्यम्। यथा चक्षुरादीन्द्रियाणां सौन्दर्यदर्शने स्वाभाविकम् इच्छातिशय्यं राग इत्युच्यते। अयं रागः बहुविधो भवति। इयं रागात्मिका भक्तिरेव स्वरूपे शक्तौ कार्ये विषये आश्रये सर्वप्रधाना। सा क्रमेण स्वरूपशक्ति-विलासरूपा, श्रीकृष्णं वशीभूतं कर्तुं समर्था, अनन्तसौन्दर्यमाधुर्यादिमयं श्रीकृष्णं चमत्कृतं कुर्वती वर्तते। विषयो नाम स्वयं भगवान् सच्चिदानन्दविग्रहः श्रीकृष्णः। आश्रयास्तावत् प्रियाः व्रजवासिनः। तेषां भक्तिरेव सर्वोत्कृष्टं वस्तु। तेषां भावानामनुगमनं कृत्वा तेषामानुगत्यं च स्वीकृत्य श्रीकृष्णभक्तौ या लालसा सैव रागानुगा भक्तिः। इदमानुगत्यं तदनुरूपमाचरणं च मानसिकं कार्यम्। अस्या भक्तेरनुष्ठानं गूढं रहस्यमयं च। यद्यपि श्रीकृष्णविषय एव मुख्यः तथापि येन केनचित् उपायेन कृष्णे मनो निवेशनीयम्। उक्तं च- "तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्" इति। तस्मात् भक्तेन विशुद्धचित्तस्य पुरुषस्य सर्वभूतेषु तथा आत्मनि आकाशसमस्य अपावृतस्य बहिरन्तश्च आत्मस्वरूपस्य श्रीकृष्णस्य दर्शनं केवलम् अन्तरङ्गभक्त्यैव सम्भवति। इत्थं श्रीपादजीवगोस्वामी भक्तिमेव अभिधेयत्वेन स्वग्रन्थे प्रकाशितवान्।

## सहायकग्रन्थसूची

1. गोस्वामी, भक्तिसिद्धान्तसरस्वती (सम्पा.), श्रीभक्तिसन्दर्भः, गौडीयमिशन्, कोलकाता- 2005।

2. गोस्वामी, श्रीप्राणगोपाल: (सम्पा.), श्रीभक्तिसन्दर्भ:, संस्कृतपुस्तकभाण्डार, कोलकाता– 1407 वङ्गाब्द:।

3. शास्त्री, श्रीहरिदास: (सम्पा.), श्रीभक्तिसन्दर्भ: (हिन्दी), गदाधरगौरहरिप्रेस, मथुरा उत्तरप्रदेश–466 गौडवङ्गाब्द:।

4. गोस्वामी, राधारमण:(सम्पा.), श्रीभक्तिसन्दर्भ:, कोलकाता विश्वविद्यालय, कोलकाता– 1955।

5. गोस्वामी, भागवदाचार्यविमलकृष्ण: काननविहारीगोस्वामी च (सम्पा.), समग्रषट्सन्दर्भ:। प्रथमद्वितीयखण्डौ, संस्कृत बुक डिपो, कोलकाता–2020।

6. गोस्वामी, राधाविनोद: (सम्पा.), भागवतपुराणं द्वादशस्कन्धा:, गिरिजा, कोलकाता– 1194।

7. जोशी, रसिकविहारी, भागवतदर्शनम् (हिन्दी), चौखम्बा, वाराणसी– 1985।

8. दत्तदिलीपकुमार:, वैष्णवदर्शन ओ साहित्येर रसालोके, अन्नपूर्णा प्रकाशनी, कोलकाता– 1963।

✦✦✦

 ISSN : 0975-1769

# अर्चावतारस्य वैदिकत्वप्रदर्शनं बुद्धनिर्वाणकालापेक्षयार्वाचीनत्वनिरसनञ्च - एकं समीक्षणम्

-चन्दन-मुखार्जी *

## 0.1. शोधसारः

श्रीरङ्ग-वेङ्कटाद्रि-हस्तिगिरि-यादवाद्रि-घटिकाचलादिषु सकलमनुजनयन-विषयतां गतो मूर्तिविशेषः अर्चावतारः। अर्च्यते इति अर्चा। मन्त्राधीनो भावाधीनः स्वभक्तजनवाञ्छितकल्पतरुर्भगवान्नारायणः सर्वसहिष्णुर्भक्तजनानुग्रहार्थं धृतावतारः। प्रतिमापूजनस्य वैदिकत्वसमर्थनम्, प्रतिमापूजनस्य बुद्धनिर्वाणकालापेक्षया अर्वाचीन-त्वाक्षेपः, नानाविधवैदिकलौकिकप्रमाणपुरःसरम् तन्निरसनञ्च इति शोधस्य मुख्यविषयः।

## 0.2. प्रमुखशब्दाः

भक्तिः, अर्चावचारः, दिव्यदेशम्, मोक्षः, भारतीयसंस्कृतिः च।

## 1. आमुखम्

अस्मत्पूर्वाः सदसद्विचक्षणाः त्रिकालाबाध्यधुरन्धरा आर्या लोकहितायैहिका-मुष्मिकश्रेयः-प्रतिपादकानि नैकानि शास्त्राणि विरचय्य नो लोचनमुदमिलयन्। महता कालेनानायासेन स्वानुभवं प्रमाणीकुर्वद्भिस्तैरैहिकामुष्मिकयोर्मध्ये क्षणं भङ्गुरं दुःखेन सम्मिश्रितमैहिकमपेक्ष्य शाश्वतं नित्यमनन्तमा-मुष्मिकमेव श्रेयः सर्वापेक्षयोत्कृष्टमिति महतोद्घोषेण प्रतिपादितम्। तादृशञ्च श्रेयः सर्वान्तर्यामिनः सर्वज्ञस्य समाराधनेन विना प्राप्तुं नैव शक्यते। सः च परमः पुमान् परव्यूहविभवान्तर्याम्यर्चारूपेण पञ्चात्मनावतिष्ठत इति "स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतम्"[1] इत्यादिश्रुतयो विवादरहितं प्रतिपादयन्ति। एतेषु पञ्चसु रूपेषु पञ्चममर्चारूपमेव भक्तवात्सल्येन बहुधा प्रशंसितं भवति। एवमियमर्चा न केवलमामुष्मिकमपि त्वैहिकमाराधकैरभीप्सितं फलं प्रयच्छति। अद्यापि ग्रामराज्यराष्ट्रसमृद्धिं समुद्दिश्य

---

* शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्, पश्चिमवङ्गः।

1. याज्ञिक्युपनिषत् 79/16/2

तत्र तत्र देवालयादिषु उत्सवा: पूजाविधयश्च क्रियमाणा दृश्यन्ते। पुरापि पुण्यशीला: चक्रवर्तिनो राजानो वणिज: समाजसंस्कारका: च समाजसमृद्धिमुद्दिश्यैव बहून् देवालयान् प्रतिष्ठापयामासु:। एवं देवालयादिषु प्रतिष्ठितस्यार्चावतारस्य स्वरूपं सनातनत्वं वेदसिद्धत्वं भक्तैरुपास्यत्वं माहात्म्यं प्रयोजनमाक्षेपसमाधानाभ्यामुदाहरण-सहितञ्चास्मिन् लेखे प्रतिपादयिष्यते।

## 2. भगवान्

शेषकल्याणगुणो भगवान् वासुदेवो नैकाभि: श्रुतिभिर्नैकाभि: स्मृतिभिश्च लक्षित:, प्रकृतदिव्यमङ्गलविग्रहविशिष्टोऽनन्यशरण: सत्यकामो निखिलजगत्कारणत्व-मुमुक्षुध्येयत्वाभ्यां विशेषित:, साम्यादिभ्रमापादकश्रुतीनां तात्पर्येणोपपादित:, कारणत्वादिग्रहधर्मितयावच्छेदकभूत:। सर्वविद्यानुयायिभि: स्वरूपनिरूपकधर्मत्वेन प्रसिद्धैरानन्दत्वसत्यत्वज्ञानत्वानन्तत्वाद्यखिलहेयत्वै: प्रकृतविग्रहोपलक्षितो दिव्यात्म-स्वरूपश्च। नारायण: परमपुरुषोऽनन्तगुणसमन्वितोऽनन्याधीनैश्वर्य:[1] उभयविभूतिनायक: सर्वभूतान्तर:[2] अपहतपाप्मा[3] सर्वान्तर्यामी[4] षडैश्वर्यसम्पन्नो[5] वैकुण्ठनिवासी चेत्यादि-विशेषणैर्विभूषित:। इतोऽप्यष्टभिर्विशेषणैर्भगवतो विष्णोर्माहात्म्यं गीयते –

**सर्वेशानः सहजमहिमा सर्वभूतान्तरात्मा**
**सर्वान्दोषान् स्वयमतिपतन् सर्वविद्यैकवेद्यः।**
**कर्माध्यक्षः कलुषशमनः कोऽपि मुक्तोपभोग्यः**
**सिद्धोपायः स्फुरति पुरुषो वाजिनां संहितान्ते।।**[6] इति

समस्तानि श्रुतिस्मृतिन्यायवाक्यानि चिदचिद्विशिष्टाद्वैतेऽनन्तगुणकल्याणगुणगणे सर्वानुगते सर्वात्मके परमेश्वरे विष्णावेव पर्यवसितानि।

## 3. परः, व्यूहः, विभवः, अन्तर्यामी, अर्चः च

विशिष्टाद्वैतवेदान्त ईश्वर: पञ्चधा। स ईश्वर: पर-व्यूह-विभव-अन्तर्यामि-अर्चावतारेण निरूपित:। उच्यते तावत् सम्प्रदाये –

---

1. ब्रह्मादिदेवसङ्घेषु स एव पुरुषोत्तम:।
   स्त्रीप्रायमितरत् जगद्ब्रह्मपुर:सरम्।। (श्वेतश्वेतरोपनिषत् 6/7) इति।
2. अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण: स्थित:। (नारायणोपनिषत् 5) इति।
3. एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण:। (सुबालोपनिषत् 7/1) इति।
4. योऽसावसौ पुरुष:। (ईशावास्योपनिषत् 16) इति।
5. ऐश्वर्यं च तथा वीर्यं तेज: शक्तिरनुत्तमा।
   ज्ञानं बलं यदेतेषां षण्णां भग इतीरित:।
   एभिर्गुणै: पूर्णो य: स एव भगवान् हरि:।। (वृद्धहारीतस्मृति: 6/164-165) इति
6. वेदान्तदेशिककृतम् ईशावास्यभाष्यम् (मङ्गलम् 2)

**परो व्यूहश्च विभवो हार्दश्चार्चेति पञ्चधा।**
**विग्रहानिच्छया गृह्णन्विभाति परमः पुमान्।।**[1] इति

अर्थात् परमः पुमान् श्रीमान् नारायण ईच्छया विग्रहान् गृह्णन् विभाति। श्लोके हार्द इत्यनेनान्तर्यामिणो ग्रहणम्। प्रत्येकस्य सुबृहत्कलेवरत्वात्तेषां सामान्यतया विवरणमधः प्रस्तूयते।

### 3.1. परः

परस्त्वेक इति सिद्धान्तः। स आदिसनातन आदिनारायणः परोऽनादिनिधनोऽनवधिकानन्दसुन्दरः स्वयंप्रकाशः परमव्योमाशब्दिते श्रीवैकुण्ठे श्रीभूमिनीलासमेतः। "यत्र पूर्वे साध्याः सन्ति देवाः"[2] इति, "सदा पश्यन्ति सूरयः"[3] चेत्यद्या नैकाः श्रुतयः तं वर्णयन्त्यः तस्मिन् पर्यवस्यन्ति। नित्यैर्मुक्तैश्चाविशेषेण सेव्यमानोऽखिलसंसारपतिर्वासुदेवः। ज्ञानं बलमैश्वर्यं वीर्यं शक्तिः तेजः चैतेषां षण्णां गुणानामुपयोगेन षाड्गुण्यपरिपूर्णेन नारायणेन स्वतः सर्वं सर्वथा सर्वदा साक्षात्क्रियते, तथा साक्षात्कृतं च सर्वं ध्रियते, धारयन्नेव नियच्छति, धारयन्नियच्छन् चाशिथिलो भवति। अघटितञ्च घटयति। तत्र च सहकारिनमनपेक्ष्यैव सर्वत्राविर्भूतो भवतीति तात्पर्यचन्द्रिकायां प्रदर्शितः। वेदान्तदेशिको वरदराजपञ्चाशदि परस्वरूपं प्रतिपादयन् वदति - परः शान्तोदितोऽखिलहेयविपक्षभूतो नित्यः परो वरदः सर्वगतो निष्पन्दनन्दथुमयः केवलं शमवतैर्हृदयैः प्राप्यः। भणितञ्च तेन -

**संचिन्तयन्त्यखिलहेयविपक्षभूतंशान्तोदितं शमवता हृदयेन धन्याः।**
**नित्यं परं वरदं सर्वगतं सुसूक्ष्मंनिष्पन्दनन्दथुमयं भवतः स्वरूपम्।।**[4]

इति

भगवतो गुणद्वयमत्यन्तं प्रसिद्धं- परत्वोपयोगिनः सौलभ्योपयोगिनश्चेति। परत्वं सौलभ्यञ्चोभयोः समाश्रयणीयता प्रयोजकत्वम्। प्रसिद्धञ्च -

**तवानन्तगुणस्यापि षडेव प्रथमा गुणाः।**
**यैस्त्वयेव जगत् कुक्षावन्येऽप्यन्तर्निवेशिताः।।** इति

ऐश्वर्यं वीर्यं बलं तेजः अनुत्तमा शक्तिः ज्ञानञ्चेत्येते च प्रथमे गुणा यद्यपि भगवत्स्वरूपमाश्रयन्ति, तथापि सर्वेष्ववतारेषु भगवन्तं न जहति। अर्थात् कार्यानुरोधेनैते

---

1. कृष्णमाचार्यः गयंपट्टै, अर्चावतारवैभवम्, श्रीकृष्णविसालमुद्रालय, कुम्भकोणम्, 1921, पृष्ठसंख्या - 33
2. ऋग्वेदः 1/164/50
3. ऋग्वेदः 1/22/20
4. वरदराजपञ्चाशत् 16

गुणाः कदाचित्प्रकाशिताः कदाचिदप्रकाशिताश्च तिष्ठन्ति। पररूपे तु सर्वदा प्रकाश इत्येव भावनीयम्। एवं सः पररूपो भगवान्नारायणो ज्योतिषां ज्योतिः,[1] ज्योतिषां पतिः,[2] सर्वतेजसां कारणभूतः[3] निरतिशयतेजोशालीति सर्वत्र श्रुतिस्मृतिन्यायपुराणादिषु गीयते।

### 3.2. व्यूहः

व्यूहो नाम पररूपादुत्पन्नं रूपान्तरं, तद्विशिष्टो वा भगवान्। स च चतुर्विधो वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धभेदात्। वैखानसशास्त्रेष्वेतेषामेव पुरुष-सत्य-अत्युत-अनिरुद्धपदैर्व्यपदेशः। सर्वत्र चावतारेषु प्रभोरिच्छैव नियामिका। साधुपरित्राणादिक-मेवावतारफलम्। अत्र च प्रथमो व्यूहो वासुदेवो गुणादिभिः पररूपान्न भिद्यते। तस्मादेव परवासुदेवो व्यूहवासुदेव इति च प्रसिद्धिः। परवासुदेवो नित्योदित इति। द्वितीयो व्यूहवासुदेवः शान्तोदित इति साम्प्रदायिको व्यपदेशः। उच्यते च भगवच्छास्त्रे- "नित्योदितात्सम्बभूव तथा शान्तोदितो हरिः" इति। परप्यूहयोर्वासुदेवयोरविशेषाभिप्रायेण च तत्र तत्र त्रैव्यूहपक्षोऽपि प्रथते। अत्र व्यूहवासुदेवे परवत् षडपि गुणाः प्रकाशन्ते। व्यूहवासुदेवादुत्पन्ने सङ्कर्षणे ज्ञानं बलञ्चेति द्वौ प्रकाश्येते। तत्रान्ये गुणा अनभिव्यक्ता वर्तन्ते। अयञ्च जीवतत्त्वमभिमन्यते, शास्त्रं प्रवर्तयति, संहरति च जगत्। सङ्कर्षणात् प्रद्युम्नश्च समुत्पद्यते। अत्रैश्वर्यं वीर्यञ्चेति द्वौ गुणौ चाभिव्यक्तौ। अयञ्च मनस्तत्त्वाभिमानी। अस्य च कर्म-धर्मप्रवर्तनं सृष्टिश्च। सङ्कर्षणादनिरुद्ध उत्पद्यते। उत्पद्यमाने चानिरुद्धे शक्तितेजसी प्रकाश्येते। अयञ्चाहंकारतत्त्वमभिमन्यमानो जगत् पालयति। एवं चातुर्व्यूह्यस्य जाग्रत्स्वप्नादिस्थानभेदादिकं भगवच्छास्त्रे लक्ष्मीतन्त्रादौ सप्रमाणं निरूपितं वर्तते। वेदान्तदेशिककृतिष्वप्यस्य[4] माहात्म्यं भूरिशो दरीदृश्यते। क्वचित् केशवादीनि व्यूहान्तराण्यपि शाखाभेदेन प्राप्यन्ते।

---

1. न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
   तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति।। (कठोपनिषत् 2/2/15) इति।
2. ज्योतिर्दर्शनात्। (ब्रह्मसूत्रम् 1/3/41) इति।
3. यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।
   यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्।। (श्रीमद्भगवद्गीता 15/12) इति।
4. रूढस्य चिन्मयता हृदये करीश-
   स्तम्बानुकारिपरिमाणविशेषभाजः।
   स्थानेषु जाग्रति चतुर्ष्वपि सत्यवन्तः
   शाखाविभागचतुरे तव चातुरात्म्ये।। (वरदराजपञ्चाशत् 19) इति।

### 3.3. विभवः

स्वैकान्तिकानां भक्तानां मोदनाय साधुजनपरित्राणायासाधुविनाशाय धर्मसंस्थापनाय च मत्स्यकूर्मवराहवामननृसिंहरामकृष्णाद्यवतारविशेषैराविर्भूतो विभवः। शास्त्रेषु क्वचित् षट्विंशतिः, क्वचित् अष्टात्रिंशत्, क्वचिच्चैकोनचत्वारिंशदिति संख्याभेदः समुपलभ्यते। वस्तुतस्तु विभवाः त्वनन्ता एव। भगवतः प्रसिद्धा अवतारा ज्ञायन्ते शास्त्रेष्वप्यवलोक्यन्ते। किन्त्वप्रसिद्धा अपि बहवोऽवतारा भवितुमर्हन्ति। तेषां भानमस्माभिः कर्तुं न शक्यते। तत्तत्सजातीयसंस्थानत्वेन सौलभ्यातिशयसमाश्रयणीयत्वेन सौकर्याद्यनुरोधेन प्रतिप्रलयं धर्मसंस्थापनायाधर्मविनाशाय च मत्स्यकूर्मादिदशकं विभव इति क्वचिद्विशिष्य निर्देशः। रामकृष्णाद्यवतारेषु च तत्तत्कार्यानुसारेण गुणप्रकाशनं तत्तिरोधानादिकं तु सुतरामुपपद्यत इति तत्र प्राकृतत्वशङ्का कर्तुं नोचिता। प्रोच्यते च –

**समस्तशक्तिरूपाणि तत्करोति जनेश्वर।**
**देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया।।**[1] इति

यद्यपि मत्स्यः कूर्मो वराहो वामनो नृसिहः परशुरामो रामो बलरामो बुद्धः कल्की चेति दशावताराः प्रसिद्धाः। तथापि विभवतदवान्तरभेदाश्चानन्ताः। अत एव कृष्णरूपाण्यसंख्यानीत्युच्यते। जयगोस्वामीकृतं दशावतारस्तोत्रं सर्वाधिकं प्रसिद्धम्। इतोऽपि नाना स्तोत्राणि तु तत्र वर्तन्ते एव। तेषु वेदान्तदेशिककृतं दशावतारस्तोत्रमपि रम्यं वर्तते।

### 3.4. हार्दः अन्तर्यामी वा

अन्तर्यामी अन्तः प्रविश्य नियमनं कर्मफलप्रदानञ्चेत्युभयकर्मकारी। सर्वेषामपि हृत्पद्मकर्णिकामध्यगतोऽयं सूक्ष्मः। अयमेव "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति"[2] इति, "य एषोऽन्तर्हृदय आकाशः"[3] इति, "हृदि सन्निविष्टः"[4] चेत्यादिभि-रुच्यते। अयञ्च हार्द इति नामान्तरम्। उपनिषत्प्रतिपाद्यात् सर्वान्तर्यामिणो दिव्यात्म-स्वरूपादपर एवायमन्तर्यामी। दिव्यात्मस्वरूपं सर्वगतत्वाद्धृत्पद्मकर्णिकामध्यगतम्। दिव्यात्मस्व- रूपस्यान्तः प्रविश्य नियन्तृतयान्तर्यामिव्यपदेशार्हत्वेऽपि अवतारविशेष एवायमन्तर्यामी। सर्वान्तर्यामि दिव्यस्वरूपमनुसन्धित्सूनां द्वारमित्ययमन्तर्यामिशब्देन व्यपदिश्यते। "अन्तर्यामिस्वरूपं च सर्वेषां बन्धुवत्स्थितम्" इत्यारभ्य "स्वर्गनरक-प्रवेशेऽपि बन्धुरात्मा हि केशवः" इत्यन्तेन स्तूयते। एवमन्तर्यामिरूपोपासने न

1. नारदपुराणे पूर्वार्धे – 47/47
2. कठोपनिषत् 2/1/12
3. तेत्तिरीयोपनिषत् 1/6/1
4. श्रीमद्भगवद्गीता 18/13

समेषामधिकार:। केषाञ्चन महायोगिनामेव तत्राधिकार:। कुत्रैतदुपासनं कर्तव्यमिति चेत् पद्मकोशप्रतीकाश इति साक्षात्तैत्तिरीयोपनिषत्[1] वदति।

## 3.5. अर्चावतार:

गृहग्रामनगरजलशैलादिषु वर्तमानो मूर्तिविशेषोऽर्चावतार:। अयञ्च सर्वसहिष्णुर्भक्त-जनानुग्रहार्थं धृतावतार:। मन्त्राधीनो भावाधीन: सन् स्वभक्तजनवाञ्छितकल्पतरु:। उपासकोद्धारकामनया परेण व्यूहेन विभवेन वा बिम्बानुरूपमात्मशरीरं कलयता स्वयं प्रविश्याविभागेनैकीकृत उपासकाभिमतसुवर्णादिनिर्मितो विग्रहविशेषोऽर्चावतार:। श्रीरङ्गवेङ्कटाद्रिहस्तिगिरियादवाद्रि-घटिकाचलादिषु सकलमनुजनयनविषयतां गतो मूर्तिविशेष:। तस्य विस्तृतं विवरणमग्रे प्रदास्यते।

## 4. अर्चावतारे आक्षेप:

एवं सर्वाभीष्टफलप्रदस्य सर्वविधातिशयोपेतस्य सर्वसुलभस्य सर्वाभीप्सित-साधकस्यार्चावतारस्य श्रुतिस्मृतिपुराणेतिहासादिप्रसिद्धं समाराधनं तत्प्राचीनत्वञ्च केचनेदानीन्तना: पण्डितमन्या आक्षिप्यन्ति। तैराक्षिप्यते यत् प्रतिमापूजनमवैदिकं, वेदकालादर्वाचीनञ्च। नापि वेदेषु विग्रहाराधनमुपलभते। प्रतिमापूजनं व्यञ्जयन्ति वचनान्यपि वेदे न प्राप्यन्ते। वेदे देवालयो न क्वचित् प्रस्तुतो दृश्यते। देवालयो नास्ति चेद्विग्रहपूजनकल्पनं तु निरर्थकमेव। प्राय: त्रिसहस्रवर्षेभ्य: पूर्वमासीद्वैदिक: काल:। ततो बुद्धनिर्वाणादनन्तरं तत्सम्प्रदायसन्यासिभि: सर्वप्रथमं बुद्धस्य प्रतिमा पूजायै कल्पिता समर्चिता च। तमाचारमनुसृत्यैव ब्राह्मणा मूर्तिपूजनं समारब्धवन्त:। तत: प्रागार्यैर्वैदिकै: प्रतिमानिर्माणं तत्पूजनञ्चाविदितमेवासीत्। बुद्धसमय: प्राय: प्रथमख्रीष्टपूर्वाब्दादारभ्य ख्रीष्टीयचतुर्थशतकपर्यन्तमासीदिति विदुषामभिप्राय:। तदभ्यन्तर एव मूर्तिपूजागता। अनन्तरमितिहासपुराणादिषु प्रथिता। पुनरपर आक्षिपन्ति यदपरिच्छिन्नस्य भगवत: प्रतिकृतिरूपपरिच्छिन्नत्वकल्पनं नापि नि:श्रेयसाय, नापि गौरवाय च। अरूपस्याचक्षु:श्रोत्रस्यापाणिपादस्य भगवतो नराकारकल्पनमुपहास्यमेव। अत: प्रतिमापूजनमप्रतिबुद्धानामविदुषां विषय:। "प्रतिमा स्वल्पबुद्धीनाम्" इत्यग्निपुराण-वचनमपि प्रतिमापूजनस्याविद्वद्वद्वेद्यतां समर्थयति। "न तस्य प्रतिमा अस्ति" इति वाजसनेयि वचनमपि प्रतिमानिषेधं सूत्रयति। इत्थं प्रमाणितं यद्विग्रहपूजारूपमर्चाराधनम-वैदिकमर्वाचीनमप्रबुद्धाधिकारिकं गड्डलिकाप्रवाहगतमिति विवेचनीयमित्याक्षेपकानामाक्षेप:।

---

1. पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् इत्यारभ्य तस्या: शिखाया: मध्ये परमात्मा व्यवस्थित: इत्यन्तेन अन्तर्यामी व्यपदिश्यते" (तैत्तिरीयोपनिषत् 2/11/26/नारायणानुवाक:) इति।

## 5. अर्चावतारस्य वैदिकत्वप्रतिपादनम्

प्रतिवादिभिरुद्भावितान् नैकान्नाक्षेपान् समाधातुं चतुर्षु वेदेषु प्रमाणान्यानीतानि। किञ्च विग्रहाराधनस्यार्वाचीनत्वखण्डनाय, सुप्रचीनत्वप्रतिष्ठापनाय च श्रुतिस्मृतिपुराणेतिहासादिभ्यो नैकानि प्रमाणानि प्रदर्शितानि। पूर्वपक्षिभिरर्चावतारे य आक्षेपाः कृताः, तेऽत्यन्तं निरर्थकाः। वेदे प्रतिमापूजनस्य विधानं नास्तीति वदतो व्याघातः। "अनन्ताः वै वेदाः" इत्यनन्ता वेदाः। चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्नाः।

**एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः।**
**एकविंशतिधा वाह्वृचं नवधाथर्वणो वेदः॥**[1] इति

वेदैकदेशं पठित्वैवं साहसं प्रदर्शनं परिमितायुर्भिरल्पमतिभिर्भवादृशैः पण्डितमानिभिर्नोचितम्। समस्तेषु वेदेषु मूर्तिपूजाया विधानं दृश्यत एवेति सप्रमाणं प्रपञ्च्यते।

### 5.1. ऋग्वेदीयं प्रमाणम्

(क) "प्रवः पान्तमन्धसो धिया यते महे शूराय विष्णवे चार्चत। या सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना"[2] इति। अर्थाद्ध उपासकाः, युष्माकमन्नं रक्षन्तमर्चावतारं स्वसंकल्पेनागत्य प्राप्नुवते महते निरतिशयशौर्ययुक्ताय सर्वव्यापकाय नारायणाय तुलसीपुष्पादिप्रदानपुरःसरं स्वभक्तिपूर्वकमर्चत। यद्यपि सायणाचार्येणास्या ऋचो व्याख्यानमन्यथा विहितं, तथापि महर्षिणा शौनकेनास्य मन्त्रस्य वैष्णवार्चाराधन एव विनियोगः प्रतिपाद्यते। मन्त्रतात्पर्यं तु मन्त्रद्रष्टार एव जानन्ति।

(ख) "प्र विष्णवे शूषमेतु मन्म गिरिक्षिते उरुगायाय वृष्णे"[3] इति, "प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः"[4] इति ऋग्द्वयं बिम्बाराधनमेव कटाक्षयति।

(ग) "अरायि काणे विकटे गिरिं गच्छ सदान्वे। शिरिविठस्य सत्त्वभिस्तेभिष्ट्वा चातयामसि"[5] इति मन्त्रो वेङ्कटाद्रीश्वं स्तौतीति विदुषां विमर्शः। विग्रहाराधनमन्त्रेषु बहुत्र पर्वतगिर्यादीनि पदानि दरीदृश्यन्ते। प्रसिद्धञ्च –

---

1. पतञ्जलिः महाभाष्ये
2. ऋक्संहिता 1/155/1
3. ऋक्संहिता 1/155/2
4. ऋक्संहिता 1/155/4
5. ऋक्संहिता 10/155/1

**गिरिपृष्ठे तु सा तस्मिन् स्थित्वा स्वसितलोचना।**
**विभ्राजमाना शुशुभे प्रतिमेव हिरण्मयी।।**[1] इति

एवं देवालयादिप्रस्तावो वेदेषु नास्तीति युक्तिरेव परास्ता। न केवलं भारतीयैरपि तु पाश्चात्या अपि विग्रहाराधनस्य वैदिकत्वं सूचयन्ति। म्याक्समूलारादिभिरपि मूर्तिपूजनं न प्रतिषेध्यते। वालन्सेनो नाम कश्चिद्विद्वान् देवता नाम "देवो नराः" इति व्युत्पत्तिमपि प्रदर्शयति।

(घ) "सप्त होत्राणि मनसा वृणाना इन्वन्तो विश्वं प्रतियन्नृतेन। नृपेशसो विदथेषु प्रजाता अभीमं यज्ञं विरचन्त पूर्वीः"[2] इति मन्त्रो मूर्तिपूजां वैदिकीं मनुते। नृपेशस इतिपदव्याख्यानकाले सायणो वदति– "नररूपाः विग्रवत्यो यज्ञद्वाराभि-मानिदेवताः" इति।

(ङ) "अदो यद्दारु प्लवते सिन्धोः पारे अपौरुषेयम्। तदारभस्व दुर्हणो तेन गच्छ परस्तरम्"[3] इति श्रूयते काचनर्क। विप्रकृष्टदेशे वर्तमानं निर्मात्रा पुरुषेण रहितं दारुमयं पुरुषोत्तमाख्यं देवताशरीरं सिन्धोः समुद्रतीरे जलस्योपरि वर्तत इति सायणव्याख्यानम्। इदं वचनं विग्रहाराधने देवायतने च सुदृढं प्रमाणमावहति।

(च) "सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव"[4] इति मन्त्रो व्याकरणानुसारं व्याख्यातः पतञ्जलिना। तद्यथा – "शोभनामूर्मि सुषिरामग्निरन्तः प्रविश्य दहति" इति। यथा सच्छिद्रां लोहमयीं प्रतिमां प्रविश्याग्निः प्रकाशते तथेति दृष्टान्तः। अग्निः तत्रत्यं मलं भस्मीकृत्य प्रतिमां शुद्धां करोति तथा विभक्तयोऽपि शारीरं पापमपाकुर्वन्तीति भावः। एवमियञ्चर्ग्वैदिककाले प्रतिमासत्तां प्रदर्शयति।

(छ) "कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत्। छन्दः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे"[5] इति दशममण्डलीया ऋगपि प्रमाणम्।

## 5.2. यजुर्वेदीयं प्रमाणम्

(क) "यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः। पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः"[6] इत्यत्र जगद्रक्षणाय विष्णुः

1. महाभारतम् 1/172/27
2. ऋक्संहिता 3/4/5
3. ऋक्संहिता 10/155/3
4. ऋक्संहिता 8/69/12
5. ऋक्संहिता 10/11/3
6. तैत्तिरीयसंहिता 3/1/36

पाद्याद्युपचारैराराधनार्हः इति व्यज्यते। युक्तग्रावा इत्यनेन शैलप्रतिमारूपी च प्रतिपाद्यते। ग्रावग्रहणेन स्वर्णादीनामुपलक्षणमित्युक्तरीत्या यजुर्वेदोऽपि प्रतिमापूजां समर्थयतीति प्रमाणितं भवति।

(ख) "भवा मित्रो न शेव्यो घृतासुतिः......"[1] इत्याद्याः, "यः पूर्व्याय वेधसे नवीयसे......."[2] इत्याद्याः, "तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य......"[3] इत्याद्याः तैत्तिरीयब्राह्मणस्थाः श्रुतयोऽपि प्रतिमापूजने मानमिति स्मृतिरत्नाकरकारः।

## 5.3. सामवेदीयं प्रमाणम्

(क) अद्भुतब्राह्मणेऽपि उच्यते- स परं दिवमन्वावर्तते। अथ यदास्यायुक्तानि प्रवर्तन्ते देवतायतनानि कम्पन्ते दैवतप्रतिमा रुदन्ति नृत्यन्ति स्फुटन्ति स्विद्यन्ति उन्मीलन्ति निमीलन्ति च। इत्यादिना देवायतनानि दैवतप्रतिमाः, तच्चेष्टाः च व्याख्यायन्ते। एवं स्फुटं हि विग्रहाराधने सामवेदप्रमाणम्।

## 5.4. अथर्ववेदीयं प्रमाणम्

(क) "संवत्सरस्य प्रतिमां यां त्वा रात्र्युपास्महे। सा न आयुष्मतीं प्रजां रायस्पोषेण संसृज"[4] इत्यत्र संवत्सरस्य प्रतिमामिति पदव्याख्यानकाले सायणेनोक्तं - "पिष्टमयीं प्रतिकृतिं कृत्वा उदङ्मुखीमुपवेशयेत्" इति। अनेनापि प्रतिमापूजनं ध्वन्यते।

इतोऽपि बह्व्यः श्रुतयस्तु नितरां वर्तन्ते प्रतिमापूजामाहात्म्यद्योतनाय। परन्तु विस्तरभयात्ता अत्र नोल्लिख्यन्ते।

## 6. विग्रहाराधनस्य बौद्धकालादर्वाचीनत्वनिरसनम्

### क. पाणिनिपतञ्जलिकालाश्रयः

पुनः बुद्धनिर्वाणात्परं प्रतिमापूजनं तत्तत्सम्प्रदायानुसारिभिरेव समारब्धमिति याशङ्का कृता, सापि निराकृतैव। वस्तुतस्तु मौर्यकाल एव बौद्धधर्मः प्रारब्धः, गुप्तनृपैर्विस्तृतः। पाणिनिकात्यायनपतञ्जलयो मौर्यापेक्षया पूर्वकालीना आसन्। "इवे प्रतिकृतौ"[5] इत्यधिकारे "जीविकार्थे चापण्ये"[6] इति पाणिनीयसूत्रस्य व्याख्याना-

1. ऋग्वेदः 1/156/1
2. ऋग्वेदः 1/156/2
3. ऋग्वेदः 1/156/3
4. आथर्वणसंहिता 3/2/5/3
5. अष्टाध्यायी 5/3/96
6. अष्टाध्यायी 5/3/99

वसरे[1] काशिकावृत्तिकृता वामनजयादित्येन मौर्योल्लेखपूर्वकं देवप्रतिकृतीनां क्रयणं विक्रयणमपि निर्देशितम्। हरिदत्तेन देवलकशब्दस्य प्रयोगो विहितः। देवलकाः नाम भिक्षवो ये प्रतिमाः परिगृह्य गृहाद्गृहं भिक्षमाणा अटन्ति। मौर्यैर्हिरण्यार्थिभिरर्चा परिकल्पिता। किञ्च महाभाष्यकारोऽनेकत्र गुप्तमौर्यपुष्यमित्रयवनान् स्मरति। अनेन पाणिनेः पतञ्जलेः च समये प्रतिमाराधनं प्रतिपन्नमासीत्। एतौ द्वावपि विद्वांसौ बुद्धनिर्वाणसमयाद्बहु पूर्वमास्ताम्। तस्मात्तैरुल्लिखितत्वाद्विग्रहाराधनं बौद्धकालादपि प्राचीनमिति सिद्धम्।

**ख. शाकटायनकालाश्रयः**

पुनः, व्याकरणपरम्परायामागतः पाणिनियास्ककात्यायनपतलायपेक्षयापि प्राचीनतमः कश्चित् महान् वैयाकरणः शाकटायनः इति पाणिनियास्ककात्ययन-पतञ्जलिवचनात्[2] ज्ञायते। "तुल्ये कः संज्ञाप्रतिकृत्योः"[3] इति शाकटायनशब्दानुशासनस्य वृत्तौ उच्यते- "प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम्" इति। अयञ्च शाकटायनो जैन आसीदिति चिन्तामणिटीकायां यक्षवर्मणा प्रोक्तम्। बौद्धधर्मकालापेक्षया प्राचीनो जैनसम्प्रदायः। एतेन प्रतिकृतिरिति शाकटायनवचनेन विग्रहपूजनस्य प्राचीनता सिद्धैव।

**ग. यास्ककालाश्रयः**

यास्करचितं निरुक्तं तावत् क्रिस्तजननात् पूर्वं पञ्चमे वर्षशतके स्यादिति पण्डिता अभिप्रयन्ति। तस्माद्बुद्धनिर्वाणसमयो निरुक्तसमयापेक्षया प्रायः आसन्नतरः। निरुक्ते सप्तमेऽध्याये षष्ठे खण्डे सूत्रितं यत् - "अथाकारचिन्तनं देवतानाम्" इति। अनेन निरुक्तवचनेनापि यास्कसमये विग्रहपूजनस्य सत्तानुमन्यते।

**घ. ब्राह्मणग्रन्थकालाश्रयः**

ब्राह्मणग्रन्थाः प्रायः क्रीष्टपूर्वाष्टमशतकादारभ्य क्रीष्टपूर्वपञ्चमशतक एव विरचिताः। पुनः क्रीष्टपूर्वपञ्चकादारभ्य क्रीष्टपूर्वद्वितीयशतकं यावत् सूत्रप्रस्थानस्य कालः। पुनः क्रीष्टपूर्वद्वितीयशतकादारभ्य क्रीष्टपूर्वप्रथमशतकं यावत् महाकाव्यानां सृष्टिकाल इति विद्वांसो विश्वसन्ति। बहुत्र ब्राह्मणग्रन्थादिषु प्रतिमापूजनस्य विधानं तु श्रुयते एव। यथा षड्विंशब्राह्मणे दैवतप्रतिमारोदनवृत्तान्तः प्रसिद्धः। पुनः

1. "जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुब्भवति। विक्रीयते यत् तत् पण्यम्। वासुदेवः शिवः स्कन्दः विष्णुः आदित्यः। देवलकादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते" (5/3/99 सूत्रस्य काशिकावृत्तिः) इति।
2. "नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्" (महाभाष्यम् 3/3/1) इति पतञ्जलिः।
   "तत्र नामान्याख्यातजानीति शाकटायणः" (निरुक्तम् 1/12) इति यास्कः।।
3. अनेकार्थसंग्रहः 7/1/108

आश्वलायनगृह्यसूत्रेऽपि[1] देवताप्रतिमा दृश्यते। अनेनापि प्रमाणेन देवतापूजनस्य बुद्धनिर्वाणकालापेक्षया प्राचीनत्वं सिद्धं भवति।

**ङ. नाट्यशास्त्रकारस्य भरतमुनेः समयाश्रयः**

भगवता पाणिनिना "पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः"[2] इत्यस्मिन् सूत्रे कस्यचित् नटसूत्रस्योल्लेखः कृतः। तच्च नटसूत्रं भरतनाट्यशास्त्रमेवेति विदुषामभिप्रायः। अनेन भरतमुनेः पाणिनिप्राचीनत्वमवबुध्यते। प्रायः ख्रीष्टप्राचीनद्वितीयशताब्दी आसीद्भरतस्य कालः। ततः परं बुद्धनिर्माणकालः। एवं नाट्यशास्त्रे तृतीयाध्याये पठ्यमानैः रङ्गनिर्माणदेवताप्रतिष्ठारङ्गपूजनादिविधिभिः प्रतिमापूजनस्य प्राचीनतावगम्यते।

**च. चाणक्यकालाश्रयः**

अर्थशास्त्रेऽपि[3] बहुत्र दैवतप्रतिमाया आनुषङ्गिकं विवरणं प्राप्यते। वस्तुतस्तु चन्द्रगुप्तामात्यस्य चाणक्यस्य समय आसीत् ख्रीष्टपूर्वचतुर्थशतकम्। ततः परं बौद्धधर्मस्य प्रचलनं जातम्। यदि बुद्धकाल एव प्रतिमापूजनस्य विधानं प्रारब्धं तर्हि चाणक्यवचनं परास्तं स्यात्। तस्माद्देवतायतनादिकं प्रतिमापूजनादिकञ्च बुद्धकालादपि प्राचीनतरमिति प्रमाणितम्।

कल्हणयोगशास्त्रपुराणरामायणमहाभारतादिकालाश्रयेण बहूनि प्रमाणानि सन्त्यर्चावतारस्य बुद्धकालात् प्राचीनत्वप्रदर्शनाय। विस्तरभयात्तानि प्रमाणान्यत्र नोल्लिख्यन्ते। अन्तिमे वास्त्यचक्रवर्तिकृष्णसूरिविरचितेऽर्चावतारवैभवे ग्रन्थकृतोक्तं श्लोकं स्मरामः-

**"विग्रहाराधनं बौद्धोपज्ञमित्यज्ञभाषितम्।**
**निरस्य बहुधा तस्य श्रौतभावः समर्थितः।।**[4] इति

**7. उपसंहारः**

एवं भगवतो विष्णोः परव्यूहविभवान्तर्यामिभेदविशेषं प्रतिपाद्यार्चावतारतत्स्वरूपं नानाविधप्रमाणपुरःसरं प्रतिमापूजनस्य वैदिकत्वप्रदर्शनं बौद्धनिर्वाणापेक्षयार्वाचीनत्व-निरसनञ्च विहितम्। "सर्वोपरि केशवाराधनं हित्वा नैव याति परां गतिम्" इति महाभारतवचनात् मोक्षमार्गे विष्णोरर्चावताराराधनस्य प्रयोजनीयता च सुतरां दृश्यत

1. "स सर्वा दिशोऽन्तावर्तते। अथ यदास्यायुक्तानि यानि प्रवर्तन्ते। देवतायतनानि कम्पन्ति देवताप्रतिमा हसन्ति गायन्ति....." इति।
2. अष्टाध्यायी 4/3/110
3. धर्मस्थीये- "ग्रामदेववृषा वा अनिर्दशाहा वा धेनुरुक्षाणो गौवृषाश्चादण्डाः इत्यत्र देववृषा नाम देवोद्देशेन देवालयविसृष्टा वृषा" इति ज्ञायते।
4. कृष्णसूरिविरचितम् अर्चावतारवैभवम् (विग्रहाराधनवैदिकत्वस्थापनाख्ये प्रथमपरिच्छेदे अन्तिमः श्लोकः)।

एव। न केवलमर्चावतारपूजनेन परमा गतिः प्राप्यते, अपि तु तत्तदर्चावतारस्थान-माहात्म्यज्ञानेन गौरवान्विता श्रद्धाबहुला भारतीयसंस्कृतिराध्यात्मिकपरम्परा च संरक्षिता स्यात्। अन्तिमे पुराणवचनं च स्मर्यते-

**आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः।**
**इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा॥**[1] इति

## आश्रितग्रन्थसूची


1. द्विवेदी, आचार्यः शिवप्रसादः (व्याख्याता)। (2009)। यतीन्द्रमतदीपिका (हिन्द्यनुवादेन भावप्रकाशिकया च समन्विता)। चौखम्बा सुरभारती ग्रन्थमाला 160। वाराणसी। चौखम्बा सुरभारती प्रकाशन।
2. शास्त्री, देवर्षि कालानाथ (सम्पादकः)। (2003)। विशिष्टाद्वैतसिद्धान्तः (सूत्रकारिकात्मकः श्रीविश्वनाथशास्तिदातारकृतभाष्यसहितः)। रेवासा। श्रीजानकीनाथ बडा मन्दिर ट्रस्ट।
3. शर्मा, डॉ. उमाशङ्कर (भाष्यकारः)। (2019)। सर्वदर्शनसंग्रहः (विद्याभवन संस्कृत ग्रन्थमाला 113)। वाराणसी। चौखम्बा विद्याभवन।
4. Annangaracharyar, Sri Kanchi P.B. (सम्पादकः)। (1940)। श्रीवेदान्तदेशिकग्रन्थमाला। कञ्जीभरम्। माद्रास लिवर्टी मुद्रणालयः।
5. उपाध्याय, श्री बलदेव (सम्पादक)। (1996)। संस्कृत वाङ्मय का बृहत् इतिहास (दशम खण्ड, वेदान्तः)। उत्तरप्रदेशसंस्कृतसंस्थानम्।
6. तर्करत्नः, आचार्यः पञ्चाननः (सम्पादकः)। (1390 बङ्गाब्दः)। विष्णुपुराणम्। कोलकाता। नवभारत पावलिशर्स।
7. घोषः, श्री राजेन्द्रनाथ (सम्पादकः)। (1332 बङ्गाब्दः)। वेदान्त दर्शनेर इतिहास - प्रथम, द्वितीय, तृतीय भाग। वरिशाल। शङ्करमठ।
8. Nakamura, Hajime. (2004)। History of Early Vedanta Philosophy (in two parts). Delhi : Motilal Banarasidas.
9. कृष्णमाचार्यः, गयंप्ट्टै। (1921)। अर्चावतारवैभवम्। कुम्भकोणम्। श्रीकृष्णविलास मुद्रालयः।


✦✦✦

1. लिङ्गपुराणम् (उत्तरभागः 7/11)

# उपदेशसाहस्र्यनुसारम् अद्वैतेतरवादीनां मतपरीक्षणं स्वमतस्थापनञ्च

-कार्त्तिकरुइदासः *

**सारसंक्षेपः**

इयम् उपदेशसाहस्त्री श्रीमच्छङ्करभगवत्पादाचार्यकृतप्रकरणग्रन्थ एव। सर्वोपनिषदर्थसारसंग्राहिका वेदान्ततत्त्ववेदिका गद्यपद्यात्मिका हीयमुपदेशसाहस्त्री। अस्य कर्तुः श्रीमच्छङ्करभगवत्पादाचार्यस्य समयः तावत् नवमशतकमिति सर्वैः अङ्गिक्रियते। परन्तु तच्छामयिकभारतवर्षे वेदान्तदर्शनं मलीनं जातम्। तत्कालीने तु तार्किकप्रधानानाम् इतरदर्शनानां प्राधान्यं दृश्यते। तार्किकप्रधानेन इतरदर्शनेन श्रुत्या प्रतिपादितस्य वेदान्तदर्शनस्य खण्डनं कृत्वा तं लुप्तप्रायम् कृतम्। तदा आचार्येण श्रीमच्छङ्करभगवत्पादेन श्रुत्या प्रतिपादितं वेदसारात्मकं लुप्तप्रायं वेदान्तदर्शनं पुनः उद्धर्तुम् अवतारितः। तच्छमये पूर्वपक्षभूतानां तार्किकप्रधानानाम् इतरदार्शनिकानां मतं परीक्ष्य खण्डितं, तदेव क्रमः अत्रापि नियोजितः आचार्येण श्रीमच्छङ्करभगवत्पादेन। अत्र प्रायेण सर्वेषां तार्किकप्रधानानां मतं खण्डितम्। तत्र क्रमेण चार्वाकादीनां मतानि आगच्छन्ति पूर्वपक्षरूपेण एतेषां सर्वेषामपि मतं परीक्ष्य खण्डयित्वा च स्वमतं स्थापयन्ति। तदेव पूर्वपक्षविचारपुरःसरं स्वमतस्थापनप्रकार आलोच्यते अस्मिन् शोधपत्रे। एवम् अत्र प्रश्नः स्यात् यद् इतरवादीनां मतनिराकरणस्य किं प्रयोजनमिति। केवलं स्वसिद्धान्तस्थापनेन अपि अद्वैतसिद्धिः भवति खलु। तत्र इतरवादीनां मतनिराकरणे वृथा परिश्रमः कुतः इति चेदत्र एवं वक्तुं शक्यते यत् वस्तुसिद्धिः न केवलेन स्वमतस्थापनेन सम्भवति। यतोहि इतरवादीनां द्वैतिप्रभृतीनां मतं न निराक्रियते चेत् एकस्मिन्नेव वस्तुनि द्वैतं अद्वैतञ्च उभयमपि आपतति। परन्तु तन्न सम्भवति, कारणं 'नहि प्रतिज्ञामात्रेण वस्तुसिद्धिः, अपि तु लक्षणप्रमाणाभ्यां वस्तुसिद्धिः' इति श्रूयते। अतः न केवलेन प्रतिज्ञामात्रेण स्वमतस्थापनेन च वस्तुः सिद्ध्यति किञ्च वस्तुसिद्ध्यर्थं लक्षणप्रमाणानाम् अपि अपेक्षा वर्तते। तस्मादेव शास्त्रकाराः इतरवादीनां मतं खण्डयित्वा स्वमतं स्थापयन्ति। किञ्च अनेन प्रकारेण स्वमतस्य दाढर्यम् अपि स्यात्। तस्मात्

* शोधच्छात्रः, संस्कृताध्ययनविभागः, बाँकुडाविश्वविद्यालयः।

आचार्येण अस्मिन् प्रकरणग्रन्थे पूर्वपक्षत्वेन इतरदार्शनिकानां मतं खण्डितम्। शोधपत्रे ऽस्मिन् मया इतरवादीनां चार्वाकादीनां मतमर्दनात्मकं स्वमतस्थापनात्मकञ्च कार्यं स्वीकृतम्, तत्र कारणं भवति प्रायः सर्वेऽपि विद्वांसः स्वमतमण्डनात्मके भागे बलं ददाति। परन्तु केवलेन स्वमतस्थापनेनैव वस्तुसिद्धिः इति तु वक्तुं न शक्यते। अद्वैतवेदान्ते तु एकमेव वस्तुः, तस्य लक्षणं तु बहुत्र श्रुत्या प्रतिपादितम्। परन्तु केवलेन श्रुत्या प्रतिपादितेन लक्षणेन वस्तुसिद्धिः इति न सम्भवति। तत्र युक्त्यादिना प्रमाणेन च विचारितं भवति, तत्र विचारार्थ इतरवादीनां मतखण्डनमपि आवश्यकमेव तदर्थं शोधकार्यमिदम् आरभ्यते। किञ्च अत्र न केवलं पूर्वपक्षखण्डनं दृश्यते अपि तु सिद्धान्तपक्षमपि वदति अन्ते। एवम् अद्वैतवादस्थापनद्वारा आत्मनः सत्यत्वं किञ्च जगतः मिथ्यात्वं समर्थितम्।

**कुञ्चिकाशब्दाः**

चार्वाकमतम्, स्थूलशरीरात्मेति लोकायतमतम्, इन्द्रियात्मेति चार्वाकमतम्, प्राणात्मेति चार्वाकमतम्, जैनमतम्, बौद्धमतम्, विज्ञानवादः, शून्यवादः, प्रकृतिकारणवादः, न्यायवैशेषिकमतम्।

**भूमिका**

वेदवेदाङ्गाद्यष्टादशविद्यासु दर्शनं भवति सर्वोत्तमं श्रेष्ठञ्च। तत्र मीमांसादि-सर्वाण्यपि शास्त्राणि जनानां सन्मार्गदर्शनार्थमेव प्रवृत्तानि। तदनु पूर्वउत्तरमीमांसाशास्त्रमपि अध्यात्मवादविचारद्वारा लोकानां सन्मार्गप्रदर्शनार्थमेव प्रवृत्तम्। तत्र उत्तरमीमांसा वेदान्त इत्यभिधेयः। भारतीयाध्यात्मिकसाहित्यस्य चरमो विकासः भवति वेदान्तदर्शनम्। वेदस्य अन्तिमभागः ब्रह्मविद्याप्रतिपादनपरकः सर्वदर्शनमूर्धन्यभूतः वेदान्तदर्शनम् इति प्रसिद्धिः। वेदस्य अन्तिमभागे उपनिषदि अध्यात्मवादस्य विकासो भवति। उपनिषद् यद्यपि मूलरूपेण वेदान्त इत्युच्यते तथापि उपनिषदाधारेण धार्मिकपरम्परायाः तथा दार्शनिकपरम्परायाः यः विस्तारः भवति, स एव वेदान्तः। ब्रह्मसूत्रदर्शनमेव वेदान्तः इति परम्परा भगवांश्चन्द्रार्धशेखरावतारेण श्रीमच्छङ्करभगवत्पादेन स्थापितः, यद्यपि भगवतः प्रागेव सर्वदर्शनोत्तमस्य वेदान्तस्य भेदाः सञ्जाताः। तेषु अपि भारतीयदर्शनसमवाये मुकुटमणिपदवीमुपगच्छति भगवत्पादादिशङ्कराचार्याभिमतः ब्रह्माद्वैतसिद्धान्तो। अस्मिन् बहवः आचार्याः तेषां कृतयः ग्रथितवन्तः। अयम् अद्वैतसिद्धान्तः प्राधान्येन श्रुत्यादिप्रस्थानत्रयमाधारिकृत्य प्रतिष्ठितः। तत्र श्रुतिप्रस्थानत्वेन उपनिषत् गृह्यते, किञ्च स्मृतिप्रस्थानत्वेन श्रीमद्भगवद्गीता गृह्यते, अपि च न्यायप्रस्थानत्वेन शारीरकमीमांसासूत्रं स्वीक्रियते। यद्यपि अद्वैतवेदान्तस्य विकासः प्रस्थानत्रय्येति व्यपदिश्यते तथापि तस्य विकासः न केवलं प्रस्थानत्रय्या परन्तु

प्रस्थानत्रयीबहिर्भूतैः खण्डनमण्डनपरैः वादप्रधानैः च ग्रन्थैः, अद्वैतानन्दानुभूताचार्यैः उपरचितैः अनुभवप्रधानभावाविष्करणात्मकैः आत्मविद्याविलासपञ्चदश्यादिप्रकरणग्रन्थैः, अद्वैतसिद्धान्तप्रतिपादकैः ब्रह्मनैर्गुण्यवादविद्वन्मोदतरङ्गिणीप्रभृतिभिः काव्यैः योग-वासिष्टादिभिः महाकाव्यैः च सुतराम् अद्वैतसाहित्यं विकसितमिति तु नापरोक्षम्। तथैव इयम् उपदेशसाहस्री श्रीमच्छङ्करभगवत्पादाचार्यकृतप्रकरणग्रन्थरेव। अस्मिन् आचार्येण अद्वैतशास्त्रस्य सारः संगृहीतम् श्रीमच्छङ्करभगवत्पादाचार्यस्य समयः तावत् नवमशतकमिति सर्वैः अङ्गीक्रियते। परन्तु तच्छामयिक-भारतवर्षे वेदान्तदर्शनं मलिनं जातम्। तत्कालीने तु तार्किकप्रधानानाम् इतरदर्शनानां प्राधान्यं दृश्यते। तार्किकप्रधानेन इतरदर्शनेन श्रुत्याप्रतिपादितस्य वेदान्तदर्शनस्य खण्डनं कृत्वा तं लुप्तप्रायम् कृतम्। तदा आचार्येण श्रीमच्छङ्करभगवत्पादेन श्रुत्या प्रतिपादितं वेदसारात्मकं लुप्तप्रायं वेदान्तदर्शनं पुनः उद्धर्तुम् अवतारितः। तच्छमये पूर्वपक्षभूतानां तार्किकप्रधानानाम् इतरदार्शनिकानां मतं परीक्ष्य खण्डितं, तदेव क्रमः अत्रापि नियोजितः आचार्येण श्रीमच्छङ्करभगवत्पादेन। अत्र प्रायेण सर्वेषां तार्किकप्रधानानां मतं खण्डितम्। तत्र क्रमेण चार्वाकानां भौतिकवादः, जैनानां स्याद्वादः, नैयायिकानां कार्यकारणवादः सत्कार्यवादः वा, वैशेषिकानां परमाणुकारणवादः, सांख्यानां प्रधानकारणवादः, पूर्वमीमांसकानां कर्मवादः, तथा द्वैतवादः आगच्छति पूर्वपक्षरूपेण। एतेषां सर्वेषामपि मतं परीक्ष्य खण्डयित्वा च स्वमतं स्थापयन्ति। तदेव पूर्वपक्षविचारपुरःसरं स्वमतस्थापनप्रकारः आलोच्यते अस्मिन् शोधपत्रे। तत्रादौ चार्वाकमतं विचार्यते।

### चार्वाकमतम्

भक्षणार्थक-चर धातोः चार्वाकशब्दोऽयं निष्पद्यते इति केचन विद्वांसः मन्यन्ते। अतः दर्शनमिदं भोगवादी इत्यपि कथ्यते। तस्मात् ते भोगे एव विश्वसन्ति। केचन तु चार्वाक्शब्दस्य चारु वाक् इत्यर्थः क्रियते। एवं सम्प्रदायद्वयं प्राप्यते। तत्रापि केचन भोगसाधनत्वेन शरीरम् अङ्गीकुर्वन्ति। ते स्थूलशरीरात्मवादीति कथ्यन्ते। किञ्च केचन भोगसाधनत्वेन इन्द्रियम् आश्रयन्ति, ते इन्द्रियात्मवादीति कथ्यन्ते। एवं केचन प्राणात्मवादी, पुनः केचन मनात्मवादी इत्येते सिद्धान्तभेदाः दृश्यन्ते। एतेषां वेदे विश्वासस्य लेशमात्रमपि नास्ति। तस्मात् एते वेदविरोधिनः सञ्जाताः। प्राचीनवैदिकसिद्धान्तं अन्यरूपेण व्याख्याताः, अतः एतेषां मतखण्डनार्थं प्राचीन-वैदिकसिद्धान्तं च दृढीकरणार्थं आचार्यः प्रवृत्तः। अधुना शाङ्करमतमाश्रित्य स्थूल-शरीरात्मवादीनां मतं विचार्यते।

### स्थूलशरीरात्मेति लोकायतमतम्

स्थूलशरीरम् आत्मत्वेन पश्यन्ति ये चार्वाकाः ते स्थूलशरीरात्मवादिन इति

कथ्यन्ते। ते स्थूलशरीरं भोगसाधनत्वेन कल्पयन्ति। अतः ते शरीरव्यतिरिक्त आत्मा अस्ति इति नैव स्वीक्रियन्ते। स्वीक्रियते चेदपि तमात्मानं नित्यं न मन्यन्ते। अर्थात् शरीरनाशे तस्यापि नाशः इत्येव ते स्वीकुर्वन्ति। अतः तेषां सिद्धान्तः स्थूलशरीरमात्मेति। तत्र ते "स वा एष पुरुषोऽन्नरसमय"[1] इत्यादि श्रुतिवाक्यम् आधारिकृत्य किञ्च "स्थूलोऽहम्", "कृशोऽहम्" इत्यादि अनुभवमाश्रित्य स्थूलशरीरमात्मेति सिद्धान्तं स्थापयन्ति। मतमिदम् आचार्येण श्रीमच्छङ्करभगवत्पादेन उपदेशसाहस्यां पार्थिवप्रकरणस्य आदौ एव खण्डितम्। तद्यथा–

**'पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतोऽम्मयः।**
**पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वम्बरोद्भवाः॥'**[2] इति

अस्य श्लोकस्य सामान्यार्थः भवति स्थूलदेहे यः मांसादिरूपकठिनो धातुः सः पार्थिवः, किञ्च यः द्रवोधातुः सः अम्मयः, अपि च पक्तिचेष्टावकाशाः ये सन्ति ते क्रमेण वह्निर्वाय्वम्बरोद्भवाः इत्युच्यन्तेविवेकभिः। अर्थात्अस्मिन्स्थूलदेहे यः मांसादिरूपकठिनो धातुः प्राप्यते सः पृथिव्याः विकाररूपः पार्थिवः इत्युच्यते। किञ्च यः द्रवोधातुः रुधिरादिरूपः सः अम्मयः अपांपरिणामः इतिसर्वैः स्वीक्रियन्ते। अपि च पक्तिचेष्टावकाशाः वह्निर्वाय्वम्बरोद्भवा इत्यत्र पक्ति नाम पाकः, चेष्टा स्पन्दनम्, अवकाशः अन्नपानमनसां सञ्चारमार्गाः, एते क्रमेण वह्निर्वाय्वम्बरोद्भवाः। पञ्चभूतपरिणामात्मकं शरीरम्, अतः न आत्मा इति विवेकः। तदुक्तं रामतीर्थाचार्येण–

'यः स्थूलदेहे कठिनो धातुर्मासादिरूपः स पार्थिवः पृथिव्यंशः पृथिवी-परिणामात्मकः स्मृतो ज्ञातो विद्वद्भिरित्यर्थः। एवं द्रवोऽम्मयोऽपां परिणामः। पक्तिः पाकश्चेष्टा स्पन्दनमवकाशोऽन्नपानमनसां संचारमार्गा देहगतसुषयो ये स्युः एते क्रमेण वह्निवाय्वम्बरोद्भवा देहानुगतवह्न्याद्यंशकार्यभूताः स्मृताइत्यक्षरार्थः। देहो नात्मा भूतपरिणामत्वाद्वल्मीकादिवदिति भावः'[3] इति। अर्थात् चैतन्यं स्वयथार्थरूपं परित्यज्य जगद्रूपेण प्रतीयते। अतः चैतन्यस्य जगद्रूपत्वं न पारमार्थिकं, तत्तुभ्रममेव। किञ्च तत्रत्याः विषयाः अपि भ्रमात्मकाः एव, पञ्चभूतान्यपि भ्रमात्मकानि। अतः तस्माज्जायमानं शरीरमपि भ्रममेव। परन्तु आत्मा न भ्रमात्मकः, अतः स्थूलशरीरं न आत्मा। तत्तु भूतानां परिणामः एव। यदि पूर्वपक्षिणां मतमेव स्वीक्रियते तर्हि मरणानन्तरमपि स्थूलदेहे चैतन्यगतगुणाः स्युः। परन्तु देहाभावे अर्थात् देहे चैतन्यस्य सत्ताभावे तद्धर्माः न तिष्ठन्ति। अतः स्थूलशरीरं न आत्मा, अपि च आत्मव्यतिरिक्तमेव। एवं स्थूलशरीरमात्मेति ये वदन्ति, तेषां स्थूलशरीरात्मवादीनां मतं निराकृतम्।

---

1. तै. उप.– 2/1
2. उ. सा.– 1/16/1
3. उ. सा.(पद.)– 1/16/1

एवं बहुत्र आचार्येण स्थूलशरीरात्मवादीनां मतं खण्डितम्। तत्र ऐकात्म्याधिकरणे[4] "आत्मा देहः, तदन्यः वा" इति संशयस्य समाधानं दत्तम् आचार्येण। तत्र स्थूलशरीरात्मवादिनः "देह एव आत्मा" इति मन्यन्ते। अन्वयव्यतिरेकाभ्यां चैतन्यस्य देहे एव उपलम्भात्, सति हि देहे चैतन्यम् उपलभ्यते, न तु असति। न च चैतन्यस्य जात्यन्तरतया देहव्यतिरिक्तात्मत्वं शङ्कनीयम्, क्रमूकनागवल्लीचूर्णानां संयोगात् मदशक्तिवत् भूतमेलनजं चैतन्यं देहे उपलभ्यते, न अन्यत्र। अतः भूतेभ्य जायमानं चैतन्यं कथं नामजात्यन्तरं स्यात्। ततः वपुः आत्मा इति प्रतिपादयन्ति ते। तत्र आचार्येण श्रीमच्छङ्करभगवत्पादेन मतमिदं खण्डितम्– "यद् विषयि, तत्तत् विषयात् व्यतिरिक्तं, यथा रूपाच्चक्षुः। अतः विषयित्वतः पृथिव्यादिभूतोपलब्धिः भूतेभ्यः विभिन्ना भवितुम् अर्हति। सा उपलब्धिः एव आत्मा। तथा च सति "सत्येव देहे चैतन्यम् उपलभ्यते" न असति इति यौ अन्वयव्यतिरेकौ, अत्र व्यतिरेकः; असति अपि देहे परलोकगामिनः चिदात्मनः शास्त्रेण उपलम्भात्। शास्त्रस्य च प्रामाण्यम् समर्थनीयम्, अनादित्वे सति अतीन्द्रियतत्वादेकत्वात्, अतीन्द्रियदर्शिभिः च ऋषिभिः लोकहितचिकीर्षुभिः भूयशः परीक्षितत्वात्। सति अपि च मृते देहे चैतन्यानुपलब्धेः अन्वयश्च असिद्धः। अतः भौतिकात् देहात् अन्यः असौ आत्मा परलोकभाक् अस्ति। एवं रूपेण पूर्वपक्षिणां चार्वाकानां देहात्मवादीनां वपुरेव आत्मेति सिद्धान्तं श्रुत्या उक्तया प्रमाणेन च खण्डयित्वा देहव्यतिरेक आत्मा इति स्थापितम्। तदुक्तम्–

**'यदि देहभावेऽभावाद् देहधर्मत्वमात्मधर्माणां मन्येत।**
**ततो देहभावेऽप्यभावादतद्धर्मत्वमेवैषां किं न मन्येत॥'**[5] इति।

एवं स्थूलशरीरात्मवादीनां चार्वाकानां मतं खण्डयित्वा अधुना इन्द्रियात्मवादीनां मतं विचारयति–

## इन्द्रियात्मेति चार्वाकमतम्

इन्द्रियम् आत्मत्वेन पश्यन्ति ये चार्वाकाः ते इन्द्रियात्मवादिनः इति कथ्यन्ते। तैः इन्द्रियातिरिक्त आत्मा अस्ति इति नैव स्वीक्रियते। स्वीक्रियते चेदपि तमात्मानं नित्यं न मन्यन्ते। अर्थात् इन्द्रियनाशे तस्यापि नाशः इत्येवैतैः स्वीक्रियते। अतः तेषां सिद्धान्तः इन्द्रियम् आत्मेति। इन्द्रियात्मवादीनः स्थूलशरीरित्मवादीनां सिद्धान्तम् अतिक्रम्य गच्छति। अर्थात् तेभ्यः स्थूलशरीरात्मवादेभ्यः अपि परं भवति इन्द्रियात्मवादः, यद्यपि सिद्धान्तदृष्ट्या तदपि सम्यक् न, तथापि स्थूलशरीरात्मवादेभ्यः सूक्ष्मं भवति इन्द्रियात्मवादमिदम्। तत्र कठोपनिषदि भाष्यकारेण एवमुक्तम्– 'स्थूलान्यारभ्य

---

1. ब्र.सू.शा.भा
2. ब्र.सू.शा.भा. 3/3/54

सूक्ष्मतारतम्यक्रमेण अधिगमः कर्तव्यः'[1] इति। अर्थात् स्थूलात् सूक्ष्मं प्रतिगन्तव्यम् इत्येव भाष्यकारस्य आशयः। तदत्रापि दृश्यते स्थूलशरीरमात्मेति मन्यमानानां स्थूलशरीरात्मवादीनां मतम् अतिक्रम्य, तेभ्यः सूक्ष्मं इन्द्रियमात्मेति मन्यन्ते केचित्। तत्र ते 'ते ह प्राणाः प्रजापतिं पितरं एत्योचुः'[2] इत्यादि श्रुतिवाक्यम् आधारीकृत्य, किञ्च इन्द्रियाणाम् अभावे शरीरचालनाभावात्, काणोऽहम्, वधिरोऽहम्, इत्याद्यनुभवाच्च इन्द्रियाणि आत्मेति वदति। परन्तु इन्द्रियमात्मेति मतमिदमपि सम्यक् नेति प्रतिपादयति आचार्येण श्रीमच्छङ्करभगवत्पादेन उपदेशसाहस्र्याम् पार्थिवप्रकरणे-

**घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात्।**
**रूपालोकवदिष्टं हि सजातीयार्थमिन्द्रियम्॥**[3] इति।

अस्य श्लोकस्य सामान्यार्थः भवति घ्राणादीनि इन्द्रियाणि किञ्च तेषां विषयः गन्धादिः पृथिव्यादीनां भूतानाम् गुणाः, यतोहि रूपप्रकाशयोः सजातीयः भवति विषयः इन्द्रियञ्च इति। एवं इन्द्रियाणां भौतिकत्वे सिद्धे देहवदेषामपि अनात्मत्वम् इति भावः। श्लोकोऽयम् एवं व्याख्यातः पदयोजनिकाकारेण श्रीरामतीर्थाचार्येण- 'घ्राणादीनीति। घ्राणादीनीन्द्रियाणि तदर्थास्तेषां विषयाः गन्धादयश्च क्रमात्पृथिव्यादीनां गुणाः कार्याणीत्यर्थः। गन्धरसरूपस्पर्शशब्दास्तावत्पृथिव्यप्ते-जोवाय्वाकाशानां क्रमेण धर्माः प्रसिद्धास्तेषां घ्राणाद्येकैकेन्द्रियग्राह्यतान्वयव्यतिरेकसिद्धा। तथाच यदिन्द्रियं यस्य धर्मं ग्राहयति तदिन्द्रियं तस्य सजातीयं भवितुमर्हति। यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथेन्द्रियाण्यपि भौतिकानां प्रकाशक-त्वाद्भौतिकान्ये वेत्यनुमानमाह-रूपा लोकवदिति। एवमिन्द्रियाणां भौतिकत्वे सिद्धे देहवदेषामप्यनात्मत्वमिति'[4] इति। एवम् इन्द्रियाणां भूतप्रपञ्चेन सह सजातीयत्वं साधयित्वा भूतप्रपञ्चवद् एतेषामपि अनात्मत्वं साधितम् आचार्येण श्रीरामतीर्थाचार्येण। परन्तु साहस्रीविवृतिकारः श्रीभगवदानन्दज्ञानाचार्यः अनुमानप्रमाणेन भौतिकत्वानु-मानप्रमाणेन घटादिवद् अनात्मत्वम् इन्द्रियाणाम् इत्यर्थः प्रतिपादितवान्। तत्र आचार्येण आदौ इन्द्रियाणाम् भौतिकत्वं साधितम् अनुमानेन ततः भौतिकानाम् यथा अनात्मत्वं साधितं तथा इन्द्रियाणाम् इति साधयति। तद्यथा-

'घ्राणं रूपादिषु गन्धस्यैव व्यञ्जकत्वात् हिङ्गुवत्। एवं रसनमप्याप्यं रसादिषु रसस्यैव व्यञ्जकत्वात् आस्योदकवत्। चक्षुस्तैजसं रूपादिषु रूपस्यैव व्यञ्जकत्वाद्

---

1. कठ. उप. शा. भा.
2. छा. उप.- 5/1/7
3. उ. सा.- 1/16/2
4. उ. सा. (पद.)- 1/16/2

दीपवत्। त्वग्वायवीया स्पर्शादिषु स्पर्शस्यैवाभिव्यञ्जकत्वात्, व्यजनवायुवत्। श्रोत्रमाकाशीयं शब्दादिषु शब्दस्यैव व्यञ्जकत्वाद् वेणुविवरवद् इति भौतिकत्वानुमानाद् घटादिवदनात्मत्वमिन्द्रियाणामित्यर्थः। यथा तैजसस्य रूपस्य प्रकाशको दीपादिस्तैजसो दृष्टस्तथा यदिन्द्रियं यज्जातीयमर्थं प्रकाशयति तत्तज्जातीयं भवितुमर्हतीत्युक्त-मनुमानजातमिति'[1] इति। एवम् आदौ इन्द्रियादीनाम् भौतिकत्वं निरू0प्य ततः तेषाम् अनात्मत्वं प्रतिपाद्यते। एवम् इन्द्रियात्मवादीनां मतं निराकृत्य अधुना मन-आत्मवादीनां मतं विचार्यते।

**मन-आत्मेति चार्वाकमतम्**

मन एव आत्मा इति केचन वदन्ति ते मनात्मवादिनः। ते इतरचार्वाकानां प्राणात्मवादीनां मतम् अतीत्य गच्छन्ति। तेषां मते प्राणाधीनं मनः इति वक्तुं न शक्यते। प्राणस्य प्रवृत्तिरेव मन-अधीनं भवति। कारणं प्राणः जड, तदधीनं चेतनं मनः न भवितुम् अर्हति। किञ्च यदि प्राण आत्मा स्यात् तर्हि अपानादयः अपि आत्मा भविष्यति। तेन अनेक-आत्माधीष्ठानत्वात् अस्य शरीरस्य ध्वंसः भविष्यति। परन्तु एकैव मन इति कारणात्, तेन प्राणादीनां नियन्तृ भवितुमर्हति। एतदेव कारणात् मन आत्मा इति। तत्र ते "अन्यः अन्तर आत्मा मनोमयः"[2] इत्यादि श्रुतिवाक्यमाश्रित्य, मनसि सुप्ते प्राणादेः अभावात्, अहं संकल्पवान्, अहं विकल्पवान् इत्याद्यनुभवाच्च मन आत्मा इति वदति। अत्र आचार्येण पुनः मन न आत्मा इत्येव प्रतिपाद्यते। तत्रोक्तम्-

**बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे।**
**तद्विकल्पार्थमन्तस्थं मन एकादशं भवेत्।।**[3] इति

अस्य श्लोकस्य सामान्यार्थः क्रियते घ्राणादीनि ज्ञानकरकरणानि इत्याहुः। अर्थात् घ्राणेन्द्रियं, जिह्वा, चक्षुः, त्वक्, श्रोत्रेन्द्रियं चेति पञ्चेन्द्रियाणि ज्ञानकरणानि इत्युच्यन्ते। किञ्च वाक्पाण्यादीनि कर्मार्थानि कर्मेन्द्रियाणि इत्युच्यन्ते। एतेषां दशानामिन्द्रियाणां विकल्पार्थं आभ्यन्तरम् एकादशं मन इति अङ्गिकार्यम्। न क्रियते चेत् आत्मनः युगपदनेकेन्द्रियविषयसंप्रयोगे सति युगपदेवानेकज्ञानानि जायेरन्। न च एवं दृश्यते। अतः अस्य मनसः करणत्वं सिद्ध्यति। एवं मनसः करणत्वं प्रतिपाद्य तस्यापि अनात्मत्वं प्रतिपादितम् इन्द्रियवदिति। अर्थात् इन्द्रियाणां यथा अनात्मत्वं तथा मनसः अपि। किञ्च मुण्डकोपनिषदि अपि उक्तम्-'अप्राणो ह्यमनाः शुभ्रः'[4]

1. उ. सा. (साहस्रीविवृतिः)- 1/16/2
2. तै. उप.- 2/3/1
3. उ. सा.- 1/16/3
4. मु. उप.- 2/1/2

इति। एवं मन आदीनाम् आत्मत्वं निराकृत्य अधुना प्राणम् आत्मत्वेन ये पश्यन्ति तेषां प्राणात्मवादीनां मतं विचार्यते-

## प्राणात्मेतिचार्वाकमतम्

प्राण आत्मा इति वदति प्राणात्मवादी चार्वाकः। तेषां मते प्राणाधीनम् इन्द्रियं न आत्मा, प्राण एव आत्मा। यतोहि प्राणाभावे इन्द्रियाणां कार्यं न दृश्यते। अतः प्राण एव आत्मा इति। तत्र चैतन्यसंयोगेनैव इन्द्रियाणि कार्यं कुर्वन्ति, संयोगाभावे न कुर्वन्ति इति अन्वयव्यतिरेकेन अवगम्यते इन्द्रियाणि करणानि न आत्मा इति। किञ्च एतेषां कतृत्वेन अभिहितत्वात् प्राण एव आत्मा। तत्र ते 'अन्यः अन्तर आत्मा प्राणमयः'[1] इत्यादि श्रुतिम् आश्रित्य किञ्च प्राणाभावे इन्द्रियचलनायोगात्, अहमशनायावान्, अहं पिपासावान् इत्याद्यनुभवात् च, प्राण एव आत्मा इति वदति।

परन्तु अद्वैतवेदान्तसिद्धान्तानुसारं चार्वाकानां प्राणात्मवादः न समीचीनम्। तत्रोक्तम् मुण्डके- 'अप्राणो ह्यमनाः शुभ्रः....'[2] इति। एवं स्थूलशरीरात्मेत्यादिनां भौतिकवादीनां चार्वाकानां मतं खण्डयित्वा अधुना जैनानां मतं विचार्यते।

## जैनमतम्

जैनदर्शनं भारतीयदर्शनेषु अन्यतमं वर्तते। चार्वाकविचारधारायाः अनन्तरं नास्तिकदर्शनेषु जैनदर्शनस्य महत्त्वपूर्णं स्थानमस्ति। चार्वाकमतस्य स्थूलतत्त्वानां चिन्तनस्य अपेक्षया सूक्ष्मचिन्तनं प्रति चिन्तनस्य प्रावाहिकता जैनदर्शने दृश्यते। यत्र चार्वाकः शरीरमेवात्मानं स्वीकरोति तत्र जैनदर्शनेन आत्मा इति शरीरातिरिक्तम् अभौतिकं तत्त्वं स्वीकृतम्। तच्च शरीरपरिमाणं मध्यमपरिमाणं वाऽभिमतम्।

वैदिकदर्शने प्रायेणेदं प्रतिपादितमस्ति यदात्मा अणुपरिमाणो महत्परिमाणो वाऽस्ति- 'अणोरणीयान् महतो महीयानिति'[3] इति। अणुपरिमाणस्य महत्परिमाणस्य वा नित्यत्वात् आत्मा नित्योऽस्ति इति वैदिकाः मन्यन्ते। तन्मतानुसारेण मध्यमपरिमाणात्मकाः पदार्था अनित्याः सन्ति। जैनदर्शने मध्यमपरिमाणः आत्मा नित्योऽस्ति। स भौतिकपदार्थवत् अनित्योऽस्ति। दार्शनिकविचारस्य क्रमेण अनयोरुभयोः दर्शनयोः पौर्वापर्यं स्पष्टरूपेण दृश्यते। ऐतिहासिकेन साक्ष्येण इदं सिद्ध्यति यत् चार्वाकस्य पश्चात् जैनदर्शनस्य विकासक्रमः समायाति। अस्यापि गणना नास्तिकदर्शनेषु विहिता, यतो हि अत्र वेदानां प्रामाण्यं स्वीकृतं नास्ति। तथाप्यस्य लक्ष्यं चार्वाकवत्

---

1. तै. उप.- 2/2/1
2. मु. उप.- 2/1/2
3. कठ. उप.

स्थूलपदार्थविवेचनं नास्ति। त्रिविधदु:खेभ्य आत्यन्तिकं मुक्तिरेवात्र लक्ष्यभूता वर्तते। आस्तिकदर्शनानामपि इदमेव लक्ष्यमस्ति। अतो जैनदर्शनम् आस्तिकधारायाः केषुचित् अंशेषु अनुकरणं करोति। आत्मा परिणामी द्रव्यमस्ति, जीवः अस्थिकायस्वरूपो भवति इत्याद्यवधारणाभिः सूक्ष्मतत्त्वानामपि भौतिकता सिद्ध्यति। वैदिकदर्शनेभ्यो वैपरीत्यदर्शनात् नास्तिकसंज्ञाऽस्याभिमता जीवात्मनः सम्बन्धे जैनसिद्धान्तानां चार्वाकसिद्धान्तै सह किमपि साम्यं दृश्यते। अत एव चार्वाकोपरान्तम् अस्य विद्यमानतया आनुक्रमिकतायां सन्देहो नास्ति।

अध्यात्म-ज्ञानवादयोः फलं भवति जैनदर्शनम्। अत्र न केवलं औपनिषदम् ज्ञानवादः किन्तु आचारसम्बन्धी दृष्टिरपि आसीत्। जैनदर्शनमपि अनात्मवादी एव। अस्य मुख्यसिद्धान्त भवति स्याद्वाद्। तदपि सप्तधा-"स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यम्, स्यादस्ति च अवक्तव्यं च, स्यान्नास्ति च अवक्तव्यं च, स्यादस्ति च नास्ति च अवक्तव्यमि, ति"। एतेषां मतं सप्तभङ्गीनय अपि कथ्यते। अनेन वस्तुनः स्वरूपं न प्रकाश्यते, अपि च संशयरेव प्रतिपाद्यते। अत एव अद्वैतवेदान्तदर्शनद्वारा अस्य बहुविधा खण्डनं कृतम्। जैनदर्शने आत्मानं न स्वीकृत्य पुद्गलं स्वीक्रियते। तत्र पुद्गलं नाम पूरयन्ति गलन्ति च पुद्गलाः इति। अर्थात् जीवभेदाः एव पुद्गलाः। तत्र जीवतत्वं पुद्गलतत्वं वा शरीरपरिमाणात्मकम्। तत्र आचार्येण श्रीमच्छङ्करभगवत्पादेन उपदेशसाहस्र्याम् सतर्कखण्डितम्। तत्र आचार्यस्य तर्कः एवं भवति यद् इन्द्रियाणां दृष्टिः स्वगोलकपरिच्छिन्ना भवति। किञ्च इन्द्रियाणि तदाकारता प्राप्नोति। एवमेव बुद्धेः देहेन्द्रियेण सह तादात्म्यम्, अतः बुद्धेः साक्षीत्वात् आत्मा देहपरिमाणस्वरूप इति प्रतीयते। तदुक्तम्-

**'स्थानावच्छेददृष्टिः स्यादिन्द्रियाणां तदात्मताम्।**
**गता धीस्तां हि पश्यञ्ज्ञो देहमात्र इवेक्ष्यते॥'**[1] इति

अस्मिन् प्रसङ्गे आचार्येण आनन्दज्ञानेन उक्तम् बुद्धिं साक्षी कृत्वा आत्मा भ्रान्त्या देहमात्र इव प्रतीयते। वस्तुतः स्वरूपतः आत्मा अनन्त एव।[2] किञ्च पदयोजनिकारः तु आत्मनः देहपरिमाणत्वं खण्डयति तस्य मते आत्मा न देहपरिमाणम्। यदि आत्मनः देहपरिमाणत्वं स्वीक्रियते तर्हि तस्य नाशत्वमिति स्वीकर्तव्यम्, तस्य सावयवत्वात् परिच्छिन्नत्वात्। किञ्च आचार्यबोधनिधिः कथयति आत्मा सर्वव्यापकम् अतः तत्र औपाधिकं परिच्छिन्नता प्रतीयते। एवं औपाधिकपरिच्छन्नताम् आधारीकृत्य

1. उ. सा.- 1/16/22
3. तां च पश्यन्नात्मा देहमात्र इव भ्रान्त्या दृश्यते। स्वरूपेण त्वनन्त एव।- उ. सा. (साहस्रीविवृतिः)- 1/16/22

आत्मनः देहपरिमाणस्वरूपत्वं स्वीकर्तुं न शक्यते[1]। एवं ब्रह्मसूत्रभाष्ये अपि आचार्येण श्रीमच्छङ्करभगवत्पादेन जैनदर्शनस्य खण्डनं कृतम्। तद्यथा शरीराणां चाऽनवस्थित-परिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात्, पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नः पुत्तिकाशरीरे संमीयेत। समान एष एकस्मिन् अपि जन्मनि कौमारयौवनस्थविरेषु दोषः।[2] एवं प्रकारेण श्रीमच्छङ्करभगवत्पादाचार्याः ब्रह्मसूत्रभाष्ये उपदेशसाहस्र्यां च जैनदर्शनस्य खण्डनं कृतवन्तः। अधुना बौद्धमतं निराक्रियते–

**बौद्धमतम्**

बौद्धदर्शनम् भारतीयनास्तिकदर्शनेषु अन्यतमम्। यद्यपि भारतीयदर्शनानां प्रारम्भः दार्शनिकसूत्रेण जातः तथापि ज्ञानकर्मवादयोः प्रारम्भः तु वैदिककालादेव जातः। तत्र आरम्भे कर्मकाण्डस्य एव प्राधान्यं दृश्यते। तदा ज्ञानकाण्डस्य प्रसिद्धिः न्यूना जाता। तत्र कर्मकाण्डमात्रे तुआत्मबोधः, आत्मचिन्तनं, आत्मसाक्षात्कारादिविषये अवकाशः एव नासीत। किञ्च ज्ञानकाण्डे यद्यपि आत्मबोधादिविषये चिन्तनम् आसीत् तथापि आचारिकं नैतिकं व्यावहारिकादि दृष्टिः नासीदेव। एवं न्यूनतावशात् भारतवर्षे ज्ञानकाण्डस्य प्रतिक्रियास्वरूपं बौद्धदर्शनस्य आविर्भावः इति कल्पयितु शक्यते। अस्य बौद्धदर्शनस्य प्राधान्येन शाखाद्वयं प्राप्यते। तत्रैकः विज्ञानवादः अपरश्च शून्यवादः। अत्रादौ विज्ञानवादविषये आलोच्यते–

**विज्ञानवादः**

वादस्यास्य प्रवर्तकः मैत्रेयनाथः किञ्च तच्छिष्यः असंगः। वादोऽयं योगाचारः इत्यनेन अपि प्रख्यातः। अस्मिन् विज्ञानमेव सत्यम्। एतेषां मते विज्ञानमेव जगतः सत्ता। तत्र विज्ञानं नाम चिन्मात्रम्। एते ज्ञाता–ज्ञेययोः पृथक्सत्ता न स्वीकुर्वन्ति। एतेषां मते ज्ञाताज्ञेययोः एकमेव सत्ता तद्विज्ञानम्। एते विज्ञानवादिनः क्षणिकविज्ञानवादं समर्थयति। तत्र उपदेशसाहस्र्याम् क्षणिकविज्ञानवादं सम्यकरूपेण स्थापितम्। तत्र आचार्येण श्रीमच्छङ्करभगवत्पादेन क्षणिकविज्ञानवादानुसारं ज्ञानज्ञेययोः क्षणिकत्वं, स्वभावतः नाशवत्त्वं, निरधिष्ठानत्वम्, निरन्तरोत्पत्तिमत्वं च निरूपितम्। एतेषां मते स्थायित्वबुद्धेः निवृत्तिरेव विवेकः तदेव परमपुरुषार्थः। तदुक्तम्–

> **क्षणिकं हि तदत्यर्थं धर्ममात्रं निरन्तरम्।**
> **साहश्या दीपवत्तद्धीस्तच्छान्तिः पुरुषार्थता॥**[3] इति

1. उ. सा. (विवरणम्)– 1/16/22
2. ब्र. सू. (शा. भा.)– 2/2/34
3. उ. सा.– 1/16/23

विज्ञानवादीनां विज्ञानस्योत्पत्तिः तस्य निरोधक्रमः च सततरूपेण चलति तस्मात् क्षणिकविज्ञानवादीनां बौद्धानां सिद्धान्तोऽयं प्रतीत्यसमुत्पादवादः इत्यपि कथ्यते।

एतेषां बौद्धानां क्षणिकविज्ञानवादीनां मतं खण्ड्यते आचार्येण श्रीमच्छङ्कर-भगवत्पादेन तस्य ब्रह्मसूत्रभाष्ये। तत्र तेन उक्तम्- 'यतउपलब्धिव्यतिरेकोऽपि बलादर्थस्याऽभ्युपगन्तव्य उपलब्धेरेव। नहि कश्चिदुपलब्धिमेव स्तम्भः कुड्यम् चेत्युपलभते, उपलब्धिविषयत्वेनैव तु स्तम्भकुड्यादीन् सर्वे लौकिका उपलभन्ते।'[1] एवं बौद्धानां मतस्य असङ्गतिः प्रदर्श्यते आचार्येण श्रीमच्छङ्करभगवत्पादेन तत्र उपदेशसाहस्र्याम्-

**बाह्याकारत्वतो ज्ञप्तेः स्मृत्यभावः सदाक्षणात्।**
**क्षणिकत्वाच्च संस्कारं नैवाधत्ते क्वचित्तुधीः॥**[2] इति

अत्र आचार्यस्य कथनं यत् यदि ज्ञानमेव बाह्यविषयाकारेण परिणतं स्यात् तर्हि विषयोत्पत्तेः पूर्वं ज्ञानेन सह तस्य सम्बन्धः न भवितुमर्हति। तथा उत्पत्यनन्तरं तज्ज्ञानं क्षणिकम् अतः तेन सह सम्बन्धः भवितुं नार्हति तस्मात् प्रत्यक्षमेव न भवति। किञ्च विज्ञानवादीनां मते ज्ञातुः यत् क्षणिकत्वं तदपि सम्यक् न। तत्र ज्ञातुः क्षणिकत्वं स्वीक्रियते चेद् पूर्वक्षणोत्पन्नबुद्धिः उत्तरक्षणोत्पन्नबुद्धेः असम्बद्धः भवति तेन अनुभवपदार्थानां संस्कारः न त्यज्यते। अतः पूर्वानुभूतपदार्थानां स्मृतिः अपि न भवति। परन्तु प्रकृते तु स्मृतिः भवत्येव अतः मतमिदन्न समीचीनम्।

किञ्च बौद्धाः बाह्यार्थपदार्थं न स्वीकृत्य क्षणेन उत्पद्यते नश्यते च तादृशं बुद्धिरूपम् आत्मानं ग्राह्यग्राहकत्वेन स्वीकुर्वन्ति। बौद्धानां मतमिदम् न युक्तम् इति दर्शयन्नाह उपदेशसाहस्रीकारेण श्रीमच्छङ्करभगवत्पादेन-

**ज्योतिषा द्योतकत्वेऽपि यद्वन्नात्मप्रकाशनम्।**
**भेदेऽप्येवं समत्वाज्ज्ञ आत्मानं नैव पश्यति॥**

**यद्धर्मायः पदार्थो न तस्यैवेयात्स कर्मताम्।**
**न ह्यात्मानं दहत्यग्निस्तथा नैव प्रकाशयेत्॥**[3] इति

अर्थात् यथा सूर्यादीनां ज्योतिर्मयप्रकाशत्वेऽपि स्वं कर्मरूपेण प्रकाशयितुं न शक्नोति तथैव आत्मनः अंशभेदं स्वीक्रियते चेदपि चिन्मात्रस्वरूपत्वात् स्वं द्रष्टुं न शक्नोति। कारणं यः पदार्थः यद्धर्मयुक्तः तत्तस्य कर्म न भवितुमर्हति यथा अग्निः आत्मानं न दहति न च प्रकाशयति। किञ्च चिन्मात्रस्वरूपत्वात् अद्वयत्वाच्च न

1. ब्र. सू. (शा. भा.)- 2/2/28
2. उ. सा.- 1/16/25
3. उ. सा.- 1/16/12-13

युज्यते।[1] किञ्च क्षणिकविज्ञानवादस्य अन्या अनुपपत्तिः प्रदर्श्यते आचार्येण यदि सर्वेऽपि पदार्थाः क्षणिकमेव तर्हि पदार्थानां कार्यकारणभावः अपि न सिध्यति। अत्र बौद्धानां आक्षेपः यत् सर्वेपि पदार्थाः क्षणिकाः सत्यपि केचन पदार्थाः विद्यन्ते तेषां कारणं भवति केचन पदार्थाः। मतमिदमपि न औचित्यपूर्णं इति कथयति आचार्यः श्रीमच्छङ्करभगवत्पादः। कारणं क्षणिकत्वात् एकस्य पदार्थस्य अन्य पदार्थानपेक्षा एव सिध्यति। तदुक्तम्-

**अपेक्षा यदि भिन्नेऽपि परसन्तान इष्यताम्।**
**सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता।।**[2] इति।

किञ्च अस्मिन् कारणं दर्शयति आचार्येण श्रीमच्छङ्करभगवत्पादेन यत् समकालसमुद्भूतानां पदार्थानाम् परस्परसम्बद्ध सत्वेऽपि यः यस्य संस्कारेण युक्तः तत्तस्यापेक्षा भवति।[3] एवं विज्ञानवादीनां मतं निराकृत्य आचार्यः शून्यवादम् निराकरोति

**शून्यवादः**

बौद्धानाम् शून्यवादः श्रेष्ठः सिद्धान्तः। सिद्धान्तस्यास्य प्रमुखाचार्यः नागार्जुनः। एतेवादिनः ब्रह्मवादिवद् ब्रह्मतत्त्वम् न स्वीकृत्य शून्यतत्त्वं स्वीकुर्वन्ति। शून्यवादीनां शून्यमिदं चनुष्कोटिविनिर्मुक्तम्। यतोहि तत्र सत्, नासत्, न सदसत्, न चानुभवात्मकम्। अत्र विज्ञानवाद-शून्यवादयोः विशेषभेदः प्रदर्श्यते। तत्र विज्ञानवादीनां मते जगत् विज्ञानमात्रम्, किञ्च शून्यवादीनां मते तु जगतः स्वरूपं शुन्यमेव। तत्र ते छान्दोग्यश्रुतिः प्रमाणत्वेन दर्शयन्ति। तद्यथा-'असदेव सोम्य इदमग्रासीत्'[4] इति। किञ्च सुषुप्तौ सर्वाभावात्, अहं सुप्तः सुषुप्तौ न आसम् इति उत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यम् आत्मेति वदति।

एतेषां मतम् खण्डयन् आह आचार्येण भावाभावयोः साक्षीत्वात् आत्मा न शून्यरूपम्।[5] यतोहि अत्र नियमः वर्तते येन अभावः अधिगम्यते तत् सत् स्यात्। अन्यथा अभावेन अभावस्य ज्ञानप्रसङ्गः आगच्छति, तन्न समीचीनं भवति। तदुक्तम्-

**येनाधिगम्यतेऽभावस्तत्सत्स्यात्तन्न चेद्भवेत्।**
**भावाभावानभिज्ञत्वं लोकस्य स्यान्न चेष्यते।।**[6] इति

---

1. "अंशोऽप्येवं समत्वाद्धि निर्भेदत्वान्न युज्यते"- उ.सा.- 1/16/14
2. उ. सा.- 1/16/28
3. तुल्यकालसमुद्भूतावितरेतरयोगिनौङ्क..... उ.सा.- 1/16/29
4. छा. उप.- 6/2/1
5. भावाभावज्ञतस्तस्य नाभावसवधिगम्यते। उ.सा.- 1/16/31
6. उ. सा.- 1/16/32

अतः समस्तजगतः साक्षी आत्मतत्वमेव पारमार्थिकम्। तत् पारमार्थिकम् आत्मतत्वम् सत्, असत्, सदसत् इत्यनेन विकल्पेन पूर्वमेव सिद्धम्। अपि च समस्तरूपत्वात् अद्वयं नित्यञ्च। अतः विकल्पितेषु पदार्थेषु भिन्नः। तदुक्तम्-

**सदसत्सदसच्चेति विकल्पात्प्राग्यदिष्यते।**
**तदद्वैतम् समत्वात्तु नित्यं चान्यद्विकल्पितात्।।**[1] इति

अद्वैतानुसारं कर्तृत्वभोक्तृत्वादिरहितम् ब्रह्म, तत्र कर्तृत्वादि मिथ्याध्यासः भवति। सः अध्यासः अहं ब्रह्मास्मि इत्यद्यनुभवात्मक बोधेन नश्यति। तदधिष्ठानस्य ब्रह्मणः नाशः तु न भवति। परन्तु एते बौद्धाः तु समस्तजगतः नाशं साधयन्ति। तर्हि मोक्षः कस्य सम्भवति। तदुक्तम्-

**मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र नो मतः।**
**सर्वनाशो भवेद्यस्य मोक्षः कस्य फलं वद।।**[2] इति

अतः मोक्षरूपफलस्य अधिकारी स्थायी तत्तम् अवश्यं स्वीकर्तव्यम्। एवं नास्तिकानां मतं निराकृत्य अधुना आस्तिकानां मतं विचार्यते। तत्रादौ सांख्यानां प्रकृतिकारणवादः।

**प्रकृतिकारणवादः**

सांख्यदर्शने जगतः सृष्टिविषये प्रकृतिकारणवादम् अङ्गीक्रियते। तत्र प्रकृति-कारणवादानुसारम् प्रकृतिः एव जगतः कारणम्। गुणानां साम्यावस्था किञ्च तेषां वैषम्यविषये उपदेशसाहस्त्रीकारेण उच्यते यत् गुणानां साम्यावस्थायाः ध्वंसः न सम्भवति। तथा सर्गात् पूर्वम् अविद्यादिः स्वकारणे लीनम् आसीत्। तेनापि जगतः सृष्टिः न सम्भवति। एतदतिरिक्तम् पुरुषः अपि न जगदुत्पत्तेः कारणम्, यतो हि निर्विकाररूपः पुरुषः। अत्रेदं वक्तव्यम् यत् गुणवैषम्यं विना अन्यत् कारणं स्वीक्रियते चेत् अविद्यां स्वीकरणीया। तत्र प्रकृतेः परिणामात् प्राक् अविद्यादिः प्रकृतौ लीनं भवति। अतः सः परिणामस्य न कारणम्। तदुक्तम्-

**गुणानां समभावस्य भ्रंशो न ह्युपपद्यते।**
**अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरुच्यते।।**[3] इति

एवम् उपदेशसाहस्त्रीकारस्य कथनं यत् सांख्यमतानुसारं तु सृष्टिः एव न सम्भवति। सांख्यदर्शनानुसारं प्रधानं पुरुषस्य भोगमोक्षार्थं इत्यपि न वक्तुम् शक्यते।

---

1. उ. सा.- 1/16/33
2. उ. सा.- 1/16/30
3. उ. सा.- 1/16/45

अस्मिन् विषये उपदेशसाहस्रीकारस्य युक्तिः यत् यदि प्रधानं पुरुषस्य भोगमोक्षार्थं स्वीक्रियते चेत् मुक्तबद्धानां जीवानां भेदः एव न युज्यते। तदुक्तम्-

**विशेषो मुक्तबद्धानाम् तादर्थ्ये न च युज्यते।**
**अर्थार्थिनोस्त्वसम्बन्धो नार्थी ज्ञो नेतरोऽपि वा।।**[1] इति

किञ्च प्रधानस्य परार्थतां निराकरोति आचार्येण श्रीमच्छङ्करभगवत्पादेन तत्रसांख्यदर्शने पुरुषः निर्विकारः तस्मात् प्रधानस्य परार्थता न युक्तियुक्तः इति। किञ्च पुरुषस्य विकारः प्रकृतिः इति स्वीक्रियते चेदपि प्रधानस्य पुरुषार्थत्वं न युज्यते।[2] एवं प्रकारेण आचार्येण श्रीमच्छङ्करभगवत्पादेन सांख्यानां प्रमुखतर्कानां खण्डनं कृत्वा अद्वैतवादसिद्धान्तं स्थापितम्। एवं सांख्यानां मतमर्दनं कृत्वा न्यायवैशेषिकानां प्रमुखतर्कानां खण्डनप्रकारः प्रदर्श्यते-

## न्यायवैशेषिकमतम्

न्यायवैशेषिकाचार्यैः प्राधान्येन परमाणुकारणवादं तथा असत्कार्यवादमाधारिकृत्य कार्यकारणवादसिद्धान्तं प्रतिपादयति। एतेषाम् आत्मा किञ्च आत्ममनः संयोगविषये सम्बन्धः विचारयोग्यः। तत्र वैशेषिकदर्शनानुसारम् आत्मा जड किञ्च सुखदुः-खज्ञानादिगुणविशिष्टः। वैशेषिकानां मते तु आत्मा निर्विकारः विभुः तथा तस्य अनेकत्वं दृश्यते। शरीरावच्छिन्ने आत्मनि मनसः संयोगे जाते सुखदुः खादि धर्माः उत्पद्यन्ते। उपदेशसाहस्रीकारेण तु एतेषां वैशेषिकादीनां मतं खण्ड्यते। तत्र तेनोक्तम् यथा अग्नेः उष्णत्वं तस्य प्रकाशेन न प्रकाशितः भवति। तथैव वैशेषिक सिद्धान्तानुसारम् एकेनैव आश्रयेण स्थितत्वात् तद्गत-आनन्दादिगुणाः न ग्रहीतुं शक्यन्ते। तदुक्तम् उपदेशसाहस्र्य0ाम्-

**न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः।**
**एकनीडत्वतोऽग्राह्याः स्युः कणादादिवर्त्मनाम्।।**[3] इति

किञ्च समानकाले युगपत्सुखज्ञानयोः आत्मनः सह समवायसम्बन्धः भवितुं नार्हति। तथा च वैशेषिकदर्शनानुसारम् आत्ममनः संयोगे सुखस्य ग्रहणं भवति किञ्च सुखस्य ग्राह्यत्वमपि न सिद्ध्यति। तदुक्तम्

**युगपत्समवेतत्वं सुखविज्ञानयोरपि।**
**मनोयोगैकहेतुत्वादग्राह्यत्वं सुखस्य च।।**[4] इति

---

1. उ. सा.- 1/16/47
2. उ. सा.- 1/16/48
3. उ. सा.- 1/16/51
4. उ. सा.- 1/16/52

अत्र पुनः उपदेशसाहस्त्रीकारेण श्रीमच्छङ्करभगवत्पादेन आत्मनि सुखादिनां सिद्धिः न भवति इति प्रतिपादयति। तत्र तेन उक्तं यत् आत्मा ज्ञानस्वरूपं नेति कारणात् सुखादीनाम् उत्पत्तिः अपि कदापि न सम्भवति।[1]

एवं बहुत्र आचार्येण न्यायवैशेषिकानां प्रमुखतर्कानां खण्डनं तर्कप्रतिष्ठित-शैलीमाधारीकृत्य करोति। एवम् आचार्येण श्रीमच्छङ्करभगवत्पादेन उपदेशसाहस्र्यान्तर्गतं द्वैतमतं खण्डयित्वा अद्वैतमतं सतर्कं प्रतिपादितम्। आचार्येण श्रीमच्छङ्करभगवत्पादेन अद्वैतवादस्थापनद्वारा आत्मनः सत्यत्वं किञ्च जगतः मिथ्यात्वं समर्थितम्।[2]

**उपसंहारः**

इयम् उपदेशसाहस्त्री अद्वैतवेदान्तस्य विशिष्टः ग्रन्थः। यद्यपि ग्रन्थोऽयं प्रकरणग्रन्थः तथापि अस्य ग्रन्थस्य सिद्धान्तगरिमा, तर्कशीलता, शिल्पसौन्दर्यं वेदान्तजिज्ञासूनां कृते अपरिमितः। अनेके विद्वांसः अस्य ग्रन्थस्य पद्यभागस्य एव प्रामाणिकत्वम् अङ्गिकुर्वन्ति। यतोहि अस्य पद्यभागः अधिकरोचकः किञ्च कण्ठस्थकरणोर्थं योग्यः। तस्मात् अस्य पद्यभागस्य प्रसिद्धिः अधिका जाता। यदि वयं समस्तवेदान्तस्य सारं पठितुम् इच्छामः तर्हि अवश्यम् उपदेशसाहस्त्री पठनीया। वस्तुतः उपदेशसाहस्त्री वेदान्तस्य अपारज्ञानराशिः एव, या वेदवेदान्तानां परमसारः। एवं अल्पेन अक्षरेण अस्य समाप्तिः न सम्भवति तथापि करणीयमिति धीया शोधकार्यमिदम् अत्रैव समापितम्।

**संकेतपञ्जिः**

| | | |
|---|---|---|
| तै. उप. | = | तैत्तिरीयोपनिषद् |
| उ. सा. | = | उपदेशसाहस्त्री |
| उ. सा. (पद) | = | उपदेशसाहस्त्री (पदयोजनिका) |
| ब्र. सू. शा. भा. | = | ब्रह्मसूत्रशाङ्करभाष्यम् |
| कठ. उप. शा. भा. | = | कठोपनिषद् शाङ्करभाष्यम् |
| छा. उप. | = | छान्दोग्योपनिषद् |
| मु. उप. | = | मुण्डकोपनिषद् |

---

1. उ. सा.– 1/16/54
2. ब्रह्मसत्यंजगन्मिथ्येत्येवंरूपोविनिश्चयः। –विवेकचूडामणिः, 20

**परिशीलितग्रन्थपञ्जिः**


1. मुसलगाँवकर, गजाननशास्त्री. उपदेशसाहस्री. वाराणसी, श्री दक्षिणामूर्ति मठ प्रकाशन, 2010
2. उपदेशसाहस्री. महेश अनुसंधान संस्थान, 1978 (उपदेशसाहस्रीविवृतिः- आनन्दज्ञान)
3. उपदेशसाहस्री. 1914, गुजराती प्रिन्टिग प्रेस, 1917 (पदयोजनिका- रामतीर्थ)
4. केनोपनिषद्. गोरखपुर, गीताप्रेस, सं. 1994
5. कठोपनिषद्. गोरखपुर, गीताप्रेस, सं. 1994
6. घोषालः, चित्तरञ्जन. गीता-संग्रहः. ग्रन्थिक
7. घोषालः, चित्तरञ्जन. उपनिषद्संग्रहः. ग्रन्थिक
8. छान्दोग्योपनिषद्. गोरखपुर, गीताप्रेस, सं. 1994
9. तैत्तिरीयोपनिषद्. गोरखपुर, गीताप्रेस, सं. 2008
10. दीक्षितः, अप्पय. सिद्धान्तलेशसंग्रहः, काशी, अच्युतग्रन्थमाला, सं. 1993
11. दीक्षितः, अप्पय. सिद्धान्तलेशसंग्रहः . काशी, अच्युतग्रन्थमाला, सं. 1993
12. धर्मराजध्वरीन्द्र. वेदान्तपरिभाषा. वाराणसी, चौखम्बा विद्याभवन, 1954
13. बृहदारण्यकोपनिषद्. गीताप्रेस, सं. 2008
14. माण्डूक्यादित्रयोपनिषद्. कैलास गेट.हृषिकेश (उ.प्र.), श्री कैलास विद्या प्रकाशन, सं. 1999
15. विद्यारण्य. पञ्चदशी. निर्णयसागर मुद्रणालय, 1949
16. वादरायण. ब्रह्मसूत्रम्. वाराणसी, मोतिलाल बनारसीदास, सं. 2018
17. श्रीसदाशिवेन्द्रसरस्वती. ब्रह्मतत्त्वप्रकाशिका. श्रीवाणीविलासमुद्रनालय, 1927
18. सदानन्दः. वेदान्तसार. राममुर्ति शर्मा. नेशनल पब्लिशिंग हाउस, 1978
19. सदानन्दः, वेदान्तसार. श्रीरामशरणत्रिपाठीशास्त्री. चौखम्बा विद्याभवन, 2018


✦✦✦

# षष्ठीसमासनिषेधशास्त्राणां समीक्षणम्

**-उत्तम-माझिः ***

**शोधसारः**

समसनं समासः, सम्-उपसर्गपूर्वात् अस्-धातोः घञ्-प्रत्यये समासशब्दः सिद्ध्यति। अर्थात् 'द्वयोर्बहूनां वा पदानां मिलित्वा एकपदीभवनं समासः'। अव्ययीभावादिचतुर्विधसमासेषु षष्ठीतत्पुरुषोऽन्यतमः। **षष्ठी** (अष्टा. 2.2.2) इत्यनेन सूत्रेण षष्ठ्यन्तं सुबन्तं समर्थेन सुबन्तेन सह समस्यते। यथा- राज्ञः पुरुषः= राजपुरुषः। द्वितीयादिः तत्पुरुषसमासो निर्दिष्टस्थानैव विधीयते। परन्तु षष्ठीतत्पुरुष-समासस्य प्रयोगस्थलम् अतिविस्तृतम्, तस्य गतिविधिरपि सर्वत्रमेव। षष्ठीसमासस्य गतिविधिं नियन्त्रणाय विध्यपेक्षायाः निषेधस्य प्रयोजनमधिकम्। कारकषष्ठीसमास-निषेधसूत्रमनुसृत्यव्याख्या प्रस्तूयते। षष्ठीतत्पुरुषसमासविषये सप्तनिषेधसूत्राणि सन्ति। यथा- **न निर्धारणे** (अष्टा. 2.2.10) इत्यारभ्य **कर्तरि च** (अष्टा. 2.2.16) सूत्रपर्यन्तं सप्तसूत्रेण षष्ठीसमासः प्रतिषिध्यते। विधिशास्त्रं निषेधशास्त्रमुपजीव्यम्। अतो यत्र यत्र निषेधशास्त्रमस्ति तत्र तत्र विधिशास्त्रमपि अस्तीति अन्वयव्याप्तिसम्बन्धो वर्तते। परन्तु यत्र यत्र विधिशास्त्रमस्ति तत्र तत्र निषेधशास्त्रमपि अस्तीति वक्तुं न शक्यते। समासनिषेधसूत्रविषये वैयाकरणेषु विमतमपि परिलक्षितम्। प्रबन्धेऽस्मिन्निषेध-विषयकानि सप्तसूत्राणि स्वीकृत्यसमीक्षात्मकविचारः प्रस्तुतः।

**कुञ्चीशब्दाः**

कर्तरि, कर्मणि, कृद्योगा, निषेधः, निर्धारणम्, प्रतिपदविधाना, शेषत्वम्, समासः।

**उपोद्घातः**

षष्ठीतत्पुरुषसमासे सप्तनिषेधसूत्राणि सन्ति। तेषु षड्सूत्राणि कारकषष्ठी-समासनिषेधसूत्राणि। **षष्ठी** (अष्टा. 2.2.2) इति सूत्रेण प्राप्तौ षष्ठीसमासे **न**

* अतिथि-अध्यापकः, संस्कृत-विभागः, काजी-नजरुल-विश्वविद्यालयः, पश्चिमबर्धमानः, आसानसोलः, पश्चिमबङ्गालः-713340

**निर्धारणे** (अष्टा. 2.2.10) इत्यादि सूत्रेण प्रतिषिध्यते। यथा- आदौ **यतश्च निर्धारणम्** (अष्टा. 2.3.42) इत्येनन विहिता या षष्ठी तदन्तस्य समर्थसुबन्तेन सह समासे **न निर्धारणे** (अष्टा. 2.2.10) इत्यनेन प्रतिषिध्यते। षष्ठीसमासनिषेधार्थं वार्तिककारेणापि वार्तिकं कृतम्- प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम्। **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन** (अष्टा. 2.2.11) इत्यनेन प्राप्तौ षष्ठी (अष्टा. 2.2.2) इति सूत्रेण समासो निषेधः। **क्तेन च पूजायाम्** (अष्टा. 2. 2.12) सूत्रेण **मतिबुद्धिपूजार्थेभ्यश्च** (अष्टा. 8.2.188) इत्यनेन विहिता षष्ठी न समस्यते। इदमेषामासितम्, इदमेषां भुक्तम्, इदमेषां गतमित्यादौ **अधिकरणवाचिनश्च** (अष्टा. 2.3.86) इत्यनेन षष्ठीविभक्तिर्विधीयते। अतः **अधिकरणवाचिना च** (अष्टा. 2.2.13) इति निषेधसूत्रेण षष्ठीसमासः निषेधः। **उभयप्राप्तौ कर्मणि** (अष्टा. 2.3.66) इत्यनेन कर्मणि या षष्ठी सा समर्थेन सुबन्तेन सह समासः परन्तु **कर्मणि च** (अष्टा. 2.2.14) इति सूत्रेण प्रतिषिध्यते। **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यनेन कर्मणि षष्ठी विधीयते। तेन **षष्ठी** (अष्टा. 2.2.8) इत्यनेन षष्ठीसमासप्राप्तौ **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यनेन समासो निषिध्यते। **कर्तरि च** (अष्टा. 2.2.16) सूत्रमिदं षष्ठीसमासनिषेधस्य अन्तिमम्। अस्मिन् सूत्रविषये दीक्षितश्च पुनश्च काशिकाकारस्य किञ्चित् विमतं परिलक्षितम्। एतानि सप्तनिषेधसूत्राणि स्वीकृत्य लघुशोधपत्रेऽस्मिन् समीक्षात्मकमालोचनं क्रियते।

षष्ठीसमासोनिषेधस्य प्रथमं सूत्रं **न निर्धारणे** (अष्टा. 2.2.10) इति। **यतश्च निर्धारणम्** (अष्टा. 2.3.42) इति सूत्रेण विहिता या षष्ठी तदन्तस्य समर्थसुबन्तेन सह न समस्यत इत्यर्थः। सूत्रे निर्धारणमिति पदस्य व्याख्याप्रसङ्गे **काशिकाकारेणोक्तम्**- "जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक् करणं निर्धारणम्"।[1] सिद्धान्तकौमुदीकारेण संज्ञापदेन सह उक्तम्- "जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक् करणं निर्धारणम्"।[2] कैयटेन निर्धारणपदस्य व्याख्या क्रियते "यतो निर्धारणम्, यच्च निर्धार्यते, यश्च निर्धारणहेतुः, एतत्त्रितयसंनिधान एव तस्याः प्रवृत्तिरिति कैयटः"।[3] अर्थात् निर्धारणावधिः, निर्धार्यमानः, निर्धारणहेतुश्च- एतत्त्रितयसंनिधाने निर्धारणं भवति। यथा- नृणां द्विजः श्रेष्ठः। गवां कृष्णा बहुक्षीरा। गच्छतां धावच्छ्रीघ्रः। छात्राणां मैत्रः पटुः। एतेष्वुदाहरणेषु 'नृणाम्, 'गवाम्', 'गच्छताम्', 'छात्राणाम्' यथाक्रमे निर्धारणावधिः; 'द्विजः', 'कृष्णा','धावत्', 'मैत्रः' यथाक्रमे निर्धार्यमानः; 'श्रेष्ठः', 'बहुक्षीरा', 'शीघ्रः', 'पटुः' यथाक्रमे निर्धारणहेतुश्च। उक्तोदाहरणेषु

---

1. काशिका, द्वितीयो भागः, पृ.350
2. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 85
3. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, बालमनोरमा, पृ. 46

निर्धारणावधिः, निर्धार्यमानः निर्धारणहेतुश्च सुस्पष्टत्वम्, अतो निर्धारणम्। अतो **न निर्धारणे** (अष्टा. 2.2.10) इति सूत्रेण षष्ठीसमासो निषेधः। तर्हि 'पुरुषाणामुत्तमः =पुरुषोत्तमः' इत्यत्र कथं षष्ठीसमासः। विग्रहवाक्ये निर्धार्यमानस्याभावत्वात् निर्धारणं न भवति। 'पुरुषाणाम्' इत्यत्र निर्धारणे षष्ठी न, परन्तु शेषे षष्ठी। अतः षष्ठीसमासः सिद्धः। केचित्तु "उत्तमः ॐ पुरुषस्त्वन्यः परमात्मेत्युदाहृतः"[1] इति गीतावाक्यप्रमाणत्वात् कर्मधारय एव। 'उत्तमः पुरुषः' इति विग्रहे **राजदन्तादिषु परम्** (अष्टा. 2.2.31) इत्यनेन उत्तमशब्दस्य विशेषणत्वे परनिपातः। केचित्तु 'पुरुषेषूत्तमः' इति निर्धारणे सप्तमीतत्पुरुष एव। एतद्विषये तत्त्वबोधिनीकारेणोक्तम्- "न चैवं 'न निर्धारणे' इति व्यर्थम्। स्वरे भेदात्। सप्तमीसमासे हि 'तत्पुरुषे तुल्यार्थ-' इत्यादिना पूर्वपदप्रकृतिस्वरः, षष्ठीसमासे तु 'समासस्य' इत्यन्तोदात्तत्वं स्यात्तच्चानिष्टमित्याहुः। तन्मन्दम्। 'संज्ञायाम्' इति समासस्य नित्यत्वेन स्वपदविग्रहासंगतिप्रसङ्गात्।"[2] अतः 'पुरुषोत्तमः' इत्यत्र शेषे षष्ठीसमास एव समीचीनः।

षष्ठीसमासनिषेधार्थं वार्तिककारेण वार्तिकं कृतम्-प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम्।[3] अर्थात् प्रतिपदविधाना या षष्ठी सा सुबन्तेन सह न समस्यते। पदं पदं प्रतिपदमिति वीप्सार्थे अव्ययीभावः। प्रतिपदं विधानं यस्याः सा प्रतिपदविधानेति बहुव्रीहिसमासः। 'प्रतिपदविधाना' इति षष्ठ्या विशेषणम्। भाष्यकारेणोक्तम्-"सर्वा षष्ठी प्रतिपदविधाना शेषलक्षणां वर्जयित्वा"[4] अर्थात् 'षष्ठी शेषे' इति शेषलक्षणां षष्ठीं वर्जित्वा सर्वा षष्ठी प्रतिपदविधाना इति। यथा- सर्पिषो ज्ञानम्, पितुः स्मरणमिति। 'सर्पिषः', 'पितुः' इत्यत्र षष्ठी विधीयते यथाक्रमे **ज्ञोऽविदर्थस्य करणे** (अष्टा. 2.3.51), **अधीगर्थदयेशां कर्मणि** (अष्टा. 2.3. 52) इत्यनेन। अत्र 'षष्ठी शेषे' इति शेषलक्षणां वर्जित्वा करणादीनां शेषत्वेन विवक्षे षष्ठी विधीयते। अतः प्रतिपदविधानत्वात् षष्ठीसमासो न। तर्हि 'कृद्-योगा' षष्ठी प्रतिपदविधाना। तर्हि प्रतिपदविधानत्त्वात् **कर्तृकर्मणोः कृति** (अष्टा. 2.3. 65) इत्यनेन विहिता या षष्ठी सा सुबन्तेन सह न समस्यते। अतः षष्ठीसमासविधानार्थं "कृद्योगा च षष्ठी समस्यत" इति वाच्यम्[5] इति वार्तिकस्यावश्यकम्। अतः **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यनेन कर्तरि कर्मणि च या षष्ठी सा सुबन्तेन समर्थेन सह समस्यते। उदाहरणं यथा-इध्मप्रवचनः, पितुस्मृतिः, हरिस्मरणम्, शिरच्छेदः, मांसभोजनमित्यादि।

---

1. तदेव
2. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, तत्त्वबोधिनी, पृ. 46
3. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, वार्तिकम्, पृ. 45-46
4. व्याकरणमहाभाष्यम्, द्वितीयं खण्डम्, पृ. 431
5. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, वार्तिकम्, पृ. 45

प्रदीपोद्द्योत-पदमञ्जरी-तत्त्वबोधिनीकारैः मतानुसारेण "प्रतिपदविधाना षष्ठी-समासनिषेधः" "कृद्योगा षष्ठीसमासविधायक"श्च वार्तिकद्वयमेव प्रत्याख्यातम्। **षष्ठी शेषे** (अष्टा. 2.3.50) इत्यनेन शेषत्वेनैव षष्ठीप्राप्ते पुनः **ज्ञोऽविदर्थस्य करणे** (अष्टा. 2.3.51) इत्यारभ्य **व्यवहृपणोः समर्थयोः** (अष्टा. 2.3.57) पर्यन्तम्, अपि च कृत्वोऽर्थप्रयोगे **कालेऽधिकरणे** (अष्टा. 2.3.64) इति अष्टसूत्रेषु करणादीनां शेषत्वेन विवक्षिते षष्ठी विधीयते। अष्टसूत्रेषु **षष्ठी शेषे** (अष्टा. 2. 3.50) सूत्रात् 'शेषे' इत्यनुवर्तते। तेन 'न माषाणामश्नीयात्' इव सर्वत्र **षष्ठी शेषे** (अष्टा. 2.3.50) सूत्रेणैव सिद्धम्। तर्हि एतानि अष्टसूत्राणि किमर्थम्? उत्तरे वक्तुं शक्यते नियमार्थमिदम्। सूत्राष्टकेन षष्ठ्येव भवति न तल्लुकिति। तथा च लुकः प्रयोजकीभूतः समासो न भवतीति तात्पर्यम्। पदमञ्जरीकारेण तथैवोक्तम्- "तत्र न माषाणामश्नीयात् 'षष्ठी शेषे' इत्यनेनैव सिद्धा षष्ठी, प्रकरणं तु नियमार्थम्। षष्ठी भवत्येव श्रूयत एव, न तस्याः समासो भवतीत्यर्थः समासे 'सुपो धातुप्रातिपदिकयोः' इति सुब्लुक् स्यात्।"[1] तर्हि 'प्रतिपदविधाना' इति न वक्तव्यम्। अपि च षष्ठीसमासो विधानार्थं 'कृद्योगा षष्ठी' इति वार्तिकमपि प्रयोजनं नास्तीति। **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यत्र शेषाधिकारो निवृत्तः। शेषे षष्ठीति अप्राप्ता षष्ठी कृद्योगे विधीयते। अपि च समासनिवृत्तिप्रसङ्गाभावात् **षष्ठी** (अष्टा. 2.2.8) इत्यनेन षष्ठीसमासः। अस्मिन् प्रसङ्गे तत्त्वबोधिनीकारेणोक्तम्- "एवं च शेषत्वविवक्षायां सर्पिषो ज्ञानं, मातुः स्मरणमित्यादीन्यसमस्तान्येव साधूनि। हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कृद्योगषष्ठ्याः समासे बोध्यानि।"[2] परन्तु न्यासकारस्य मते- "कृद्योगलक्षणा षष्ठी समस्यते' इति व्याख्येयम्। तत्रेदं व्याख्यानम्- यदयम् 'क्तेन च पूजायाम्' 'अधिकरणवाचिना च' 'कर्मणि च' 'तृजकाभ्यां कर्तरि च' इति निषेधमारभते, तज्ज्ञापयति- 'कृद्योगा या षष्ठी सा समस्यते' इति- अन्यथा प्रतिषेधारम्भोऽनर्थकः स्यात्, प्राप्त्यभावात्"[3] इति।

यदि प्रतिपदविधानेन षष्ठीसमासः प्रतिषिध्यते, कथं तर्हि 'गृहस्वामी', 'विद्यादायादः', पृथिवीश्वर इति समासः। अत्र **स्वामीश्वराधिपतिदायादसाक्षिप्रतिभू-प्रसूतैश्च** (अष्टा. 2.3.39) विशेषलक्षणेन षष्ठी विधीयते, अतः सा प्रतिपदविधाना। परन्तु अनेन सूत्रेण सप्तमी विधीयते, न तु षष्ठी। न्यासकारेण समाधाने उक्तम्- "सा तु सप्तमी षष्ठीं बाधिष्यत इति चकारेण पुनः षष्ठीप्रतिप्रसवः क्रियते। न

---

1. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, तत्त्वबोधिनी, पृ. 46
2. "षष्ठी शेषे" (अष्टा. 2.3.50) सूत्रस्यवैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, तत्त्वबोधिनी, पृ. 674
3. काशिका, द्वितीयो भागः,न्यासः, पृ. 348

ह्येवंविधा षष्ठी प्रतिपदविधाना भवति।"[1] परन्तु महाभाष्यकारेण चकारेण प्रतिपदविधाना षष्ठी कृता। अतः **यतश्च निर्धारणम्** (अष्टा. 2.3.41) इत्यत्रापि चकारेण प्रतिपदविधाना षष्ठी विधीयते। तर्हि प्रतिपदविधानत्वात् **न निर्धारणे** (अष्टा. 2.3.10) इति सूत्रं प्रयोजनं नास्ति। बालमनोरमाकारस्य वचनमेव प्रमाणम्- "सर्पिषो ज्ञानमिति। अत्र 'ज्ञोऽविदर्थस्य करणे' इति विहितषष्ठ्याः समासो न भवति। 'न निर्धारणे' इति प्रत्याख्येयमेवेति भाष्ये स्पष्टमित्यलम्।"[2] परन्तु न्यासकारेण चकारेण शेषे लक्षणैव षष्ठी स्वीकृता। तेनोक्तम्- "यतश्च निर्धारणम्' इत्यत्रापि हि चकारेण शेषलक्षणा षष्ठी प्रतिप्रसूयते, अन्यथा हीयमपि प्रतिपदविधानैव षष्ठीति समासो न स्यात्। ततश्च 'न निर्धारणे' इति प्रतिषेधोऽनर्थकः स्यात्।"[3]

**पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन** (अष्टा. 2.2.11), षष्ठी-समासनिषेधस्य द्वितीयसूत्रमिदम्। दीक्षितेनोक्तम्- "पूरणार्थैः सदादिभिश्च षष्ठी न समस्यते।"[4] अर्थात् पूरण, गुण, सुहितार्थ, सद्, अव्यय, तव्य, समानाधिकरण-इत्येतैः सह षष्ठीसमासः प्रतिषिध्यते। पूरणे उदाहरणं यथा- सतां षष्ठः। षण्णां षष्ठ इत्यर्थे **तस्य पूरणे डट्** (अष्टा. 5.2.48) पूरणार्थे 'डट्' प्रत्ययेन 'षष्ठः' इति पदं सिद्धम्। अतः तेन सहित षष्ठीसमासो निषेधः। गुणे उदाहरणं यथा-काकस्य कार्ष्ण्यमित्यत्र कृष्णशब्दात् भावे ष्यञि प्रत्यये 'कार्ष्ण्यम्' इति पदं निष्पन्नम्। अतः तेन सह षष्ठीसमासो निषिध्यते। 'ब्राह्मणस्य शुक्लः' इत्यत्र गुणवाचकशुक्लपदेन सह षष्ठी न समस्यते। तर्हि शुक्लशब्देनान्वयाभावादसामर्थ्यात् कथमिह समासप्रवृत्तिः? तस्मात् दीक्षितेनोक्तम् "यदा प्रकरणादिना दन्ता इति विशेष्यं ज्ञातं तदेदमुदाहरणम्।"[6] अतः ब्राह्मणशब्दस्य दन्तशब्देनैवान्वयात् समाससिद्धः, तस्मात् निषेधः कृतः। परन्तु पाणिनिमुनिना **तदशिष्यं संज्ञाप्रमाणत्वात्** (अष्टा. 1.2.53) इत्येवं सूत्रं कृतम्। अत्र संज्ञायाः प्रमाणत्वम् = संज्ञाप्रमाणत्वम्' तस्मात् संज्ञाप्रमाणत्वात्। अत्र गुणवाचक-प्रमाणत्वपदेन सह समासः कृतः। एतेन ज्ञापितोऽनित्यसमासः गुणशब्देन निषेधः। तस्मात् अर्थस्य गौरवमर्थगौरवम्, बुद्धेः मान्दं बुद्धिमान्द्यमिति समासः सिद्धः। सुहितार्थे-तृप्त्यर्थकसुहितशब्देन सहित षष्ठी न समस्यते। तस्मात् दीक्षितेनोक्तम्- "सुहितार्थास्तृप्त्यर्थाः।"[7] उदाहरणं यथा-फलानां सुहितः। सूत्रे अर्थग्रहणत्वात् 'फलानां

---

1. काशिका, द्वितीयो भागः,न्यासः, पृ. 351
2. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, बालमनोरमा, पृ. 46
3. काशिका, द्वितीयो भागः,न्यासः, पृ. 351
4. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 47
5. "गुणवचनब्राणादिभ्यः कर्मणि च" अष्टा. 5.1.124
6. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 47
7. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 47

तृप्तिः' अत्रेव समासो न जातः। तर्हि फलसहितमित्यत्र कथं समासः? समाधाने दीक्षितेनोक्तम्- "तृतीयासमासस्तु स्यादेव।"[1] तृतीयातत्पुरुषसमासे स्वरे वैशिष्ट्यं वर्तते। तस्मात् षष्ठीसमासनिषेधस्यावश्यकतास्ति। सूत्रे 'सद्' शब्देन शतृशानचौ बोध्यौ। तस्मात् शतृप्रत्ययेन शानच्प्रत्ययेन च सुबन्तेन सह षष्ठीसमासो प्रतिषिध्यते। उदाहरणं यथा- द्विजस्य कुर्वन् कुर्वाणो वा। परन्तु **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यनेन कर्मणि षष्ठी प्राप्तौ **न लोकाव्ययनिष्ठाखलर्थतृनाम्** (अष्टा. 2.3.69) इत्यनेन कर्मणि षष्ठी प्रतिषिध्यते। तर्हि षष्ठीविभक्तेरप्राप्ते कथं षष्ठी-समासनिषेध? समाधाने पदमञ्जरीकारेणोच्यते- "नेयं घटाद्यपेक्षया षष्ठीब्राह्मणस्य घटं कुर्वन्निति, एवं ह्यसामर्थ्यादेव समासस्याप्रसङ्गः; किं तर्हि कुर्वन्निति किङ्कर उच्यते, स हि कुर्वन् भवति...।"[2] परन्तु भाष्यकारस्य भिन्नमतमस्ति। तेनोक्तम्- "इदं तर्हि- चोरस्य द्विषन्, वृषलस्य द्विषन्। ननु चात्रापि प्रतिषिध्यते षष्ठी। वक्ष्यते तद्- 'द्विषः शतुर्वावचनमिति।"[3]

सूत्रे अव्ययशब्देन कृदव्ययं गृह्यते। तेन दीक्षितेनोक्तम्- "पूर्वोत्तरसाहचर्यात्कृद-व्ययमेव गृह्यते।"[4] अतः सुबन्तेन कृदव्ययेन षष्ठी न समस्यते। यथा- ब्राह्मणस्य कृत्वा। परन्तु **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यनेन कर्मणि षष्ठी प्राप्तौ "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इत्यनेन कर्मणि षष्ठी प्रतिषिध्यते। 'ब्राह्मणस्य कटं कृत्वा' इति कटाद्यपेक्षया शेषषष्ठी, तर्हि सापेक्षत्वेनासामर्थ्यात् कृत्वा इत्यनेन समासाप्रवृत्तिः। तस्मात् निषेधो व्यर्थः। समाधाने तत्त्वबोधिनीकारेणोक्तम्- "ब्राह्मण-संबन्धिनी या क्रिया तदनन्तरमित्यर्थः।"[5] अर्थात् 'कृत्वा' इत्यस्यार्थो ब्राह्मणसंबन्धिनी क्रिया, अतः समर्थादेव समासप्राप्तौ निषेधः। महाभाष्यकारेण समाधाने उच्यते- "द्रव्यमत्रापेक्ष्यते कटः। इदं तर्हि- 'पुरा सूर्यस्योदेतो राधेयः' 'पुरा वत्सानामपाकर्तोः'। ननु चात्रापि प्रतिषिध्यते- अव्ययमिति कृत्वा वक्ष्यत्येतद्-अव्ययप्रतिषेधे तोसुन्क-सुनोरप्रतिषेधः' इति।"[6] अतो वार्तिकानुसारेण तोसुन्कसुनयोगेऽपि षष्ठी स्यादेव। अतो समासस्य प्राप्तौ निषेधो विधीयते।

सुबन्तेन तव्यप्रत्ययान्तेन सह षष्ठ्यन्तस्य समासो न भवति। उदाहरणं यथा- ब्राह्मणस्य कर्तव्यम्। अत्र **तव्यत्तव्यानीयरः** (अष्टा. 3.1.69) इत्यनेन 'कृ'धातोः 'तव्य' प्रत्ययेन **कृत्यानां कर्तरि वा** (अष्टा. 2.3.71) इति सूत्रेण 'ब्राह्मणस्य' इति

1. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 47
2. काशिका, द्वितीयो भागः, पदमञ्जरी, पृ. 353
3. व्याकरणमहाभाष्यम्, द्वितीयं खण्डम्, पृ. 432-433
4. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 49
5. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, तत्त्वबोधिनी, पृ. 50
6. व्याकरणमहाभाष्यम्, द्वितीयं खण्डम्, पृ. 433

कर्तरि षष्ठी वा विधीयते। अतः तव्यप्रत्ययान्तेन सह षष्ठ्यन्तस्य समासः प्रतिषिध्यते। मनसि शङ्का जाता 'स्वस्य कर्तव्यम् = स्वकर्तव्यम्' इत्यत्र कथं समासः? समाधाने दीक्षितेनोच्यते- "तव्यता तु भवत्येव।"[1] अर्थात् 'तव्यत्' प्रत्ययान्तेन सुबन्तेन सह षष्ठीसमासो भवत्येव। पुनः काशिकाकारेण आशङ्का कृता- "तव्यता सानुबन्धकेन समासो भवत्येव- ब्राह्मणस्य कर्तव्यम्।"[2] तर्हि निषेधस्य किं प्रयोजनम्? समाधाने न्यासकारेणोच्यते- "गतिकारकोपपदात् कृत्' इति प्रकृतिस्वरेणान्तस्वरितमुत्तरपदं भवति। यदि तर्हि निरनुबन्धकेनापि समासः स्यात् प्रकृतिस्वरे कृते प्रत्ययस्वरेण मध्योदात्तः स्यात्, स चानिष्टः; अतो निरनुबन्धकेन समासः प्रतिषिध्यते, नतु सानुबन्धकेन।"[3]

समानाधिकरणेन सह षष्ठीसमासः निषिध्यते। उदाहरणं यथा- तक्षस्य सर्पस्य। अत्र **षष्ठी** (अष्टा. 2.2.8)सूत्रेण प्राप्ता षष्ठी निषेधः। परन्तु षष्ठीसमासो निषेधेऽपि **विशेषणं विशेष्येण बहुलम्** (अष्टा. 2.1.57) इत्यनेन कर्मधारयसमासो भवत्येव। तर्हि निषेधस्य किं प्रयोजनम्? समाधाने दीक्षितेनोच्यते- "विशेषणसमासस्त्विह बहुलग्रहणान्न।"[4] षष्ठीसमासनिषेधस्यापरमुदाहरणं यथा- गोर्धेनोः। अत्रापि षष्ठीसमासः प्रतिषेधः। परन्तु अत्र षष्ठीसमासस्य प्राप्तिरेव नास्ति। यस्मात् **पोटायुवतिस्तोक-कतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः** (अष्टा. 2. 1.65), युवाखलतिपलितवलिनजरतीभिः (अष्टा. 2.1.67) इत्यादीनां विभक्त्यन्तरे चरितार्थनां परसूत्रत्वात् बाधकप्राप्तः षष्ठीसमासः। **स षष्ठीसमासः पूरणगुणसुहितार्थ-सदव्ययतव्यसमानाधिकरणेन** (अष्टा. 2.2.11) इत्यनेन सूत्रेण वार्यत इति।

षष्ठीसमासनिषेधस्यापरं सूत्रं **क्तेन च पूजायाम्** (अष्टा. 2.2.12)। काशिका-रेणोक्तम्- "पूजाग्रहणमुपलक्षणार्थम्।"[5] कस्योपलक्षणम्? **मतिबुद्धिपूजार्थेभ्यश्च** (अष्टा. 8.2.188) इति सूत्रस्योपलक्षणम्।अनेन सूत्रेण मन्धातोः, बुध्धातोः पूज्धातोश्च योगे वर्तमाने 'क्त'प्रत्ययो विधीयते। **क्तस्य च वर्तमाने** (अष्टा. 2.3.67) इत्यनेन वर्तमानार्थस्य क्तस्य योगे कर्तरि षष्ठी विधीयते। **न निर्धारणे** (अष्टा. 2.2.10) इत्यतो 'न' इत्यनुवर्तते। अतः सम्पूर्णसूत्रार्थो भवति- मतिबुद्धिपूजार्थेभ्यश्च (अष्टा. 8.2.188) इत्यनेन विहितो यः क्तप्रत्ययः तदन्तेन सुबन्तेन सह षष्ठी न समस्यते। यथा- राज्ञां मतः। राज्ञां बुद्धः। राज्ञां पूजितः। अत्र क्तप्रत्ययान्तपदयोगे राज्ञामिति

---

1. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 49
2. काशिका, द्वितीयो भागः, पृ. 353
3. काशिका, द्वितीयो भागः,न्यासः, पृ. 353
4. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 50
5. काशिका, द्वितीयो भागः,न्यासः, पृ. 354

कर्तरि षष्ठी। अत: षष्ठ्यन्तं सुबन्तं क्तप्रत्ययान्तेन सुबन्तेन सह षष्ठीसमासप्रतिषेधो भवति। परन्तु शेषलक्षणा षष्ठी स्यादेव। अतो न्यासकारेणोक्तम्- "पूजायां किम्? छात्रस्य हसितं छात्रहसितम्। 'नपुंसके भावे क्त:'। शेषलक्षणा षष्ठी।"[1] परन्तु राजपूजित:, राजमत:, राजबुद्ध इत्येतेषु कथं षष्ठीसमाससिद्ध:? समाधाने दीक्षितेनोक्तम्- "राजपूजित इत्यादौ तु भूते क्तान्तेन सह तृतीयान्तस्य समास:।"[2] यत: राज्ञा पूजित:= राजपूजित इत्यादौ भूते क्तप्रत्ययो विधीयते। अत: **कर्तृकरणे कृता बहुलम्** (अष्टा. 2.1.32) इत्यनेन राजपूजित इत्यादौ तृतीयातत्पुरुषसमाससिद्ध:।

**अधिकरणवाचिना च** (अष्टा. 2.2.13) इति षष्ठीसमासनिषेधस्य चतुर्थसूत्रम्। अनेन सूत्रेणइदमेषामासितम्, इदमेषां भुक्तम्, इदमेषां गतमित्यादौ षष्ठीसमासो प्रतिषिध्यते। सूत्रार्थो भवति-अधिकरणार्थे विहितो य: क्तप्रत्यय: तदन्तेन सुबन्तेन सह षष्ठी न समस्यते। उक्तोदाहरणेषु क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्य: (अष्टा. 3.4.76) इति सूत्रेण अधिकरणार्थे क्तप्रत्यये 'आसितम्', 'भुक्तम्', 'गतम्' एते पदानि निष्पन्नानि। क्तप्रत्ययान्तपदयोगे एषामित्यत्र **अधिकरणवाचिनश्च** (अष्टा. 2.3.86) इत्यनेन षष्ठीविभक्तिर्विधीयते। अत: प्रकृतसूत्रेण षष्ठीसमास: प्रतिषिध्यते।

**कर्मणि च** (अष्टा. 2.2.14) इति षष्ठीसमासनिषेधस्यापरं सूत्रमिदम्। **क्तेन च पूजायाम्** (अष्टा. 2.2.10) इत्यत: 'क्तेन' इति पदं नानुवर्तते, कर्मपदं षष्ठीविशेषणम्। अत: कर्मणि या षष्ठी सा न समस्यते। तर्हि 'अपां स्रष्टा' इत्यत्र अपामिति कर्मणि षष्ठी। अत: **कर्मणि च** (अष्टा. 2.2.14) इत्यनेन षष्ठीसमासनिषेधो भवति। तर्हि **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) सूत्रमिदं व्यर्थम्। अतो दीक्षितेनोक्तम्- **उभयप्राप्तौ कर्मणि** (सूख 624) इति या षष्ठी सा न समस्यते।"[3] 'कर्मणि' पदेन **उभयप्राप्तौ कर्मणि** (अष्टा. 2.3.66) इति सूत्रं बोध्यम्। अत: **उभयप्राप्तौ कर्मणि** (अष्टा. 2.3.66) इत्यनेन कर्मणि या षष्ठी सा समर्थेन सुबन्तेन सह न समस्यते। **कर्तृकर्मणो: कृति** (अष्टा. 2.3.65) इत्यनेन कृद्योगे कर्तरि कर्मणि च षष्ठी विहिता। परन्तु **उभयप्राप्तौ कर्मणि** (अष्टा. 2.3.66) इत्यनेन कर्तृकर्मणोरुभयप्राप्तौ कर्मणि एव षष्ठी विहिता नतु कर्तरि। अत: कर्मण्येव समासस्य निषेधो भवति। यथा-आश्चर्यो गवां दोहोऽगोपालकेन। अत्र 'दुह्'धातो: घञ्प्रत्ययेन 'दोह:' इति पदं निष्पन्नम्। अत: तद्योगे गवामिति कर्मणि षष्ठी विहिता, परन्तु 'अगोपेन' इति कर्तृत्वात् **कर्तृकरणयोस्तृतीया** (अष्टा. 2.3.18) इत्यनेन

---

1. काशिका, द्वितीयो भाग:, पृ. 355
2. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भाग:, बालमनोरमा, पृ. 52
3. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भाग:, पृ. 52

अनुक्तकर्तरि तृतीया। अत एव 'गवां दोह:' इत्यत्र षष्ठीसमासप्राप्ते **कर्मणि च** (अष्टा. 2.2.14) इत्यनेन षष्ठीसमासो निषेधः।

**तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इति षष्ठीसमासनिषेधस्यापरं सूत्रमिदम्। तृच् च अकश्च इतरेतरयोगद्वन्द्वसमासस्तृजकौ, ताभ्यां तृजकाभ्याम्। अस्मिन् सूत्रविषये दीक्षितकाशिकाकारमतयोः किञ्चित् वैषम्यं परिलक्षितम्। आदौ दीक्षितस्य मतम्- "कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः।"[1] अर्थात्कर्तरीति तृजकयोरेव विशेषणम्, न तु षष्ठ्याः। अतो कर्त्रर्थकं तृच्प्रत्ययान्तं सुबन्तम् अक्प्रत्ययान्तं सुबन्तञ्च षष्ठ्यान्तेन न समासः। यथा- अपां स्रष्टा। ओदनस्य पाचकः। 'सृज्'धातोः **ण्वुलतृचौ** (अष्टा. 3.1.133) इति सूत्रेण कर्त्रर्थे 'तृच्'-प्रत्यये 'स्रष्टा' इति पदं निष्पन्नम्। 'पच्'धातोः **ण्वुलतृचौ** (अष्टा. 3.1.133) इति सूत्रेण कर्त्रर्थे 'अक्'[2]-प्रत्यये 'पाचकः' इति पदं निष्पन्नम्। तस्मात् 'अपाम्', 'ओदनस्य' इत्यत्र **कर्तृकर्मणोः कृति** (अष्टा. 2. 3.65) इत्यनेन कर्मणि षष्ठी विधीयते। तेन **षष्ठी** (अष्टा. 2.2.8) इत्यनेन षष्ठीसमासप्राप्ते **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यनेन समासो निषिध्यते।

परन्तु काशिकाकारस्य भिन्नं मतमस्ति। तस्य मते कर्तरीति षष्ठ्याः विशेषणम्। अतः सूत्रार्थो भवति- "कर्तरि या षष्ठी सा तृजाऽकेन च सह न समस्यते।"[3] तेन तस्योदाहरणं प्रदत्तम्- भवतः शायिका। भवत आसिका। भवतोऽग्रगामिका। **पर्यायार्हर्णोत्पत्ति ण्वुच्** (अष्टा. 3.3.111) इत्यनेन भावार्थे 'ण्वुच'प्रत्यये 'शायिका', 'आसिका', 'अग्रगामिका'- एते पदानि निष्पन्नानि। तस्मात् 'भवतः' इत्यत्र कर्तरि षष्ठी भवति। तर्हि 'भवतः' इति कर्तरि षष्ठी पुनश्च 'शायिका' 'आसिका', 'अग्रगामिका' इति अकप्रत्ययान्तम्, अतः समासो न भवति। प्रकृतसूत्रे 'तृच्' इति व्यर्थम्। यतः 'तृच्' प्रत्यययोगेन कदापि कर्तरि षष्ठी न भवति।यतः 'तृच्'-प्रत्ययः सवर्दा कर्त्रर्थे एव भवति। तस्मात् प्रातिपदिकार्थे प्रथमा तदर्थे षष्ठी नजायते। तर्हि तृज्ग्रहणं किमर्थम्? "तृज्ग्रहणमुत्तरार्थम्।"[4]

अधुना शङ्का जायते यत्- 'कर्तरि' ग्रहणं किमर्थम्? अत्र उच्यते- "कर्मणि षष्ठ्या समासः। 'कर्मणि च' इति निषेधस्तु न, कर्तुः प्रयोग एव तत्प्रवृत्तेः।"[5] यथा- इक्षुणां भक्षणमिक्षुभक्षिका। 'भक्षिका' इति पदे भावार्थे 'ण्वुल्'-प्रत्ययो विधीयते। अतः 'इक्षुणाम्' इति **कर्तृकर्मणोः कृति** (अष्टा. 2.3.65) इत्यनेन कर्मणि षष्ठी, तस्मात् षष्ठीसमासो भवति।

1. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 53
2. "युवोरनाकौ" अष्टा. 7.1.1
3. काशिका, द्वितीयो भागः, पृ. 357
4. काशिका, द्वितीयो भागः, पृ. 357
5. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, बालमनोरमा, पृ. 53

पुनः शङ्का जायते– भुवो भर्ता = भूभर्ता, देवस्य पूजकः = देवपूजक इत्यादौ कथं षष्ठीसमासः? उक्तोदाहरणेषु कर्त्रर्थे यथाक्रमे तृजकप्रत्ययो विधीयते। अतः **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यनेन समासनिषेधो कथं न भवति। 'भर्ता', 'पूजकः' इत्यादि याजकादौ पाठात् षष्ठीसमासो भवत्येव। अतः **याजकादिभिश्च** (अष्टा. 2.2.9) इत्यस्य प्रतिप्रसवार्थत्वात् समाससिद्धः। एवं तर्हि 'वज्रस्य भर्ता' इत्यत्रापि समासप्रङ्गात् दीक्षितेनोक्तम्–"पत्यर्थभर्तृशब्दस्य तु याजकादित्वात्समासः।"[1] पुनः शङ्का जायते– "कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः' इति।"[2] 'त्रिभुवनस्य विधाता' अस्मिन्विग्रहे 'विधाता' इत्यत्र 'तृच्' प्रत्ययान्तं सुबन्तेन सह कथं समाससिद्धः? समाधाने दीक्षितेनोच्यते– "शेषषष्ठ्या समास इति कैयटः।"[3] न्यासकारस्य तु भिन्नं मतम्, तस्य मते–'विधातृ' इत्यत्र 'तृच्' प्रत्ययान्तं न तु 'तृन्'। तस्मात् समाससिद्धः। परन्तु अत्रन **लोकाव्ययनिष्ठाखलर्थतृनाम्** (अष्टा. 2.3. 69) इत्यनेन षष्ठीविभक्तिप्रतिषेधो न भवति, यस्मात् प्रकृतसूत्रे 'तृन्' प्रत्याहारस्य निर्देशेन अनित्यं प्रतिपाद्यते।

**कर्तरि च** (अष्टा. 2.2.16) सूत्रमिदं षष्ठीसमासनिषेधस्य अन्तिमम्। अस्मिन् सूत्रविषये दीक्षितश्च पुनश्च काशिकारस्य किञ्चित् विमतं परिलक्षितम्। आदौ दीक्षितस्य मतम्–'कर्तरि' इति षष्ठीविशेषणम्। अतः सूत्रार्थो भवति– कर्तरि या षष्ठी सा अकेन न समस्यते। यथा– भवतः शायिका। यस्मात् अत्र 'शायिका' इति 'अक' प्रत्ययान्तं पदं कर्त्रर्थे न भवति। तस्मात् **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यनेन निषेधो न प्राप्तः। अतो वर्तमानसूत्रमावश्यकम्।

अधुना शङ्का जाता **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यत्र 'तृजकाभ्याम्' इति समासबद्धपदम्। तस्मात् "एकयोगनिर्दिष्टानां सह वा प्रवृत्ति सह वा निवृत्तिः"[4] इति परिभाषानुसारेण 'तृजकाभ्याम्' इति अनुवर्तनीयम्। तर्हि कथं 'अक' इति अनुवृत्तम्? तस्मात् सिद्धान्तकौमुदीकारेणोक्तम्– "नेह तृजनुवर्तते। तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्।"[5] अस्मिन् प्रसङ्गे बालमनोरमाकारेणापि उच्यते– "तृचः कर्तरि विहितत्वेन स्रष्टा कृष्ण इत्यादौ कर्तुः कृताभिहिततया तत्र कर्तरि षष्ठ्या एवाप्रसक्तया तत्समासनिषेधस्य शशश्रृङ्गेण कण्डूयनं न कर्तव्यमितिवदसंभवपराहतत्वा-दित्यर्थः।"[6]

---

1. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 53
2. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 53-54
3. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 54
4. परिभाषेन्दुशेखरः 17
5. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, पृ. 54
6. वैयाकरणसिद्धान्तकौमुदी, द्वितीयो भागः, बालमनोरमा, पृ. 54

परन्तु काशिकाकारस्य भिन्नं मतमस्ति। तस्य मते- 'तृजकाभ्याम्' इति पदमनुवर्तते। अतः सूत्रार्थो भवति- कर्त्रर्थकं तृच्प्रत्ययान्तं सुबन्तम् अकप्रत्ययान्तं सुबन्तञ्च षष्ठ्यान्तेन न समासः।[1] तेन तस्योदाहरणं प्रदत्तम्- अपां स्रष्टा। पुरां भेत्ता। व्रजस्य भर्त्ता। ओदनस्य भोजकः। सुक्तूनां पायकः। अत्र कर्त्रर्थकं तृच्प्रत्ययान्तं सुबन्तम् अकप्रत्ययान्तं सुबन्तञ्च षष्ठ्यान्तेन सह समासः प्रतिषिध्यते। दीक्षितेन पूर्वसूत्रेणैव समाधानं कृतम्।

**उपसंहृतिः**

सूत्रकारपाणिनिमुनिना वैज्ञानिकपद्धत्यावलम्बनं कृत्वा सूत्ररचना कृता। सूत्राणां वैज्ञानिकता सर्वत्र उपलभ्यते। समासप्रकरणेऽपि कौशलेन षष्ठीसमासः प्रतिषिध्यते। आदौ कारकषष्ठीविभक्तिविधायकानि सूत्राणि आलोच्य अनिष्टनिवारणार्थं षष्ठीसमास-निषेधः कृतः। प्रतिपदविधाना षष्ठीविषये विमतं परिलक्षितम्। परन्तु पाणिनिमुनिना कुत्रापि 'प्रतिपदविधाना' इति पदं नोल्लिखितम्। अतः टीकाकारैः प्रतिपदविधाना षष्ठीसमासनिषेधो वार्तिकम् अपि च कृद्योगा षष्ठीसमासो विधायकं वार्तिकं प्रत्याख्यातम्। तस्मात् वक्तुं शक्यते वार्तिकद्वयस्याभावे कापि समस्या न जाता अपि च लाघवं भवति। **पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन** (अष्टा. 2.2. 11) इत्यस्मिन् सूत्रे प्रतिपदमत्यन्तं प्रासङ्गिकम्। प्रतिपदमाश्रित्य षष्ठीसमासः प्रतिषिध्यते। 'न लोकाव्यय..' इत्यनेन शतृ-शानच्-प्रत्ययान्तपदयोगेन अव्यययोगेन च षष्ठीविभक्तिर्प्रतिषिध्यते, परन्तु षष्ठीं विधाय षष्ठीसमासनिषेधार्थं सिद्धान्त-कौमुदीकारमपेक्षया महाभाष्यकारस्य मतमधिकं युक्तिसंगतम्। **क्तेन च पूजायाम्** (अष्टा. 2.2.12) इत्यारभ्य **कर्मणि च** (अष्टा. 2.2.14) पर्यन्तं सूत्रत्रयेण कौशलेन सारल्येण कारकषष्ठीसमासः प्रतिषिध्यते। **तृजकाभ्यां कर्तरि** (अष्टा. 2. 2.15), **कर्तरि च** (अष्टा. 2.2.16) इति सूत्रद्वयस्य अर्थप्रतिपादने दीक्षितस्य पुनश्च काशिकाकारस्य वैमत्यं परिलक्षितम्। आलोचनान्ते वक्तुं शक्यते दीक्षितस्य मतं श्रेयम्, यतः **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यत्र तृचकप्रत्यययोः प्रयोजनं वर्तते। पुनश्च **कर्तरि च** (अष्टा. 2.2.15) सूत्रे 'तृच्'पदं नानुवर्तते। परन्तु काशिकाकारमते **तृजकाभ्यां कर्तरि** (अष्टा. 2.2.15) इत्यत्र 'तृच्' इति पदं व्यर्थम्। 'तृच्'पदं व्यर्थप्रतिपन्नं कृत्वा 'तृजकाभ्याम्' इति सम्पूर्णं पदमनुवर्तते। काशिकाकारस्य मतं क्लेशेन बोध्यते। लाघवमिच्छुकः वैयाकरणः दीक्षितमतं स्वीकरोतीति मम आशयः।

---

1. "कर्तरि च यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते।" काशिका, द्वितीयो भागः, पृ. 357

## सन्दर्भग्रन्थसूची


1. इश्वरचन्द्र, सम्पादकः (प्रथमभागः द्वितीयभागश्च 2017)। अष्टाध्यायी (चन्द्रलेखा-हिन्दीव्यख्या सहिता)। दिल्लीः चौखम्बासंस्कृत प्रतिष्टान।
2. तिवारी, हरिनारायण, सम्पादकः (द्वितीयोऽध्यायः 2014)। व्याकरणमहाभाष्यम् (ज्योत्सना समुद्भाषितम्)। वराणसी : चौखम्ब संस्कृत प्रतिष्टान।
3. त्रिपाठी, जयशङ्करलाल, सुधाकरमालवीय च सम्पादकौ (द्वितीयो भागः 2018)। काशिका (न्यास-पदमञ्जरीभावबोधिनी सहिता)। वाराणसी : तारा बुक एजेन्सी।
4. भट्टाचार्य, तपनशङ्कर, सम्पादकः (प्रथमभागः 2018)। वैयाकरणसिद्धान्तकौमुद्याः समासप्रकरणम् (सूत्रवृत्ति-वङ्गानुवाद-बालमनोरमालोचनापदसाधनप्रक्रिया-सहितम्)। कलकाता : त्रैलक्यनाथ-चतुष्पाठी।
5. मिश्र, विश्वनाथ, सम्पादकः (2016)। परिभाषेन्दुशेखरः (सुबोधिनी-हिन्दीव्याख्योपेतः)। वाराणसीः चौखम्बा सुरभारती प्रकाशन।
6. शर्मा, रघुनाथ, सम्पादकः (द्वितीयो भागः 2016)। वाक्यपदीयम् (तृतीयं काण्डम्)। वाराणसी : सम्पूर्णानन्द संस्कृतविश्वविद्यालयः।
7. शर्मा, गिरिधर परमेश्वरानन्द च सम्पादकौ (द्वितीयो भागः 2017)। वैयाकरण-सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी-सहिता)। दिल्लीः मोतिलाल बनारसीदास।
8. शर्मा, शिवदत्त, सम्पादकः (पुनर्मुद्रितसंस्करणम् 2014)। व्याकरणमहाभाष्यम् (भाष्यप्रदीपोद्द्योतसमुल्लसितम्)। दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान, द्वितीयं खण्डम्।
9. शर्मा, लक्ष्मी, सम्पादिका (द्वितीयो भागः 2017)। वैयाकरणसिद्धान्तकौमुदी (श्रीधरमुखल्लासिनी हिन्दीव्याख्यासहिता)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।


✦✦✦

# पाणिनीयव्याकरणे प्रकृतिवदनुकरणे ज्ञापकानामावश्यकता

-पल्लवी-मालिकः *

**शोधसारः**

संस्कृतशास्त्रे **स्वं रूपं शब्दस्याशब्दसंज्ञा** (1/1/68) इत्यनेन स्वरूपमेव संज्ञी। लोके उपाध्याये मृते तत्स्थाननिविष्टस्य शिष्यस्य अध्यापनादिः गुरुधर्मलाभो भवति। तथापि शास्त्रे आदेशे विहिते असति स्थाने तत्र स्थानिवद्व्यवहारार्थं **स्थानिवदादेशोनल्विधौ** (1/1/56) इति सूत्रं कृतम्। तद्वद् मूलप्रकृतेरनुकरणे यदुच्चारितं तत्रापि अनुकार्ये यद्विधीयते तदनुकरणेऽपि करणीयम्। अनुकरणमनुकार्यतुल्यं भवति। यद्यपि तद्विषये किमपि सूत्रं नास्ति तथापि पाणिनीयव्याकरणे सूत्रान् सम्यगनुशीलनेन निश्चियते। यथा **क्षियो दीर्घात्** (8/2/46) इत्यादयः सूत्रे प्रकृतिवदनुकरणेन कार्याभावे क्षियः इति निर्देशः अनुपपन्नः। क्षिधातौ **अचिश्नुधातु-भ्रुवां य्वोरियङुवङौ** (6/4/77) इत्यनेन विहितः इयङादेशः तदनुकरणे क्षिशब्दादावपि भवितुमर्हतीति भावः। अनुकरणे मूलप्रकृतिवद्सादृश्ये धात्वादिरपि अतिदिश्यते। पाणिनिना क्षियः इति निर्देशेन ज्ञायते अनुकरणेऽपि धात्वाद्यनुकार्यधर्मः अतिदिश्यते। एवमन्यत्रापि प्रकृतिवदनुकरणेन कार्यं भवति न वा। यदि न भवति तर्हि किमर्थं नेति विषये समाधानं करणीयम्। लोके उभयोर्मध्ये अभेदे सति शास्त्रे तत्करणं न वेति सन्देहा जाता। सूत्रे व्यवहारं दृष्ट्वा तज्ज्ञाप्यते। ज्ञापितत्वाद् परिभाषायाः करणाकरणयोः विमतं परिलक्षितम्। अस्मिन्सन्दर्भे तद्विषये आलोच्यते।

**कुटशब्दाः**

अनुकरणम्, अनुकार्यम्, आदेशः, धातुः, प्रकृतिवद्, प्रातिपदिकम्।

**शोधः**

संस्कृतशास्त्रे लृकारस्य प्रयोगम् अल्पमपि माहेश्वरसूत्रे तस्य पाठः दृश्यते।[1]

---

* शोधच्छात्रा, संस्कृतविभागः, सिधो-कानहो-विरसा विश्वविद्यालयः, पुरुलिया, पश्चिमवङ्गः।

1. ऋकारस्याल्पः प्रयोगस्ततोऽप्यस्याल्पतर इत्यर्थः। अल्पप्रयोगस्यापि कार्यार्थ उपदेशः कर्तव्यः...- ऋष्क् सूत्रस्य प्रदीपटीका।

कृप्धातोः **रेफस्य कृपो रो लः** (8/2/18) इत्यनेन लकारादेशे त्रिपादीत्वात् तस्यासिद्धत्वे समुदायभूतः लृकाराश्रितं अच्कार्यं ऋकारेणैव सिद्धत्वात् ऋलृक् इति सूत्रे लृकारोपदेशः नावश्यकः[1]। यद्यपि यदृच्छाप्रयोगाशक्तिजानुकरणप्लुतद्विर्वचनस्वरिता-दिषु कार्यसिद्ध्यर्थं लृकारोपदेशस्य प्रयोजनम् उक्तं भाष्यकारेण[2]। शब्दानां चतस्रः प्रवृत्तिः जातिगुणक्रिया- यदृच्छाशब्दाः। **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (1/2/45) इत्यनेन अव्युत्पन्नानां यदृच्छाशब्दानामुपलब्धिः जाता। यदृच्छया लृतकः इत्यभिप्रेत्य दध्यलृतकाय देहि, मध्वलृतकाय देहि इत्यादौ लृकारे परे अच्कार्यार्थं लृकारोपदेशः क्रियते।[3] अशक्त्या ब्राह्मण्या ऋतक इत्यस्य लृतक इत्युच्चारिते तदनु0करणेन 'ब्राह्मण्यलृतक इत्याह', 'कुमारय्लृतक इत्याह' इत्यादौ लृति यण्कार्यार्थं लृकारोपदेशस्य प्रयोजनम्। न च अशक्तिजः लृतकशब्दः शास्त्रसिद्धाभावादपशब्दः। ऋतकलृतकयोः अर्थभेदात् न ऋतकः लृतकशब्दस्य निर्वर्तकः इति[4]। अतः लृतकशब्दं न ऋतकस्य अपभ्रंशम्। यदा ह्यशक्त्या ऋतक इति प्रयोक्तव्ये ब्राह्मण्या लृतक इत्युच्चारणं तस्यानुकरणम्। अत्र अनुकार्यलृतकस्य अशक्तिजत्वात् अपशब्दत्वात् तदनुकरणः लृतकशब्दोऽपि अपशब्दः इति नाशङ्कनीया। अपशब्दपदार्थकशब्दो नापशब्दः भवति, यतस्तेन अपशब्दः इति शब्दोऽपि स्वयमपशब्दो भवतीति। तेन असाध्वर्थानां बोधकत्वेऽपि लृतकशब्दः न स्वयमपशब्दः। अतः अपशब्दलृतकशब्दपदार्थकत्वेऽपि तस्य साधुत्वात्तदर्थं उपदेशः कर्तव्यः। क्लृपू समर्थे इति धातुपठितलृकारः शास्त्रान्वितत्वात् न असाधुः। अतः तदनुकरणे साध्वलृकारमधीते, मध्वलृकारमधीते इत्यादौ संहिताकार्यार्थं लृकारोपदेशः कर्तव्यः। यद्यपि **कृपो रो लः** (8/2/18) इत्यनेन ऋकारैकादेशस्य रेफस्य लत्वे क्लृप्धातुः भवति। त्रिपादीत्वात् लत्वस्यासिद्धत्वात् ऋकाराश्रयेणैव अच्कार्याणि भविष्यतिन्ति। अतः लृकारोपदेशस्य प्रयोजनं नास्ति। यद्यपि क्लृपिस्थस्य लृकारस्य सन्ध्यादिकार्यार्थं लृकारोपदेशस्यानावश्यकता तथापि तदनुकरणे प्रयोगस्थलृकारे कार्यार्थं लृकारोपदेशः प्रयोजनः[5]। तदपि न कर्तव्यम्, यतः प्रकृतिवदनुकरणं भवति। तेन यथा क्लृपेर्लत्वस्यासिद्धत्वात् ऋकारेण लृकारस्याच्कार्यं सिद्ध्यति, तद्वदनुकरणस्यापि इत्यर्थः।

---

1. यद्यपि कृपो रो लः इत्यत्र रेफलकारयोः स्थान्यादेशभावस्तथापि तद्द्वारा ऋकारलृकारयोरपि स इति भावः- ऋलृक् सूत्रस्य उद्द्योतटीका।
2. लृकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थः-ऋलृक् सूत्रस्य वार्तिकम्।
3. शिष्टप्रयुक्तानामेवाव्युत्पत्तिपक्षोऽप्यस्तीति ज्ञापनाय 'अर्थवत्-' सूत्रोपादानम्। अनुकरण-शब्दानामव्युत्पन्नत्वात्तदर्थं च।-ऋलृक् सूत्रस्य प्रदीपटीका।
4. समाने चार्थे शास्त्रान्वितोऽशास्त्रान्वितस्य निवर्तको भवति। तद्यथा- देवदत्तशब्दो देवदिण्णशब्दं निवर्तयति, न गाव्यादीन्।-ऋलृक् सूत्रस्य महाभाष्यम्।
5. प्रयोगस्थस्येदमनुकरणम्। प्रयोगे च 'पूर्वत्रासिद्धम्' इति नास्ति- इति भावः।। -ऋलृक् सूत्रस्य प्रदीपटीका।

प्रकृतिवदनुकरणेन अनुकरणं प्रकृतिवदनुकार्यतुल्यञ्च भवति। तेन अनुकार्ये यत्कार्यं भवति अनुकरणेऽपि तद्भवति। अत्र अनुकार्यऋतकशब्दः, अनुकरणञ्च लृतकशब्दः। तेन अनुकार्यऋकारे परे तस्य अच्त्वात् यथा यण्कार्यं भवति, तथा अनुकरणलृतकशब्देऽपि **इको यणचि** (6/1/77) इत्यनेन यणादेशसिद्धे लृकारोपदेशः मास्तु इति भावः। अस्मिन्विषये ज्ञापकं तु **क्षियो दीर्घात्** (8/2/46) इति सूत्रे क्षियः इति निर्देशः[1]। सूत्रे क्षिशब्दः क्षीधातोः अनुकरणम्। अनुकार्यधर्मम् अनुकरणे असत्त्वे सति अनुकरणशब्दस्य क्रियावाचित्वाभावेन धातुत्वाभावात् इयङादेशस्याप्राप्तिः स्यात्। यतः **अचिश्नुधातुभ्रुवांय्वोरियङुवङौ** (6/4/77) इत्यनेन इकारान्तधातोः इयङादेशः भवति। परन्तु पाणिनिना क्षियः इति निर्देशेन ज्ञायते अनुकरणेऽपि धात्वाद्यनुकार्यधर्मः अतिदिश्यते।

एवमन्यत्रापि दरीदृश्यते। पचन्तु पचन्तु इति द्विवारं केनचिदुक्ते तस्यानुकरणे द्विः पचन्तु इति भवति। द्विः पचन्त्वित्याह इत्यनुकरणे पचन्तुशब्दे तिङन्तत्वं स्वीकृत्य **तिङ्ङतिङः** (8/1/28) इत्यनेन निघातस्वरः। अत्र अनुकरणे क्रियासाधनाद्यवाचकत्वात् तिङन्ताभावे **तिङ्ङतिङः** (8/1/28) इत्यनेन अतिङन्तात् परं तिङन्तमनुदात्तमित्येवं निघातस्वरं न प्राप्नोति। प्रकृतिवदनुकरणं भवतीति वचनस्वीकृते तु अनुकार्ये पचन्तु इति तिङन्ते परे यदेव निघातस्वरः भवति अनुकरणे पचन्तु शब्देऽपि स एव स्वरं प्राप्नोतीति फलितार्थः। एवं 'अग्नी इत्याह' इत्यनुकरणस्य अग्नीशब्दस्य ईकारं द्विवचनं स्वीकृत्य **ईदूदेद्द्विवचनं प्रगृह्यम्** (1/1/11) इत्यनेन प्रगृह्यसंज्ञा स्यात्। अत्र अनुकरणे पचन्तु तथा अग्नि शब्दे अनुकार्यतुल्यं प्रकृतिवद्वा तिङन्तत्वाभावे द्विवचनत्वाभावे तु पचन्तु इत्यत्र निघातस्वराभावः अग्नी इत्यत्र प्रगृह्यसंज्ञाभावः स्यात्। अतः अनुकरणं मूलप्रकृतिसदृशः एव अतिदेशनीयः[2]।

प्रकृतिवदनुकरणं भवतीति वचनेन अनुकरणे क्षिशब्दे धातुत्वात् इयङादेशे तत्र प्रातिपदिकत्वनिबन्धनसुप्विभक्तेः अप्राप्तिः, धातौ तद्दुर्लभत्वात्। क्षिशब्दस्य धातुत्वात् प्रातिपदिकत्वाभावात् पञ्चमीविभक्तेः अप्रयोगः स्यात्। परन्तु विभक्तियोजनं कृत्वा निर्देशेन ज्ञायते एषा परिभाषा अनित्या। कार्यार्थं कदाचिदनुकरणः प्रकृतिवदिष्यते, कदाचित् न। अत्र इयङादेशार्थम् अनुकार्यवृत्तिधात्वधर्मः अनुकरणे अतिदिश्यते, परन्तु प्रातिपदिकसंज्ञाकाले धातुत्वं न तिष्ठति। तेन क्षियः इत्यत्र प्रातिपदिकत्वात् सुप्विभक्तिः युज्यते। यद्यपि अधातुरिति वचनेन प्रातिपदिकसंज्ञाप्रतिषेधः स्यात्।

---

1. 'क्षियः' (सू. 6/4/59) इत्यादावियङ्निर्देशात्। -ज्ञापकसंग्रहः, पृ.2।
2. एतच्च क्रियासाधनाद्यनभिधानात्तिङन्तं न भवति। एवं 'अग्नी' इत्यनुकरणं ह्यर्थानभिधानान्न द्विवचनान्तम्।। -ऋलृक् सूत्रस्य प्रदीपटीका।

अधातुः इत्यत्र पर्युदासनञः, न तु प्रसज्यप्रतिषेधः। तेन आतिदेशिकस्य धातोरन्यत्वात्स्वाश्रया प्रातिपदिकसंज्ञा प्रवर्तते। आतिदेशिको धातोः इयङादेशः विधीयमानत्वात् तदेव भवतीति पदमञ्जरीकारमतम्। अपि च प्रकृतिवदिति वत्करणेन अनुकार्येणार्थेन अर्थवत्तात् प्रातिपदिकसंज्ञा भविष्यतीति न्यासकारमतम्[1]।

**क्षियो दीर्घात्** (8/2/46) इत्यत्र ह्रस्वान्तस्य क्षिधातोः अनुकरणम्। **क्षियः** (6/4/59), **निष्ठायामण्यदर्थे** (6/4/60) इति सूत्रे ह्रस्वान्तस्य दीर्घविहिते तस्मात् परं नत्वं विधीयते। ह्रस्वान्तस्य च दीर्घत्वं विधेयम् तत्पश्चात् **क्षियो दीर्घात्** (8/2/46) इति सूत्रप्रवृत्तिवशादत्र तस्यैव अनुकरणम्। यतः यथाभूतस्य दीर्घत्वं विधेयं तथाभूतमेव अनुकर्तुं युक्तम्। ह्रस्वान्तस्य दीर्घत्वं विधेयत्वेन तस्यैव इदमनुकरणमिति विज्ञायते, न तु दीर्घान्तस्य। न च ह्रस्वान्तस्य धात्वनुकरणस्य इयङा निर्देशेन **विपराभ्यां जेः** (1/3/19), **विभाषा चेः** (7/3/58) इत्यादावपि इयङापत्तिः स्यात्। अत्र अनुकार्यावस्थितं धातुत्वं क्रियावाचित्वलक्षणमविवक्षितत्वादत्र रूपसामान्यस्यानुकरणम्। साधारणरूपस्यानुकरणाद् विशेषनिबन्धनकार्यस्याभावः। तस्मादर्थशून्यं रूपानुकरणात् धातुत्वाभावाच्च इयङादेशो न भवतीति काशिकाकारमतम्[2]। अतः सर्वत्रानुकरणं न प्रकृतिवद्, यत्र विशेषधर्मेण अनुकरणं कृतं तत्रैव प्रकृतिवद् कार्यम् अनुकरणेऽपि प्राप्नोति, न तु तद्व्यतिरिक्ते। तेनापि वचनस्य अनित्यत्वं सूचितम्।

एवं **पराजेरसोढः** (1/4/26) इति सूत्रे जिधातोः अनुकरणम्। परापूर्वो जिः इति उत्तरपदलोपी समासः। अधातुः इत्यनेन धातौ प्रातिपदिकसंज्ञाप्रतिषेधात् असुबन्तत्वात् परस्परं समासो न प्राप्नोति। यतः प्रकृतिवदनुकरणं भवति इत्यनेन जिशब्दे धातुत्वं नास्तीति न वक्तव्यम्। अतः अधातु इत्यत्र न प्रसज्यप्रतिषेधः, अपि तु पर्युदासः। पर्युदासात् साक्षात् धातुत्वाभावात् धातुसदृशानुकरणात् न प्रातिपदिकसंज्ञाभावः। प्रातिपदिकत्वात् सुप्विभक्तिः युज्यते। अत्र पराजिः इति समुदायस्य अनुकरणम्। तेन अध्ययनात् पराजयते, अध्ययनात् पराजितमित्यत्र समुदायेऽपि पञ्चमी विहिता[3]।

अस्मिन्विषये हरदत्तकृतपदमञ्जरीवासुदेवकृतबालमनोरमयोः विरोधं स्पष्टम्। धातावपि सुप्विभक्तिना प्रयोगात् प्रकृतिवदनुकरणं भवति इति परिभाषायाः अनित्यत्वं प्रकाशितम्। इयङादेशार्थं प्रकृतिवद् अनुकरणेऽपि निमित्तं धातुत्वमाश्रितम्, परन्तु

---

1. क्षियो दीर्घात् (8/2/46) सूत्रस्य न्यासटीका।
2. ह्रस्वस्यापि हि धात्वनुकरणस्य इह इयङा निर्देशः। क्षियः 'निष्ठायामण्यदर्थे' इत्यत्र दीर्घग्रहणं क्रियते। 'विपराभ्यां जेः' इत्येवमादौ तु धातुत्वमनुकार्यगतं सदप्यविवक्षितत्वात् जिरूपसामान्यानुकरणं द्रष्टव्यम्।।– क्षियो दीर्घात् (8/2/46) सूत्रस्य काशिका।
3. पराजेरसोढः (1/4/26) सूत्रस्य पदमञ्जरीटीका।

वचनस्यानित्यत्वात् धात्वधर्मः निवृत्तौ प्रातिपदिकत्वात् सुप्विभक्तिः योजितुं शक्नोतीति बालमनोरमाकारस्याशयः। परन्तु वचनस्यानित्यतामकृत्वा प्रातिपदिकसंज्ञायाम् अधातुपदे पर्युदासस्वीकारेण अनुकरणेऽपि धातुत्वात् यथा इयङादेशः सम्भवति तथा अनुकरणस्य धातुसदृशात् सुप्विभक्तिः अपि योजनीयमिति पदमञ्जरीकारमतम्। एतयोर्मध्ये ज्ञापकेन सिद्धं वचनं सर्वत्राप्रयुक्तत्वात् तस्यानित्यत्वस्वीकारे न कोऽपि हानिः। परन्तु सुप्विभक्त्यर्थं पर्युदासस्वीकारेण इयङादेशकालेऽपि साक्षात् धातुत्वाभावात् इयङादेशाप्रसङ्गः।

अपि च **अवाद् ग्रः** (1/3/51) इति सूत्रेण अवपूर्वकं तुदादौ पठितस्य गृधातोः आत्मनेपदं विधीयते। अत्र गृधातोः अनुकरणेन सूत्रे ग्रः इत्यत्र पञ्चमीविभक्तौ पठ्यते। अत्रापि प्रकृतिवदनुकरणं भवति इति वचनात् धात्वनुकरणत्वात् **ॠृलृत इद्धातोः** (7/1/100) इत्यनेन धातोः लृकारस्य इत्वे रपरत्वे गिरः इत्येवं पठनीयम्। परन्तु अनुकार्यधर्मं अनुकरणे नातिदेशात् प्रकृतिवदनुकरणं भवति इत्यस्य अनित्यत्वं सूचितम्। सूत्रस्थ ग्रः इति प्रयोगं तस्यानित्यत्वे प्रमाणमिति बालमनोरमाकारमतम्[1]। गृधातोः ग्रः इति रूपानुकरणात् धातुनिमित्तं इत्वं न भवतीति पदमञ्जरीकारमतम्।

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेऽडितान्तेषु ततोऽन्यत्रापि दृश्यते इति वार्तिकवचने उभशब्दः उभयः शब्दस्यैकादेशानुकरणम्। संख्यावाचकात् उभशब्दात् **उभादुदात्तो नित्यम्** (5/2/44) इत्यनेन नित्यम् अयच् आदेशः विहितः। परन्तु अत्र अयच् आदेशं विनापि निर्देशेन ज्ञायते उभशब्दः न संख्यावाचकम्[2]। उभशब्देनात्र असंख्यावाची उभयशब्दः लक्षणया अवगन्तव्यमिति मनोरमाकारस्याशयः। तेन तस्प्रत्ययान्तयोः उभसर्वयोः प्रयोगे द्वितीयाविभक्तिः भवति। अपरं धिग् इत्यत्र अविभक्तिकः निर्देशः क्रियते इति केचित् वदन्ति। परन्तु पदत्वाभावात् विभक्तिरहितनिर्देशः न प्रयुज्यते। अपि च पदत्वाभावात् जशत्वकार्यमपि न भवति। तस्मात् धिग् इत्यत्र विभक्त्यन्तमेव स्वीकरणीयम्। तेन प्रकृतिवदनुकरणं भवति इत्यनेन अनुकार्यस्याव्ययत्वात् अनुकरणे तद्धर्मातिदेशात् **अव्ययादाप्सुपः** (2/4/82) इत्यनेन सुप्विभक्तेः लोपः स्यात्[3]। लोपेऽपि प्रत्ययलक्षणकार्यात् पदनिमित्तं जशत्वं भवितुं शक्नोति। न च अत्र धिग् इति गकारान्तः अव्ययः। धकित् इत्यत्र **कस्य च दः** (5/3/72) इत्यनेन अकच्प्रत्ययान्तसंयोगे ककारस्य दकारः विधानेन धिक् इति

---

1. प्रकृतिवदुकरणमित्यस्यानित्यत्वाद् 'घ्त इद्धातोः' इति न भवति।– अवाद् ग्रः (1/3/51) सूत्रस्य बालमनोरमा।
2. अत्र उभशब्दादयच् न कृतः, अनुकरणशब्दत्वेनासंख्यावाचित्वात्। –उपान्वध्याङ्वसः (1/4/48) सूत्रस्य तत्त्वबोधिनी।
3. 'प्रकृतिवदनुकरणम्' इत्यव्ययत्वात्सुपो लुक्। –उपान्वध्याङ्वसः (1/4/48) सूत्रस्य बालमनोरमा।

ककारान्तः अव्ययः विज्ञायते। अतः धिक् इत्यत्र अव्ययत्वारोपे सुपः लोपे जश्त्वे च धिग् इति निर्देशः उपपन्नः। प्रकृतिवदनुकरणात् अनुकरणे अनुकार्यधर्मारोपात् अव्ययत्वात् सुब्लुकि तदुद्दिश्य अविभक्तिकः निर्देशः इति कथनमुचितम्[1]।

**इगुपधज्ञाप्रीकिरः कः** (3/1/135) इति सूत्रेण इगुपधधातुभ्यो ज्ञाधातुभ्यः प्रीधातुभ्यः कृधातुभ्यः कप्रत्ययो भवति। किरः इत्यत्र सुप्प्रत्ययेन व्यवहृतम्। विक्षेपार्थकस्य कृधातोः अनुकरणम्। प्रकृतिवदनुकरणं भवति इत्यनेन कृशब्दानुकरणेऽपि धात्वधर्मं प्रसज्यते[2]। तेन **ऋत इद्धातोः** (7/1/100) इत्यनेन कृधातोः ऋकारस्य इत्त्वे रपरत्वे च किरिति रूपं भवति। परिभाषया यथा अनुकार्यस्य धातुत्वं कृशब्दे अनुकरणत्वात् तन्निमित्तं इत्त्वं भवति, तथा तस्यानित्यत्वात् धातुत्वमपगते सुप्प्रत्ययनिमित्तात् प्रातिपदिकत्वात् किरित्यत्र प्रथमायाः एकवचने किरः इति सिद्ध्यति। किरः इति प्रयोगेन परिभाषायाः ज्ञापकत्वं स्वीकृतम्।

**वोताप्योः** (3/3/141) इत्यधिकारसूत्रे वा आ उताप्योः इति छेदः। अत्र आङिति मर्यादार्थे, न तु अभिविध्यर्थे। यतः उताप्योः **समर्थयोर्लिङ्** (3/3/152) इति सूत्रेण नित्यं लिङ् इष्यते, न तु वैकल्पिकम् अनिष्टापत्तिभावात्। तेन **उताप्योः समर्थयोर्लिङ्** (3/3/152) इत्यतः प्राग् यानि सूत्राणि विधीयन्ते सर्वत्रैव भूते लिङ्निमित्ते क्रियातिपत्तौ लृङ् वा भवतीत्यस्य अधिकारः बोध्यम्। उताप्योः इत्यत्र अवधित्वेन सप्तमी विधीयते। आ उताप्योः इत्यत्र पूर्वं परेण आद्गुणः इत्यनेन गुणे कृते ओताप्योः इति जाते वा ओताप्योः इत्यत्र **वृद्धिरेचि** (6/1/88) इत्यनेन वृद्ध्येकादेशे प्राप्ते तद्बाधित्वो **ओमाङोश्च** (6/1/95) इत्यनेन पररूपैकादेशे वोताप्योः इति रूपं भवति। अत्र **पञ्चम्यपाङ्परिभिः** (2/3/10) इत्यनेन आङो योगे पञ्चमी विधीयते। उताप्योः इत्यत्रैव पञ्चमी एव विहितव्या, न तु सप्तमी। परन्तु तद्विधानेन ज्ञायते प्रकृतिवदनुकरणं भवति इति परिभाषया अधिकारमवधित्वं च बोधनार्थं प्रकृतिवदनुकरणेन सविभक्तिकः निर्देशः क्रियते। उताप्योः इत्यत्र प्रत्ययान्तत्वात् प्रातिपदिकसंज्ञाभावः, अप्रत्ययः इति प्रतिषेधात्। तेन आङ्योगेऽपि पुनः पञ्चमी न विहिता। सप्तम्यन्तपदत्वात् आङो योगे न पञ्चमी भवति। पदस्य प्रातिपदिकसंज्ञा निषेधार्थम् अप्रत्ययः इत्यस्य योजनम्[3]।

1. यदि तु धिगित्यविभक्तिको निर्देश इत्येतावानेव प्राचां ग्रन्थस्तदा सम्यगेव। अव्ययत्वात्सुपो लुक्यविभक्तिको निर्देश इति वक्तुं शक्यत्वात्। -उपान्वध्याङ्वसः (1/4/48) सूत्रस्य तत्त्वबोधिनी।
2. कृशब्दस्य धात्वनुकरणत्वेन प्रकृतिवदनुकरणमित्यदेशाद् 'ऋत इद्धातोः' इति इत्वम्।- इगुपधज्ञाप्रीकिरः कः (3/1/135) सूत्रस्य तत्त्वबोधिनी।
3. अत्रोताप्योः समर्थयोरिति यत्सप्तम्यन्तं तदवधित्वेनोपादीयते, तत्र प्रकृतिवदनुकरणं भवतीत्यनुकरणस्याप्यप्रत्यय इति प्रतिषेधेनाप्रतिपदिकत्वादाङोऽपि योगे पञ्चम्यभावः।- वोताप्योः (3/3/141) सूत्रस्य पदमञ्जरी।

**विभाषाऽग्रेप्रथमपूर्वेषु** (3/4/24) इति सूत्रे विभाषा, अग्रेप्रथमपूर्वेषु इति पदद्वयं वर्तते। द्वितीये समासे अग्रे इत्यव्ययम्। प्रकृतिवदनुकरणम् इति परिभाषया अव्ययस्यानुकरणे अग्रशब्दः विहितव्यः। परन्तु परिभाषायाः अनित्यत्वात् वैकल्पिकत्वाच्च विभक्तेर्लुङ् न कृतः। एवं समुदायगुणीभूतस्यैकदेशस्य पृथक्कृत्यानुकरणं भवति, यथा अस्य वाम इति वाक्यखण्डस्य अस्यवामीयम् इत्युक्ते शब्दस्वरूपस्यानुकरणे विभक्तेर्लुङ् न क्रियते[1]। अग्रे इत्यत्रापि सप्तम्यन्तस्यानुकरणत्वात् विभक्तर्लुगभावः। अस्य समाधानावसरे बालमनोरमाकारेण परिभाषायाः अनित्यत्वं नोक्तम्, अपि तु अग्रे इत्यस्य एदन्तं निपातनात्।

**तिर्यच्यपवर्गे** (3/4/60) इति सूत्रेण तिर्यक्शब्दे उपपदे कृधातोः क्त्वाणमुलौ स्तः अपवर्गे समाप्तौ गम्यमाने। यथा तिर्यक्कृत्य गतः, तिर्यक्कृत्वा गतः। तिरस् अञ्च् क्विन् इत्यत्र क्विन्प्रत्ययस्य सम्पूर्णलोपेऽपि तन्निमित्ते तिरस् अञ्च् इत्यस्य प्रातिपदिकसंज्ञायां अनिदितां हलः **उपधायाः क्ङिति** (6/4/24) इत्यनेन अञ्च् इत्यस्य ञकारस्य लोपे तिरस् अच् इति प्रातिपदिकं भवति। सप्तम्येकवचने तिरस् अच् ङि इत्यत्र अनुबन्धलोपे अजादिविभक्तौ **यचि भम्** (1/4/18) इत्यनेन अङ्गस्य भसंज्ञायां **अचः** (6/4/138) इत्यनेन लुप्तनकारस्य भसंज्ञकस्य अञ्चतेः अकारस्य लोपे श्चुत्वे तिरस् च् इ. तिरश्चि इति रूपं सिद्ध्यति। तर्हि सूत्रे तिर्यचि इति निर्देशः अयुक्तः। प्रकृतिवदनुकरणेन भसंज्ञायां सत्याम् अचः इत्यनेन अकारलोपे तिरश्चि इत्येव भवितव्यम्। अत्र तिर्यक्शब्दस्य रूपानुकरणम्, न तु लौकिकार्थवत्त्वस्य। अञ्चेः स्वार्थे वर्तमाने अल्लोपो भविष्यति। अत्र तिरश्चि इति प्रयोगे यादृशं रूपानुकरणमिष्टं तादृशं न प्रतीयते। तेनात्र प्रकृतिवदनुकरणे कार्यं न भविष्यतीति पदमञ्जरीकारमतम्। सर्वदा अनुकरणे प्रकृतिवद् कार्ये अनुक्रियमाणस्य रूपविनाशप्रसङ्गः। यथा एतदोऽश् (5/3/5), **अदसो मात्** (1/1/12) इत्यत्र एतदः, अदसः इति सर्वनामे प्रकृतिवद् कार्ये सति षष्ठ्येकवचने एतस्य, अमुष्य इति रूपं स्यात्[2]। पुनः **गवाश्वप्रभृतीनि च** (2/4/11) इति सूत्रे गोशब्दस्य प्रकृतिवदनुकरणे अवादेशः, पटिति करोति इत्यादौ **अव्यक्तानुकरणस्यात इतौ** (6/1/98) इत्यनेन इति परे अत् इत्यस्य पररूपैकादेशे अनुकरणे प्रकृतिवद् कार्ये अनुक्रियमाणस्य रूपविनाशेऽपि अनुकार्यस्य प्रतिपादकं भवति। अतः क्वचिदनुकरणं प्रकृतिवद्भवति, क्वचिन्नेति पदमञ्जरीकारमतम्। शब्दरूपमात्रस्य अर्थपदार्थस्य चेति द्विविधमनुकरणम्। अत्र

---

1. 'प्रकृतिवदनुकरणम्' इत्यस्य वैकल्पिकत्वाद्विभक्तेर्लुङ् न कृतः अस्यवामीयमितिवत्- विभाषाऽग्रेप्रथमपूर्वेषु (3/4/24) सूत्रस्य तत्त्वबोधिनी।
2. 'तिर्यचि' इति शब्दानुकरणम्। न च प्रकृतिवदनुकरणेन भवितव्यम्; अनुक्रियमाणरूपविनाशप्रसङ्गात्- 'एतदोऽश', 'अदसो मात्' इति।। -तिर्यच्यपवर्गे (3/4/60) सूत्रस्य काशिका।

शब्दपदार्थको तिर्यक्छब्दस्यानुकरणम्, न तु स एव। तेन शब्दान्तरत्वादकारलोपो न भवति। अत्रापि प्रकृतिवदनुकरणे कार्ये कृताकारलोपे यादृशः तिर्यक्शब्दः इष्टः, तादृशं न प्रतीयते। अतः प्रकृतिवदनुकरणं तत्रैव भवति यत्र अर्थपदार्थस्यानुकरणं भवति। अर्थपदार्थस्यानुकरणे प्रकृतिवद् कार्यं भवति। तिर्यचि इत्यत्रापि शब्दपदार्थ-कस्यानुकरणे प्रकृतिवदनुकरणेन कार्यं न भवतीति न्यासकारमतम्। परिभाषायाः किमपि विचारमकृत्वा सौत्रनिर्देशात् तिर्यचि इत्येवं भवतीति भाष्यकारेणोक्तम्। अतः क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः इत्येवं व्यवहाराद् परिभाषायाः अनित्यतां ज्ञापयति।

**अन्वच्यानुलोम्ये** (3/4/64) इति सूत्रेण अन्वक्शब्दे उपपदे भूधातोः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने। यथा- अन्वग्भूय आस्ते, अन्वग्भूत्वा आस्ते। अत्र अनुपूर्वके अञ्चधातोः क्विन्प्रत्यये धातोनकारलोपे प्रत्ययलोपे च अनु अच् इति स्थिते सप्तम्येकवचने **अचः** (6/4/138) इत्यनेन अकारलोपे **चौ** (6/3/138) इत्यनेन उकारस्य दीर्घादेशे अनूचीति रूपं निर्देष्टव्यम्। **द्युप्रागपागुदक्प्रतीचो यत्** (4/2/101) इति सूत्रे प्रतीचः इतिवत् प्रयोगमुचितम्। न चात्र लोके अर्थप्रसिद्धत्वात् शास्त्रे अनुकरणे अनुकार्यवद् प्रकृतिवद्वा कार्याभावः इति वक्तव्यम्। तथा सति **क्षियो दीर्घात्** (8/2/46), **द्युप्रागपागुदक्प्रतीचो यत्** (4/2/101) इत्यादौ इयङादेशादयः न सिद्ध्यन्ति। तेन प्रकृतिवदनुकरणमित्यस्य वैकल्पिकत्वात् सर्वत्र तस्या प्रयोगो न भवति। तेन अन्वचि, तिर्यचि इत्यादौ न दोषः[1]। अस्मिन् पक्षे परिभाषायाः प्रयोगाभावे अनुकरणं न अनुकार्यतुल्यो। अनुकरणं न मूलशब्दः। द्वयोः भिन्नत्वात् प्रकृतिवद् कार्यस्यापि अप्राप्तिः।

**ङ्याप्प्रातिपदिकात्** (4/1/1) इति सूत्रे ङीश्च आप्च प्रातिपदिकञ्चेति विग्रहे समाहारद्वन्द्वे ङ्याप्प्रातिपदिकम् इति भवति। इतरेतरयोगनिवृत्त्यर्थं समासान्तर-निवृत्त्यर्थञ्च समाहारनिर्देशः। अप्रत्ययः इत्यनेन प्रत्यये प्रातिपदिकसंज्ञाप्रतिषेधात् ङीश्च इत्यत्र कथं विभक्तिरुत्पत्तिः। अत्र ङीति न स्वयं प्रत्ययः, अपि तु प्रत्ययस्यानुकरणत्वात् अप्रत्ययः इति निषेधस्याप्रवृत्तिः इति वक्तुं न शक्यते। प्रकृतिवदनुकरणं भवति इत्यनेन अनुकरणं प्रकृतिवद्भावात् प्रत्ययत्वादप्रत्ययः इति प्रतिषेधे ङी इत्यत्र प्रातिपदिकाभावात् विभक्तिः न स्यात्। वस्तुतः अर्थमात्रं शब्दमात्रञ्चेति अनुकरणं द्विविधः। अर्थवदनुकरणे प्रकृतिवद्भावः भवति। यतः **परिव्यवेभ्यः क्रियः** (1/3/18) इत्यत्र कृधात्वनुकरणात् इयङादेशः अपरं **विपराभ्यां जेः** (1/3/19) इत्यत्र इयङादेशाभावात् अनुकरणस्य द्वैविध्यं ज्ञायते। अत्रापि शब्दमात्रस्यानु-

---

1. वस्तुतस्तु 'प्रकृतिवदनुकरण'मित्यस्य वैकल्पिकत्वादन्वचीत्यादिनिर्देशे तु न दोषः। वैकल्पिकत्वं च 'यत्तदेतेभ्यः' इति सूत्रे त्यदाद्यत्वस्य करणादेकशेषाऽभावदर्शनाच्च निर्णीयत इति प्रागेव प्रपञ्चितम्। -अन्वच्यानुलोम्ये (3/4/64) सूत्रस्य तत्त्वबोधिनी।

करणत्वात् प्रकृतिवदतिदेशः न भवति। तेनाप्रत्ययत्वात् प्रातिपदिकसंज्ञाप्रतिषेधः न स्यात्। तेन प्रातिपदिकात् विभक्तिरुत्पत्तौ ङीश्च इत्येवं भवति, न तु ङीमात्रम्। न च व्यपदेशिवद्भावेन ङ्यन्तात् **हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्** (6/1/68) इत्यनेन विसर्गस्य लोपप्राप्तिः। यतः व्यपदेशिवद्भावोऽप्रातिपदिकेन[1] इति परिभाषया प्रातिपदिके व्यपदेशिवद्भावो निषिद्ध्यते। अत्र **पूर्वादिनिः** (5/2/86), **सपूर्वाच्च** (5/2/87) इति पृथक्सूत्रकरणं ज्ञापकम्। पूर्वात्सपूर्वादिनि इत्येकसूत्रकरणेनैव व्यपदेशिवद्भावाश्रयणेन केवलपूर्वशब्दादपि प्रत्ययविधानं कर्तुं शक्नोति। **पूर्वादिनि** (5/2/86) इत्यस्यावश्यकता नास्ति। तथापि आचार्येण पृथग्योगकरणात् ज्ञायते प्रातिपदिकग्रहणे व्यपदेशिवद्भावो न स्वीक्रियते[2]। तेन ङीत्यत्र प्रातिपदिकात् विभक्त्यलोपः। प्रत्ययविधौ एव प्रातिपदिके व्यपदेशिवद्भावप्रतिषेधः प्रवर्तितत्वात् सुलोपशास्त्रे सः अप्रयुक्तः। तेनात्र प्रातिपदिकेऽपि व्यपदेशिवद्भावेन सुलोपे ङी चेति रूपं भवति, सामान्येन परिभाषाप्रवृत्तिमाश्रित्य प्रातिपदिकत्वात् व्यपदेशिवद्भावाप्राप्तौ सुलोपाभावे ङीश्च इत्येवं भवितुमर्हतीति न्यासकारमतम्[3]। प्रयोगे गौरीकुमारीतिवत् अत्रानुकृता ङीत्यत्रैव लुप्तविभक्तिकः निर्देशः इति केचिदाहुः। **न ङिसम्बुद्ध्योः** (8/2/8) इति ज्ञापकात् प्रत्ययलक्षणमाश्रित्य अप्रत्ययः इत्यनेन प्रातिपदिकसंज्ञा न प्रतिषिध्यते। तेनात्रानुकरणे अर्थवत्त्वेन प्रातिपदिकत्वात् पुनः विभक्तिरुत्पत्तेः शङ्का स्यात्। तस्मान् ङीश्च इत्येवं भवति। नैतदस्ति, नलोपविषये एतज्ज्ञापकम्। तेनात्र प्रत्ययलक्षणमाश्रित्य अप्रत्ययः इत्यनेन प्रातिपदिकसंज्ञायाः प्रतिषिद्धत्वात् पुनः विभक्तिरुत्पत्तिः न भवति।

**सर्वपुरुषाभ्यां णढञौ** (5/1/10) इति सूत्रेण हितार्थे सर्वपुरुषाभ्यां णढञौ प्रत्ययौ भवतः। तेन सर्वेभ्यो हितम् सार्वम्। परन्तु सर्वाण्णस्य वा वचनम् इति वार्तिकेन सर्वशब्दात् केवलं विकल्पेन णप्रत्ययः भवति, न नित्यम्। प्रकृतसूत्रेण नित्ये विहिते वार्तिकेन वैकल्पिकत्वं विधीयते। तेन पक्षे छप्रत्यये सर्वेषां हितम् सर्वीयम्। अत्र सर्वशब्दस्य सर्वनामत्वात् सर्वस्माद् इत्येवं कथनमुचितम्। प्रकृतिवदनुकरणेन सर्वनामवद् व्यवहारमुचितम्। परन्तु शब्दमात्रस्यानुकरणत्वान्न प्रकृतिवदतिदेशः[4]। सर्वनामानां अन्वर्थसंज्ञासिद्धाद् अर्थाश्रितानुकरणाभावाद्

---

1. परिभाषेन्दुशेखरः, शास्त्रत्वसम्पादकप्रकरणम्, 32
2. पूर्वात्सपूर्वादिनिरित्येकयोगे एव कर्त्तव्ये पृथग्योगकरणमस्या ज्ञापकम्। –परिभाषेन्दुशेखरः, शास्त्रत्वसम्पादकप्रकरणम्, 32
3. अतः सुलोपेन भवितव्यम्– ङी चेति। सामान्येन परिभाषाप्रवृत्तिमाश्रित्य ङीश्चेति विग्रहः।– ङ्याप्प्रातिपदिकात् (4/1/1) सूत्रस्य न्यासटीका।
4. स्वरूपपरत्वान्न सर्वनामकार्यम्।– सर्वपुरुषाभ्यां णढञौ (5/1/10) सूत्रस्य बालमनोरमा।

सर्वनामकार्याभावः[1]। अपि च अनुकरणशब्दः मूलशब्दाद् भिन्नत्वात् सर्वनाम-कार्याभावः[2]।

यत्र शब्दानुकरणत्वाद् प्रकृतिवद् कार्याभावः उच्यते, तत्रानुकरणं प्रकृतिवदपि स्वरूपपरत्वात् तन्निमित्तं कार्याभावः। अपरं तु केवलं अनुकरणत्वात् कार्याभावः इत्युक्ते तत्रानुकरणं न प्रकृतिवद्। मूलप्रकृत्यनुकरणोर्मध्ये भेदः अस्ति। परन्तु प्रथमे मते तयोर्मध्ये भेदः नास्ति। अनुकरणं तत्र प्रकृतिवद् शब्दानुकरणम्। तस्माद् कार्याभावः। परमते उभयोर्भिन्नत्वात् कार्याभावः इति उभयोर्मध्ये सूक्ष्मभेदः।

**मतौ छः सूक्तसाम्नोः** (5/2/59) इति सूत्रेण मत्वर्थे प्रातिपदिकात् छप्रत्ययो भवति सूक्तसाम्नोः अभिधेये। तेन अच्छावाकशब्दोऽस्मिन्निति अच्छावाकीयं सूक्तम्, अस्यवाम इत्यस्मिन्नस्तीति अस्यवामीयम्। अत्र षष्ठीविभक्तेः दर्शनात् पदसमुदायोऽयम्। पदसमुदायात्मकस्य समासस्यैव प्रातिपदिकसंज्ञा सिद्ध्यतीत्यत्र समासग्रहणं नियमार्थम्। तेन अस्यवामशब्दस्य प्रातिपदिकत्वाभावात् प्रत्ययो न प्राप्नोति। अत्र अनुकरणस्वरूपं न विवक्षितम्, अपि तु अनुकार्यस्वरूपम्। गवादौ यथा सास्नादिमदाकृतिमर्थे मतुप्प्रत्यये गोमान्, वृक्षवानिति पदं भवति। तथैव अनुकरणशब्दाः समर्थप्रथमान्ताः स्वेनानुकार्य-वदित्यर्थे छप्रत्ययो भवति[3]। अनुकार्यशब्दाः पदसमुदायः, न तु अनुकरणशब्दाः। द्वयोः रूपभेदाभावादपि अर्थभेदोऽस्ति। अनुकार्यस्य बाह्यार्थः, अनुकरणस्य तु तदेवानुकार्यम्। तेन अस्यवामीयमित्यत्र विभक्त्यर्थप्रतिपादनाभावात् सुप्त्वाभावात् षष्ठ्याः लुग् न भवति। अत्र प्रकृतिवद् परिभाषायाः अनित्यत्वमाश्रित्य सुबलुकः[4]। अत्र अनेकपदत्वं नास्ति यतः अस्य वामस्य इति वेदे यत्पठितं तदेकदेशस्य अस्यवामशब्दस्य प्रतिपादकः भवति छप्रत्ययप्रकृतिरस्यवामशब्दः। प्रतिपादकत्वादर्थवत्त्वे सति पदसमुदायत्वाभावात् प्रातिपदिकत्वात् छप्रत्यये अस्यवामीयमिति रूपं भवतीति पदमञ्जरीकारमतम्। अनुकरणशब्दाः स्वरूपमात्रप्रधानत्वादर्थवत्त्वे प्रत्ययकार्यं सिद्ध्यति। अस्यवामशब्दस्यानुकरणात् वाक्यत्वं न स्वीकरणीयम्[5]।

---

1. 'सर्वनामानि' इत्यन्वर्थसंज्ञाविज्ञानात् 'प्रकृतिवदनुकरणम्' इत्यपि सर्वनामत्वं न भवति; अनाश्रितार्थस्य शब्दरूपस्यानुकरणात्।– सर्वपुरुषाभ्यां णढञौ (5/1/10) सूत्रस्य पदमञ्जरी।
2. अनुकरणत्वासर्वनामकार्याभावः।– सर्वपुरुषाभ्यां णढञौ (5/1/10) सूत्रस्य तत्त्वबोधिनी।
3. इह हि प्रथमासमर्थादस्तिना समानाधिकरणात् प्रत्ययो विधीयते।– मतौ छः सूक्तसाम्नोः (5/2/59) सूत्रस्य न्यासटीका।
4. 'अस्यवामस्य' इत्यस्य एकदेशानुकरणमस्यवामेति। तस्माच्छः। अस्यवामशब्दसंयुक्तमित्यर्थः। प्रकृतिवदनुकरणमित्यस्यानित्यत्वात्सुपो लुक्।– मतौ छः सूक्तसाम्नोः (5/2/59) सूत्रस्य बालमनोरमा।
5. न चास्यवामप्रभृतीनां वाक्यत्वम्; अनुकरणशब्दत्वात्। नाप्यनर्थकत्वम्; स्वरूपमात्रेणार्थव-त्वात्।– मतौ छः सूक्तसाम्नोः (5/2/59) सूत्रस्य न्यासटीका।

**साक्षाद् द्रष्टरि संज्ञायाम्** (5/2/91) इति सूत्रेण द्रष्टार्थे साक्षात्शब्दादिनि प्रत्ययो भवति संज्ञार्थे अवगम्ये। अत्र संज्ञार्थे साक्षात् इति शब्दग्रहणात् उपद्रष्टैव बोध्यते न तु दाता, ग्रहीता वा। साक्षात्शब्दोऽत्र अव्ययत्वात् प्रकृतिवदनुकरणत्वात् पञ्चम्या लुक् भवति[1]। **उदः स्थास्तम्भोः पूर्वस्य** (8/4/61), **अवाच्चालम्बना-विदूर्ययोः** (8/3/68) इत्यादौ प्रकृतिवदनुकरणम् इत्यतिदेशस्य वैकल्पिकत्वेनाव्यया-भावात् सुबलुकः। यथा साक्षाद् द्रष्टा साक्षी। अत्र अव्ययानां भमात्रे टिलोपः भवति। **स्वामीश्वराधिपतिदायादसाक्षि** (2/3/39) इत्यत्र नकारान्तस्य साक्षिशब्दस्य प्रयोगः निपातनात् सिद्धः। उपद्रष्टार्थे नकारान्तः साक्षिशब्दः नाभिप्रेतः।

एतत्तदोः **सुलोपोऽकोरनञ्समासे हलि** (6/1/132) इति सूत्रे एतत्तदोः पदे प्रकृतिवदनुकरणेन कार्यं न भवति। यतः **त्यदादीनामः** (7/2/102) सूत्रेण त्यदादिगणस्य शब्दानाम् दकारस्याकारेशः न क्रियते। प्रकृतिवदनुकरणस्य वैकल्पिकत्वादत्र अत्वं न। अपि च 'त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते' इत्यनेन एकशेषं न क्रियते सौत्रत्वात्। अत्रैकशेषस्य त्यदाद्यत्वस्य चाभाव आर्षप्रयोगः इति बालमनोरमाकारमतम्।

वस्तुतः प्रकृवदनुकरणं भवति इत्यनेन प्रकृतिवदतिदेशः वैकल्पिकः। तेन कॄ विक्षेपे, तॄ प्लवनतरणयोः इत्यनयोः धातुपठितयोः अनुकरणे प्रकृतिवदनुकरणात् धात्वधर्मे विवक्षिते **ॠत इद्धातोः** (7/1/100) इत्यनेन इत्वं रपरत्वं च भवति। पुनः अनुकार्याभ्यां अनुकरणयोरर्थवत्त्वेन प्रातिपदिकात् सुबुत्पत्तिः। न च प्रकतिवदनु-करणादनुकरणयोः धातुत्वे अधातुरिति पर्युदासात् प्रातिपदिकत्वाभावः। यतः क्वचित् परिभाषया प्रकृतिवद् कार्यं सिद्ध्यति, क्वचिन्न[2]। तेन कीः, किरौ, किरः इत्यादौ अतिदेशभावमादाय धातुत्वादित्त्वम्, अपरं अतिदेशाभावपक्षे धातुत्वाभावात् प्रातिपदिकाच्च सुबुत्पत्तिः[3]। सूत्रे वैपरीत्यनिर्देशेन परिभाषायाः वैकल्पिकत्वं सूचितम्[4]। अपि च परिभाषायाः अनित्यत्वात् 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'[5] इत्यत्र अचीत्यस्य समासे निविष्टऽपि न विभक्तेः लुक् भवति।

---

1. साक्षादित्यव्ययम्, इह शब्दस्वरूपपरं लुप्तपञ्चमीकम्। -साक्षाद्द्रष्टरि संज्ञायाम् (5/2/91) सूत्रस्य बालमनोरमा।
2. 'यत्तदेतेभ्यः परिमाणे वतुप्' इत्यत्र त्यदाद्यत्वनिर्देशात् 'त्यदादीनि सर्वैर्नित्यम्' इत्येक-शेषाकरणाद् 'ग्रो यङि' 'क्षियो दीर्घात्' इत्यादौ धात्वनुकरणे विभक्तिनिर्देशाच्च प्रकृतिवदनुकरणमिति पाक्षिकम्। -नॄ च (6/4/6) सूत्रस्य बालमनोरमा।
3. 'कॄ' 'तॄ' अनयोरनुकरणे 'प्रकृतिवदनुकरणम्' इति वैकल्पिकातिदेशादित्त्वे रपरत्वे कीः, किरौ, किरः। तीः, तिरौ, तिर इत्यादि गीर्वत्। -नॄ च (6/4/6) सूत्रस्य सिद्धान्तकौमुदी।
4. 'यत्तदेतेभ्यः परिमाणे' इति निर्देशोऽत्र लिङ्गम्। भवति हि तत्र त्यदाद्यत्वकरणादनुकरणस्य प्रकृतिवत्त्वम्, एकशेषाभावदर्शनाच्च वैकल्पिकत्वमिति।- नॄ च (6/4/6) सूत्रस्य तत्त्वबोधिनी।
5. रात्सस्य (8/2/24) सूत्रस्य वार्तिकम्।

## सन्दर्भसूची

1. जोशी, भार्गव शास्त्री भिकाजी, सम्पादकः (प्रथमभागः 2014)। व्याकरण-महाभाष्यम् (भाष्यप्रदीपोद्द्योतसमुल्लसितम्)। दिल्लीः चौखम्बा संस्कृत प्रतिष्ठान।

2. ताताचार्य, एन्.एस्. रामानुज, सम्पादकः (2002)। ज्ञापकसंग्रहः (विवृति-सहिता)। तिरुपतिः राष्ट्रीय संस्कृत विद्यापीठ।

3. त्रिपाठी, जयशङ्करलाल, सुधाकरमालवीय च सम्पादकौ (प्रथमभागः 2016)। काशिका (न्यास-पदमञ्जरी-भावबोधिनी सहिता)। वाराणसीः तारा बुक एजेन्सी।

4. पञ्चोली, बालकृष्ण, सम्पादकः (प्रथमभागः 1966)। वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्या सहिता)। दिल्लीः मोतिलाल बनारसी दास।

5. शर्मा, गिरिधर परमेश्वरानन्द च सम्पादकौ (प्रथमभागः 2010)। वैयाकरण-सिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनी-सहिता)। दिल्लीः मोतीलाल बनाररसीदास।

6. शर्मा, अमिता, सम्पादकः (1995)। ज्ञापकसमुच्चय। दिल्लीः नाग प्रकाशक।

✦✦✦

# स्वं रूपं शब्दस्याशब्दसंज्ञा इति सूत्रस्य समीक्षणम्

-डा. मलयपोडे*

**शोधसारः -**

लौकिकव्यवहारे प्रयुक्तानां शब्दानां शिष्टत्वसम्पादकेषु व्याकरणशास्त्रेषु लोकवेदोभयोपकारित्वात् पाणिनीयं व्याकरणं सर्वातिशायि। तत्र शब्दान्वाख्यानवेलायां शब्दादर्थप्रतीतेः 'अग्नेर्ढक्' इत्यादिषु सूत्रेषु 'अग्न्यर्थात् ढक्' इत्याद्यर्थः स्यादित्याक्षेपाद् अग्निराजादिवाचकात् पर्यायमात्रात्क्रमशो ढग्यदादिप्राप्तेः तन्निवृत्तिपरकमनुशासनं प्रोक्तं पाणिनिना 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति। अत्र स्वपदेन अर्थस्य रूपपदेन शब्दस्वरूपस्य ग्रहणम्। अशब्दसंज्ञा नाम शब्दशास्त्रे या संज्ञा तां विना इति। इत्थं पर्यालोचनेन सूत्रार्थः समागतः शब्दस्य बोध्यः संज्ञी भवति अर्थविशिष्टः शब्दः (अर्थविशिष्टं रूपम्), शब्दशास्त्रीयसंज्ञां वर्जयित्वा।

अर्थविशिष्टस्य शब्दरूपस्य संज्ञित्वाद् अर्थविशिष्टस्यैव शब्दस्य शास्त्रे ग्रहणं नानर्थकस्य। एतेन "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्" इति परिभाषा सिद्धा, अतः परिभाषा न कर्तव्या। नागेशनये तु अनेन सूत्रेणार्थवत्परिभाषा, गौणमुख्यन्यायः, अभिव्यक्तपदार्थन्यायश्च सिद्धो भवति। सूत्रमिदं नियमसूत्रं परिभाषां संज्ञासूत्रं वा इति विचार्यमाणे तत्र निष्कर्षः समायातः यद् लिङ्गवती लिङ्गाभावात् विध्यन्तरशेषभावात् नेयं परिभाषा नापि नियमः अपि तु संज्ञासूत्रम् इदम्। विशिष्टरूपोपादाने अस्य सूत्रस्य प्रवृत्तिः।

शब्दानां शब्दे अर्थे च पृथक् पृथक् शक्तिः इति स्वीकारात् सूत्रमिदं महाभाष्ये प्रत्याख्यातम्। नागेशभट्टः काशिकाकारादयः अपि प्रत्याख्यानपक्षम् अवलम्बन्ते, अतः सूत्राभावेऽपि अर्थवत्परिभाषादिसिद्धिः, सूत्राभावे लाघवं, तत्सत्त्वे गौरवञ्च नागेशेन प्रतिपादितम्। सूत्रस्याभावे अपि लक्ष्यानुसारिव्याख्यानादेव सर्वं सिध्यति। वस्तुतस्तु लक्ष्यैकचक्षुष्काणां नये सूत्रं नापेक्षते परन्तु लक्षणैकचक्षुष्काणां नये पाणिनिप्रणीतसूत्रस्य कस्यचिदपि वर्णस्य महाभाष्यकारेण आनर्थक्या-स्वीकारात् सूत्रम् अपेक्षते एव इति शिवम्।

---

* सहायकप्राध्यापकः, राणीबाँधसर्वकारीयमहाविद्यालयः, बाँकुडा - ७२२१३५, पश्चिमबङ्गः

प्रमुखशब्दाः – अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्, अशब्दसंज्ञा, गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः, ज्ञापकानित्यत्वविचारः, विशिष्टरूपोपादानम्, शब्दे अर्थे च शक्तिः, सूत्राभावे लाघवम्, सूत्रपक्षे गौरवम् स्वं रूपम्।

**1. उपोद्घातः-**

लौकिकव्यवहारे प्रयुक्तानां शब्दानां शिष्टत्वसंरक्षणाय हि प्रकृतिप्रत्ययविभागद्वारा शब्दान्वाख्यायकं व्याकरणशास्त्रं प्रवृत्तम्। प्रवृत्तेषु व्याकरणशास्त्रेषु लोकवेदोभयोपकारित्वात् पाणिनीयं व्याकरणं सर्वाणि व्याकरणान्यतिशेते। अत्र शब्दान्वाख्यायकम् अनुशासनं भवति पाणिनिप्रणीता अष्टाध्यायी। भिन्नेष्वर्थेषु प्रत्ययविधानाय भिन्नानि सूत्राणि प्रणीतानि। तत्रैवाक्षेपः समायाति यत् लोके अग्निमानय, राजानं पश्येत्यादिप्रयोगाद् अग्निराजरूपार्थस्य प्रतीतिर्भवति। एवं व्याकरणे 'अग्नेर्ढक्', 'राजश्वशुराद्यत्' इत्यादिषु सूत्रेषु 'अग्न्यर्थात् ढक्', 'राजश्वशुराद्यर्थाद्यत्' इत्याद्यर्थः स्यात्। आक्षेपस्योत्तरमुच्यते यद् व्याकरणे तथा न सिध्यति, ढको यतश्च शब्दत्वेनार्थात्परत्वासम्भवात् 'प्रातिपदिकात्' इत्यधिकारस्यार्थेन सहान्वयाभावात् सूत्रवैयर्थ्यापत्तेः। एवञ्चेद् अग्निराजादिवाचकात् पर्यायमात्रात् क्रमशो ढग्यदादयो भवन्तु इत्यभिप्राये सञ्जाते, तन्निवृत्तिपरकमनुशासनं प्रोक्तं पाणिनिना 'स्वं रूपम्' इति। संज्ञासूत्रमिदं पाणिनिप्रणीताया अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य अष्टाषष्टितमं सूत्रम्।

**2. सूत्रव्याख्यानम्-**

स्वं रूपं शब्दस्येति एकं वाक्यम्। अशब्दसंज्ञा इति द्वितीयं वाक्यम्। सूत्रमिदं पदचतुष्टयात्मकम्। बोध्यमित्यध्याह्रियते। बोध्यमित्यस्याध्याहारः कथमिति चेदुच्यते- तत्पदाभावे 'वृद्धिरादैच्' इत्यादिसूत्रवत् समानविभक्तिकत्वाभावात् संज्ञासूत्रं न स्यात्, तत्सिद्धये बोध्यमित्यस्याध्याहारः। एवं शब्दस्य स्वं रूपं संज्ञि बोध्यत्वात्, संज्ञा शब्दो बोधकत्वाच्च। ननु संज्ञासंज्ञिनोर्मध्ये बोध्यबोधकभावसम्बन्धसत्त्वात् कथं सिध्यति सामानाधिकरण्यमिति चेदुच्यते- यद्यपि वस्तुस्थित्या बोध्यबोधकभावापन्नयोः सामानाधिकरण्यं नोपपद्यते, किन्तु शब्दार्थयोस्तादात्म्य-स्वीकारात्सूत्रकारेण "अदेङ् गुणः" "भूवादयो धातवः" इत्येवंक्रमेणोपन्यासः कृतः।

शब्दस्येत्यत्र 'कृत्यानां कर्तरि वा' इत्यनेन कर्तरि षष्ठी। अत्र षष्ठी वास्तवभेदासत्त्वेऽपि बौद्धिकभेदमाश्रित्य कल्पितेति न्यासकारस्य मतम्। तथाह्युक्तं तेन- "स्वं रूपं शब्दस्य स्वभावः।....असत्यपि तु वास्तवे भेदे बुद्धिविरचितं भेदमाश्रित्य षष्ठी भवति। बुद्धिर्हि स्वबीजपरिपाकवशादाकारविशेषपरिग्रहवत्युप-जायमाना वस्तुनोऽसत्यपि भेदे भेदमापादयति, यथा राहोः शिरः, स्वस्य स्वभावः।"[1] इति।

1. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ 209

सकलशास्त्रपारावारिणा वैयाकरणकेसरिणा पण्डितसभापतिशर्मोपाध्यायेन संज्ञासंज्ञिविषये अत्र स्वाभिप्रायः स्वरचितायां लक्ष्मीटीकायां प्रस्तुतः। तस्य मते तु शब्दस्य संज्ञात्वे "प्रत्युच्चारणं शब्दा भिद्यन्ते" इति न्यायेन संज्ञाभूता सूत्रस्था शब्दरूपा व्यक्तिरनेका तथा लक्ष्यस्था संज्ञिभूता अपि अनेका स्यात्। तेन च "अनाकृतिः संज्ञा, आकृतिमन्तः संज्ञिनः" इति एका संज्ञा अनेके संज्ञिन इत्येतत्तात्पर्यकस्य भाष्यस्य विरोध आपद्येत। अतः सूत्रे शब्दस्येत्यत्र शब्दगतजातेरित्यर्थः स्वीकार्यः। तेन शब्दगता जातिः संज्ञा, जातेरेकत्वादिति न भाष्यविरोधः।[1] अत्र च हरिप्रमाणं-

> **संज्ञिनीं व्यक्तिमिच्छन्ति सूत्रग्राह्यामथापरे।**
> **जातिप्रत्यायिता व्यक्तिः प्रदेशेषूपतिष्ठते।।**[2] इति।

### 2.1. स्वं रूपं शब्दस्येत्यंशतात्पर्यविचारः-

रूपं नाम शब्दस्वरूपम् आनुपूर्वी वा। शब्दस्य स्वमेव रूपं भवति। स्वशब्देन रूपमेव ग्राह्यम्। स्वशब्देनार्थस्य ग्रहणं नैव सिध्यति। अत्र हि कारणत्रयमस्ति[3]-

1) शक्तिज्ञानाधीना भवति अर्थोपस्थितिः। शक्तिज्ञानमनपेक्ष्यैव स्वरूपज्ञानं सिध्यतीति अर्थादन्तरङ्गं भवति शब्दस्वरूपम्।

2) पर्यायैरपि अर्थस्योपस्थितिर्भवति। यथा राजन्पर्यायैः नृप-नृपति-भूपालादिशब्दैरपि सम्राड्रूपार्थस्य प्रतीतिर्भवति। एवमर्थः स्वपरसाधारणः। किन्तु स्वरूपं न स्वपरसाधारणम्, तद्भिन्नासाधारणम्।

3) अभेदानुकरणस्थले हि सादृश्येन प्रतीतिर्भवति। तत्र स्वरूपमुपस्थितं भवति किन्तु अर्थो नोपतिष्ठत इति अर्थो रूपापेक्षया नियतोपस्थितिकः।

एवञ्च कारणत्रयसत्त्वात् स्वशब्देन रूपस्यैव ग्रहणं कार्यं न शब्दस्येति सिध्यति। प्रदीपे चोक्तं- "प्रतीतावुपदेशानपेक्षत्वादन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपमेव ग्रहीष्यते"[4] इति।

एवं स्वशब्देन रूपग्रहणे सिद्धे रूपग्रहणं किमर्थमिति प्रश्नः समायाति। अत्रोत्तरमुच्यते स्वशब्देन बहिरङ्गस्य साधारणस्यानियतोपस्थिकस्यापि अर्थस्य ग्रहणार्थं रूपग्रहणं चरितार्थम्। अत्रोक्तं भाष्यकृता- "एवं तर्हि सिद्धे सति यद्रूपग्रहणं करोति

1. वैयाकरणसिद्धान्तकौमुदी लक्ष्मीटीका, पृ. 67
2. वाक्यपदीयं ब्रह्मकाण्डम्, कारिका- 69
3. वैयाकरणसिद्धान्तकौमुदी लक्ष्मीटीका, पृ. 68
4. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ. 210

तज्ज्ञापयत्याचार्यः- अस्त्यन्यद् रूपात्स्वं शब्दस्येति। किं पुनस्तत्। अर्थः।"[1] इति। एवञ्च स्वशब्देनात्मीयवाचिना सूत्रे अर्थस्य ग्रहणम्। रूपं च शब्दस्वरूपम्। उक्तं हि दीक्षितवृत्तौ- "शब्दस्य स्वं रूपं संज्ञि स्यात्।" इति। अर्थस्य हि प्रत्ययेन सह पौर्वापर्याभावाद् व्याकरणे शब्दस्यैव प्राधान्यादत्र अर्थरूपयोर्मध्ये अर्थस्य विशेषणत्वं शब्दस्य विशेष्यत्वमिति राद्धान्तो भाष्यकृत्-कैयट-दीक्षित-नागेशाभिमतः।

काशिकाकृता तु वृत्तौ- "शास्त्रे स्वमेव रूपं ग्राह्यं बोध्यं प्रत्याय्यं भवति, न बाह्योऽर्थः, शब्दसंज्ञां वर्जयित्वा।" इत्यर्थो लिखितः। अत्र स्वमेव रूपमित्यत्राव-धारणार्थकस्य एवशब्दस्य प्रयोगात् स्वं रूपं च तस्य मते समानमिति भाति। तत्र न्यासे तदुक्तिस्वारस्यमुक्तं- "अग्निशब्दादौ शब्दान्तरैः साधारणमपि रूपमस्ति शब्दत्वादि, असाधारणमपि अग्निशब्दत्वादि, तत्र साधारणरूप-व्युदासेनासाधारणस्याग्नि-शब्दत्वादिरूपस्य परिग्रहार्थं स्वंग्रहणम्।"[2] इति। एवं तन्मते तद्धि शब्दस्य स्वं रूपम्, इतरत् पुनः परस्यापि। आसन्नत्वात्, असाधारणत्वात्, प्रतीतिं प्रत्यनुपदेशात्, अहेयत्वात्, तन्नित्यसम्बन्धित्वाच्च शब्दस्य स्वरूपमेवासन्नम्, नार्थः। तच्चासाधारणं रूपं अग्निशब्दत्वादिकं, न हि शब्दत्वम्। किञ्च, पदमञ्जरीकृतोक्तं- "रूपशब्देन चेहाग्नित्वादिकं शुकसारिकापुरुषादिभिरुदीरितासु भिन्नासु शब्दव्यक्तिषु समवेतं सामान्यमभिधीयते।"[3] इति। यथा, "अग्नेर्ढक्" इति सूत्रकारेण या व्यक्तिरुच्चारिता, तस्याः सर्वोच्चारणेष्वनुगतं भवति सामान्यम्। सामान्यस्य कार्ययोगो व्यक्तिद्वारक इति तेन तेनोच्चारितायास्तस्यास्तस्या व्यक्तेर्ढग् भवतीत्यर्थः सम्पद्यते इति तत्तात्पर्यम्।

## 2.2 सूत्रेण अर्थवत्परिभाषादिसिद्धिः-

एवं शब्दनिष्ठवाचकतानिरूपिता या वाच्यता सा अर्थे स्वरूपे चास्ति। एवञ्च कदाचिद्रूपस्य कदाचिदर्थस्य विशेष्यत्वम्। एवम् "अग्नेर्ढक्" इति सूत्राद् अग्निशब्दवाच्यदाहशक्तिमत्पदार्थाद् ढक्, दाहशक्तिमत्पदार्थवाचकाग्निशब्दाद् ढगित्यर्थद्वयम्। तत्र प्रथमार्थस्य शास्त्रे बाधनात् स्वरूपयोर्मध्ये रूपस्यैव विशेष्यत्वं स्वस्य च विशेषणत्वमिति अर्थविशिष्टं रूपं अर्थविशिष्टा आनुपूर्वी वा संक्षिप्तत्वेन गृह्यते। एवमर्थविशिष्टं शब्दरूपं संज्ञीति अतः अर्थविशिष्टस्यैव शब्दस्य शास्त्रे ग्रहणं नानर्थकस्य। एतस्यैवार्थस्यानुवादिका भवति- "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्" इति परिभाषा। एतत्सूत्रेणैव सिद्धे परिभाषार्थे परिभाषा अनपेक्षिता भवति। अत एवोक्तं महाभाष्यकृता- "अर्थवद्ग्रहणे नानर्थकस्येत्येषा परिभाषा न कर्तव्या भवति"[4]

1. महाभाष्यम् (1म-भागः), पृ. 548
2. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ. 210
3. न्यासपदमञ्जरीसहिता पदमञ्जरी, पृ. 209
4. महाभाष्यम् (1म-भागः), पृ. 547

इति।

न्यासे प्रोक्तं तु- "ततश्च स्वग्रहणादेव रूपपरिग्रहे सिद्धे व्याकरणे रूपवदर्थः अप्यङ्गीक्रियते इति ज्ञापनार्थं रूपग्रहणम्। तेन अर्थवत्परिभाषा उपपन्ना भवति।"[1] इति।

अर्थवतो ग्रहणात् काशे कुशे इत्यत्र शे इति प्रगृह्यसंज्ञा न भवति। "प्रादूहोढोढ्येषैष्येषु" इत्यनेन प्रौढ इत्यत्र वृद्धिः, न तु प्रोढवानित्यत्र। "जराया जरसन्यतरस्याम्" इति सूत्रस्थजराशब्देन लक्ष्यस्थार्थवज्जराशब्दस्योपस्थितिः। तेन चार्थवज्जराशब्दस्यैव जरसादेशः। न तु अजं रातीति विग्रहे निष्पन्नस्याजरशब्दस्य जरसादेशः। अत्रार्थशब्देन कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोऽर्थो गृह्यते। यथा रामं पश्येत्यत्रामः कर्मत्वमर्थः। सोऽर्थः हि मुख्यः अनारोपितः प्रसिद्धश्च गृह्यते।

नागेशनये तु अनेन सूत्रेणार्थवत्परिभाषा, गौणमुख्यन्यायः, अभिव्यक्तपदार्थन्यायश्च सिद्धो भवति।[2] तेन हि "गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः" इति परिभाषा सिध्यति। अनया परिभाषया हि गौणे मुख्ये च कार्ये प्रसक्ते मुख्ये एव कार्यस्य विधानं भवति। अभिव्यक्तन्यायस्य सम्पूर्णं स्वरूपं तावद्-

**"अभिव्यक्तपदार्था ये ये स्वतन्त्रा लोकविश्रुताः।**

शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु।।" इति। किञ्च, सादृश्यमहिम्ना आरोपितराजत्वविशिष्टात्, व्यक्तिविशेषे संकेतितराजशब्दाच्च राजश्वशुराद्यत् इति यत्प्रत्ययो न।

## 2.3 अशब्दसंज्ञेत्यंशविवेकः-

अशब्दसंज्ञा इत्यत्र न शब्दसंज्ञा इति नञ्समासः। शब्दसंज्ञां वर्जयित्वा इत्यर्थः। ननु अत्र शब्दस्य संज्ञा शब्दे संज्ञा वा समास इति सन्देहः।

शब्दस्य संज्ञा इत्यर्थस्वीकारे "आद् गुणः" इत्यादिषु सूत्रेषु गुणस्य शब्दसंज्ञात्वाद् अर्थविशिष्टरूपस्य भानं न भवति, तेन हि गुणशब्देनादेङ्रूपार्थस्य ग्रहणं सिध्यति। परन्तु "कर्तुरीप्सिततमं कर्म" इत्यनेन कर्मसंज्ञा तु अर्थसंज्ञा, सामर्थ्याभावादेव "कर्मणि द्वितीया" इति शब्दाद् भवति। एवं "कर्मण्यण्" "करणे हनः" इत्यादिषु सूत्रेषु कर्म-करणादीनामर्थसंज्ञा तया तत्र "स्वं रूपम्" इति सूत्रस्य प्रवृत्त्या कर्मकार इत्यादिसिद्धावपि कुम्भकारः पादघातम् इत्यादिप्रयोगाः न सिध्यन्ति। अत्र समाधानं तावद् अशब्दसंज्ञा इति षष्ठीतत्पुरुषो न, अपि तु सप्तमीतत्पुरुषः। एवञ्च शब्दे

1. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ-210
2. लघुशब्देन्दुशेखरः संज्ञापरिभाषाप्रकरणे, पृ 184

संज्ञा शब्दसंज्ञा इति विग्रहः। न शब्दसंज्ञा अशब्दसंज्ञेति नञ्समासः। अत्र शब्दपदं हि शब्दशास्त्रपरम्। शब्दशास्त्रे या संज्ञा सा हि संज्ञिनमर्थविशिष्टं शब्दं न बोधयति, अपि त्वर्थं बोधयति। शब्दशास्त्रे तु कर्मादिसंज्ञाः सन्ति, तासामर्थसंज्ञात्वे अपि नास्ति दोषः। ता ह्यर्थमेव बोधयन्ति। तेन कुम्भकारः पादघातमित्यादिप्रयोगाः सिध्यन्ति।

अशब्दसंज्ञेत्यस्य प्रयोजनमुक्तं- "दाधा घ्वदाप् तरप्तमपौ घः- घुग्रहणेषु घग्रहणेषु च संज्ञिनां ग्रहणम्, न संज्ञायाः।"[1] इति। "उपसर्गे घोः कि" इति घुसंज्ञकेभ्यो दाधाभ्यो यथा स्यात्, स्वरूपाद् घुधातोर्मा भूदिति ज्ञानाय अशब्दसंज्ञेति ग्रहणम्।

न्यासे अस्मिन् प्रसङ्गे प्रोक्तं- "शब्दानुशासनप्रस्तावादेव शब्दस्येति सिद्धे शब्दग्रहणं यत्र शब्दपरो निर्देशस्तत्र स्वरूपं गृह्यते, नार्थपरो निर्देश इति ज्ञापनार्थम्।"[2] इति

एवं शब्दस्य बोध्यः संज्ञी भवति अर्थविशिष्टः शब्दः (अर्थविशिष्टं रूपम्), शब्दशास्त्रीयसंज्ञां वर्जयित्वा। तदुक्तं दीक्षितवृत्तौ- "शब्दस्य स्वं रूपं संज्ञि स्यात् शब्दशास्त्रे या संज्ञा, तां विना"[3] इति।

**2.4 सूत्रप्रकारः-**

सूत्रस्यास्य प्रयोजनं वर्णयता भाष्यकारेणोक्तं- "शब्देनार्थगतेरर्थे कार्यस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम्" इति। तस्या एव पङ्क्तेस्तात्पर्यावगाहनेन इदं संज्ञासूत्रं, परिभाषासूत्रं, नियमसूत्रञ्चेति मतत्रयं विद्वद्भिरुपन्यस्तम्।

क) नियमसूत्रम्- नागेशेनास्य सूत्रस्य नियमसूत्रत्वं संज्ञासूत्रत्वञ्चाङ्गीकृतम्। तेनोक्तं- "राज्ञो यदि"त्यादौ लौकिकव्युत्पत्त्या उपस्थापितस्यार्थस्य प्रत्ययेन पौर्वापर्यासम्भवात् प्रातिपदिकाद् इत्यनेनान्वयसम्भवाच्च तदर्थकशब्दमात्रग्रहणापत्तौ नियमार्थं सूत्रम्। इति। "सिद्धे सत्यारम्भो नियमाय कल्पते" इति नियमलक्षणम्। एवञ्च अग्निपर्यायेभ्यस्तच्छाच्च ढकः "अग्नेर्ढक्" इत्यनेन प्रसक्तौ अग्निशब्दादेवेति नियमो विधीयते सूत्रेणानेन। एतस्य सूत्रस्य नियमत्वं बालमनोरमान्यासकृदादयः अपि अभ्युपगच्छन्ति।

ख) परिभाषासूत्रम् - "अनियमे नियमकारिणी परिभाषा" इति परिभाषालक्षणम्। "अग्नेर्ढक्" इत्यनेनाग्निपर्यायेभ्यो वाग्निशब्दाद् ढक् स्यादित्यनियमे प्रसक्ते अग्नि-शब्दादेवेति नियमनादेषा परिभाषा इति न्यासकृदादयः।

1. न्यासपदमञ्जरीसहिता काशिका, पृ-211
2. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ-210
3. वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीव्याख्योपेता (1म-भागः), पृ-35

ग) संज्ञासूत्रम् - "शक्तिग्राहकत्वं संज्ञासूत्रत्वम्" इति सामान्यं लक्षणम्। पण्डितसभापतिशर्मोपाध्याययस्य नये तु भाष्योक्तेरस्य संज्ञासूत्रत्वमेव स्पष्टं प्रतीयते। लिङ्गवती परिभाषा भवति, यथा "इको गुणवृद्धी" इति गुणवृद्धी लिङ्गम्। विध्यन्तरशेषभूता वा "विप्रतिषेधे परं कार्यमि'ति परस्य विध्यन्तरस्य शेषभावमापद्यते। न चास्याः लिङ्गं विध्यन्तरशेषभावो वा विद्यत इति संज्ञासूत्रमिदमिति केषाञ्चिन्मतमिति न्यासे उपन्यस्तम्। किञ्च, काशिकास्वारस्यं वर्णयता तत्र न्यासकृतोक्तं- "यद्यपि वृत्तौ संज्ञाशब्दो नोच्चारितः, तथापि स्वमेवं रूपं ग्राह्यमित्येव ब्रुवता वृत्तिकारेण संज्ञैवेत्याख्यातं भवति।"[1] इति।

## 2.5 सूत्रप्रवृत्तिस्थलम्-

इदं सूत्रं यत्र विशिष्टरूपोपादानं भवति तत्रैव प्रवर्तते। विशिष्टरूपोपादानत्वं नाम आनुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वम्। अर्थात् सार्थकानुपूर्वी। यथा "अग्नेर्ढक्", "राज्ञो यदि"त्यादौ अग्नेः राज्ञ इत्यादि विशिष्टरूपोपादानमस्ति। "अत इञ्", "एरच्" इत्यादौ विशिष्टरूपोपादानाभावादस्य सूत्रस्य प्रवृत्तिर्न भवति। एवं च वर्णग्रहणेषु नेदं प्रवर्तते। यथा वर्णग्रहणेषु अनर्थकत्वात्तत्रैतस्य सूत्रस्य नास्ति प्रवृत्तिरिति कैयटनागेशसमयः।[2]

## 2.6 सूत्रप्रयोजनम्-

एतस्य सूत्रस्य प्रयोजनमाह भाष्यकारः- "शब्देनार्थगतेरर्थे कार्यस्यासम्भवात् तद्वाचिनः संज्ञाप्रतिषेधार्थं स्वंरूपवचनम्" इति। उच्चारितेन हि शब्देनार्थः प्रतीयते। यथा गामानाय दध्यशानेत्युक्ते लोके गोशब्दार्थो दधिशब्दार्थश्चानीयते। व्याकरणे हि अर्थे कार्यं न सिध्यति। यथा "अग्नेर्ढक्" इत्यनेनाग्न्यर्थात् ढक् न सिध्यति। शब्दादर्थप्रतीतावपि व्याकरणे अर्थे कार्यस्यासम्भवाद् अग्निवाचकेभ्यः अग्नि-वह्न्यङ्गारादिभ्यः सर्वेभ्यः शब्देभ्यः ढक् प्राप्नोति। एवमनियमे प्रसक्ते अग्न्यर्थ-वाचकादग्निशब्दादेव ढक् यथा स्यादित्येवमर्थं सूत्रमिदमारब्धम्। एवं भाष्यस्वारस्यादेव। एतस्य संज्ञात्वं परिभाषात्वं नियमत्वं वा विद्वद्भिः प्रकल्पितम्।

सामूहिकपर्यालोचनेन सूत्रस्यास्य त्रीणि प्रयोजनानीति वक्तुं शक्यते-

क) शब्दस्य संज्ञी भवति अर्थविशिष्टः शब्दः।

ख) अनेनैव सूत्रेणार्थवत्परिभाषा सिद्धा।

---

1. न्यासपदमञ्जरीसहिता काशिका, न्यासः, पृ-210
2. महाभाष्यम् (1म-भागः), प्रदीपः, पृ-547; लघुशब्देन्दुशेखरः संज्ञापरिभाषाप्रकरणे, पृ 184

ग) शब्दशास्त्रे इयं संज्ञा न प्रवर्तते।

### 2.7 सूत्रप्रत्याख्यानम्-

सूत्रमिदं महाभाष्यकृता प्रत्याख्यातम्। सामान्यतया शास्त्रेषु शब्दस्यार्थविषये पक्षचतुष्टयमङ्गीक्रियते -

**क) प्रथमपक्षः**- शब्दानामर्थे शक्तिः शब्दे लक्षणा। यथा घटमानयेत्यत्र शक्त्या घटशब्देन घटरूपः कम्बुग्रीवादिमान् अर्थः बुध्यते। एवमेव घटमुच्चारयेत्यत्रापि घटशब्देन शक्त्या घटरूपस्यार्थस्योपस्थितिः। परन्तु उच्चारणक्रियायां तस्यान्वयासम्भवाद् अन्वयानुपपत्त्या लक्षणा स्वीक्रियते। लक्षणया हि घटशब्दो घटशब्दं प्रतिपादयति। स्ववाच्यवाचकत्वसम्बन्धेन घटशब्दस्य घटशब्दे लक्षणाङ्गीक्रियते। स्वं घटशब्दः तद्वाच्यो घटरूपः अर्थः, तद्वाचको घटशब्दः।

**ख) द्वितीयपक्षः**- शब्दानां शब्दे शक्तिरर्थे लक्षणा। यथा "घटमुच्चारये"त्यत्र शक्त्या घटशब्दः घटशब्दं बोधयति। परन्तु घटमानयेत्यत्र घटशब्दस्यानयना-सम्भवाद् अन्वयानुपपत्त्या घटशब्दस्य कम्बुग्रीवादिमद्घटपदार्थे लक्षणा।

**ग) तृतीयपक्षः**- शब्दानामार्थविशिष्टे शब्दे, शब्दविशिष्टे अर्थे च शक्तिः। घटमुच्चारयेत्यत्र घटार्थस्योच्चारणक्रियान्वयासम्भवाद् घटशब्दस्यार्थविशिष्टे शब्दे शक्तिः स्वीक्रियते। तेन घटार्थविशिष्टघटशब्दमुच्चारयेति प्रतीतिः। एवमेव घटमानयेत्यत्र घटशब्दस्यानयनक्रियायाम् अन्वयाभावाद् घटशब्दविशिष्टे अर्थे शक्तिः स्वीक्रियते। अत्र घटशब्दविशिष्टं घटार्थमानयेति प्रतीतिः।

**घ) चतुर्थपक्षः**- शब्दानां शब्दे अर्थे च पृथक् पृथक् शक्तिः। अत्र कदाचिच्छब्दो विशेष्यः अर्थो विशेषणम्, कदाचिदर्थो विशेष्यः शब्दश्च विशेषणम्।

### 2.8 वैयाकरणाभिसम्मतः चतुर्थपक्षः, सूत्रखण्डनं च-

प्रथमतः पक्षत्रयं गौरवग्रस्तम्। तत्र प्रथमपक्षे शब्दे द्वितीये चार्थे लक्षणाङ्गीकारात् लक्षणाया जघन्यवृत्तित्वाद् भवति गौरवम्। तृतीये च पक्षे अस्ति गौरवद्वयम्-प्रकरणाद्यपेक्षा शक्यतावच्छेदकगौरवं च। प्रकरणादिना एव क्वचित् शब्दविशिष्टे अर्थे क्वचिच्चार्थविशिष्टे शब्दे शक्तिः कल्पनीया। किञ्च, यदा शब्दविशिष्टः अर्थः शक्यस्तदा शक्यतावच्छेदकं शब्दविशिष्टार्थत्वं, यदा चार्थविशिष्टः शब्दः शक्यस्तदा शक्यतावच्छेदकमर्थविशिष्टशब्दत्वमिति शक्यतावच्छेदकद्वयकल्पनात् महद् गौरवम्। अतः पक्षत्रयमनादृत्य वैयाकरणैः शब्दानां शब्दे अर्थे च पृथक् पृथक् शक्तिरित्येवंभूतः चतुर्थपक्षः समादृतः। तथाह्युक्तं भर्तृहरिणा-

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुबद्धमिव ज्ञानं सर्वं शब्देन भासते।।**[1] इति।

शब्दस्यैव विशेष्यत्वं सति सम्भवे स्वीकार्यं, शब्दस्य लोके अर्थबोधनाय उच्चरितत्वात्। एवञ्च व्याकरणे अर्थे कार्यस्य बाधे "अग्नेर्ढक्", "राज्ञो यदिष्त्यादौ उपस्थितः अग्निशब्दः राजन्शब्दः च कार्यभाक्। अर्थे तु ढगादिकार्यं न सम्भवति। अर्थे कार्यस्यासम्भवत्वेऽपि शब्दे विशेषणतयार्थस्यान्वयः सम्भवति। एवञ्च शब्दो विशेष्यः अर्थश्च विशेषणम्। एवम् अग्नर्थवाचकाद् अग्निशब्दाद् ढक् इत्येवं क्रमेणार्थः समायातीति सूत्रेण न किमपि विशिष्टं साध्यते। अतः सूत्राभावे सूत्रकार्यसम्भवात् सूत्रमिदं प्रत्याख्यातम्।

अत एवोक्तं भाष्ये- "न वा शब्दपूर्वको ह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्तिः।"[2] इति। एतस्य तात्पर्यं तावत् शब्दपूर्वकमर्थज्ञानं भवति। लोके हि शब्देनाहूयते, यदा च प्रतीतिर्न जायते तदा- किं भवानाहेति पृच्छति। एवं हि व्याकरणे शब्दे कार्यं सिध्यति, अर्थे च कार्याभावादर्थस्य निवृत्तिर्भवतीति सूत्रं नापेक्षते।

सूत्रारम्भवादिना तु तदा सूत्रस्यान्यत्कारणं प्रदत्तम्- "इदं तर्हि प्रयोजनम्- अशब्दसंज्ञेति वक्ष्यामीति। इह मा भूत्- "दाधा घ्वदाप्", "तरप्तमपौ घः"[3] इति। अर्थात् शब्दशास्त्रीयसंज्ञायां स्वरूपग्रहणवारणायेदं सूत्रम्। तेन घुघप्रभृतिभिः शब्दैः शब्दस्वरूपस्य ग्रहणं न भवति, अपि तु संज्ञिनां धातूनां ग्रहणं भवति।

अस्मिन् प्रसङ्गे सूत्रारम्भमपाकुर्वता नागेशेनोक्तं- "लक्ष्यानुरोधात्तत्तत्संज्ञाकरण-ज्ञानरूप-प्रकरणाच्च षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणज्ञापनाच्च- "उपसर्गे घोः कि"त्यादावदोषेणाशब्दसंज्ञेत्यपि व्यर्थमित्युक्तम्।"[4] इति। अत्र हि कारणद्वयमुपन्यस्तं- 1) लक्ष्यानुरोधात्तत्तत्संज्ञाकरणज्ञानरूपप्रकरणम्, 2) षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहण-ज्ञापनञ्च। कारणद्वयमधो वर्ण्यते-

क) शब्दस्यार्थनिर्णयाय प्रकरणं महत्त्वपूर्णं भवति। यथा सैन्धवमानयेति वाक्ये सैन्धवपदं भोजनप्रकरणे लवणपरं, युद्धप्रकरणे चाश्वपरम्। व्याकरणशास्त्रे तत्तत्संज्ञाकरणं ज्ञानरूपं प्रकरणमस्ति। एवं प्रकरणादेव "दाधा घ्वदाप्", "उपसर्गे घोः कि" इत्यादौ घुपदं न स्वरूपबोधकमपि तु संज्ञिबोधकमिति ज्ञायते। अतः अशब्दसंज्ञा इत्यस्य नास्ति प्रयोजनम्। एवं गुणशब्दे "अदेङ्

1. वाक्यपदीयम्, कारिका- 123
2. महाभाष्यम् (1म-भागः), पृ. 548
3. महाभाष्यम् (1म-भागः), पृ. 549
4. लघुशब्देन्दुशेखरः संज्ञापरिभाषाप्रकरणे, पृ. 188

गुण:" इत्यनेनादङ्निरूपिता शक्तिस्तिष्ठति। गुणशब्दे गुणशब्दनिरूपिता शक्ति:। अत्र प्रकरणाद् "आद् गुण:" इत्यत्र गुणशब्देनादेङो ग्रहणम्।

ख) "ष्णान्ता षट्" इत्यनेन षान्तसंख्यावाचकषष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीय-संज्ञायां स्वरूपविधिर्न भवतीति ज्ञाप्यते। अत्र भाष्यकृता फणिमणिनोक्तं-आचार्यप्रवृत्तिर्ज्ञापयतिशब्दसंज्ञायां न स्वरूपविधिर्भवतीति। यदयं "ष्णान्ता षट्" इति षकारान्ताया: संख्याया: षट्संज्ञां शास्ति।[1]" इति। यदि च शब्दशास्त्रे स्वरूपविधि: प्रवर्तते तर्हि षष् इत्यनेन एव षकारान्तस्य षट्संज्ञा सिध्यति। एवं चेत् नान्ता षट् इति वचनेनैव नान्तस्यापि षट्संज्ञा सिध्यति। एवं स्वरूपविधिना षान्तस्य वचनेन नान्तस्य च षट्संज्ञायां सिद्धायां षकारग्रहणं व्यर्थम्। तद् व्यर्थीभूय ज्ञापयति स्वरूपविधिर्न प्रवर्तते इति नास्त्येतस्य सूत्रस्य किमपि प्रयोजनमिति सूत्रमिदं प्रत्याख्यातं भाष्यकृता। काशिकाकृतापि भाष्यसिद्धं सूत्रस्यास्य प्रत्याख्यानमङ्गीकृतम्।

### 2.9 ज्ञापकानित्यत्वविचार:-

ननु अत्र केषाञ्चित् शङ्का भवति "ई हल्यघो:" इत्यत्र अघोरित्यनेन शब्दशास्त्रीयसंज्ञाया: स्वरूपबोधनिषेधात् "परेश्च घाङ्कयो:" "नदीपौर्णमास्याग्रहायणीभ्य:" इत्युभयत्र कथं स्वरूपग्रहणम्। अत्र समाधानं तावत् ज्ञापकसिद्धं न सर्वत्र। तस्यानित्यत्वादेव द्वयो: सूत्रयो: स्वरूपग्रहणम्। अनित्यत्वादेव ज्ञापकसिद्धस्य भाष्यकारेण अशब्दसंज्ञा इति प्रत्याख्यातम्।

### 2.10 सूत्राभावेऽपि अर्थवत्परिभाषासिद्धि:-

किञ्च, सूत्राभावेऽपि अर्थवत्परिभाषा तु स्वत:सिद्धा भवति। नागेशमते तु शास्त्रे शब्देन अर्थविशिष्टस्यैव शब्दस्य बोधाद् व्याकरणे अर्थवत: शब्दस्य ग्रहणे न भवत्यनर्थकस्य ग्रहणम्।[2] तेन "प्रादूहोढोढ्येषैष्येषु" इत्यस्मिन् वार्तिके अर्थवत ऊढशब्दस्य ग्रहणात् प्र ऊढ इति स्थिते एव वृद्धि:, प्र ऊढवान् इति स्थिते न वृद्धिरिति प्रौढ:, प्रोढवानिति च रूपद्वयं सिध्यति।

भट्टोजिदीक्षितनये तु परिभाषेयं ज्ञापकसिद्धा। "व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां ष:" (8-2-36) इत्यस्मिन् सूत्रे राजे: पृथक्तया यद्भ्राजिग्रहणं विहितं तद् ज्ञापयति- "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्"[3] इति।

---

1. महाभाष्यम् (1म-भाग:), पृ- 549
2. लघुशब्देन्दुशेखर: संज्ञापरिभाषाप्रकरणे, पृ 188
3. वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीव्याख्योपेता (1म-भाग:), पृ-88

## 2.11 स्वंरूपसूत्राभावे लाघवं, तत्सत्त्वे गौरवञ्च-

स्वंरूपसूत्राभावे लाघवं सूत्रसत्त्वे च गौरवमुपन्यस्तं नागेशेन। स्वंरूपसूत्रस्य प्रत्याख्यानादेव "सुसर्वार्द्धाज्जनपदस्य", "तस्यापत्यम्", "विभाषा वृक्षमृग", "देवताद्वन्द्वे च" इत्यादौ स्वरूपस्य ग्रहणं न भवति। तेन जनपदापत्यमृगदेवताशब्देभ्यो यथाक्रमं देश-सन्तति-मृगविशेष-देवविशेषाणां च प्रतीतिर्भवति।

किञ्च, सूत्राभावे एव लक्ष्यानुसारात् "स्वे पुष" इत्यत्र स्वशब्देन पर्यायाणां, विशेषाणां, स्वरूपस्य बोधः भवति, तेन स्वपोषम्, धनपोषम्, गोपोषमित्यादि सिध्यति। "सभा राजे"त्यत्र राजपदेन पर्यायाणामीश्वरादीनां, "पक्षिमत्स्यमृगान्हन्ती"त्यादिसूत्रेषु मृगपक्षिणोः पर्यायाणां, विशेषाणां, स्वरूपस्य, मत्स्यपदेन स्वरूपाणां विशेषाणां मीनरूपपर्यायस्य च बोधः सिध्यति। सूत्रस्य सत्त्वे तु स्व-राजन्-पक्षि-मृग-मत्स्यशब्दैः स्वरूपस्यैव बोध आपद्येत, तेन विशेषाणां पर्यायाणां च बोधाय विशेषयत्नः कर्तव्यः स्यादिति गौरवम्।

न केवलमेतद् गौरवमपि तु स्वंरूपसूत्रसत्त्वे "परेश्च घाङ्कयोः" इत्यत्र घशब्दं संज्ञात्वेन स्वीकृत्य अशब्दसंज्ञा इति वचनात् अर्थपरकत्वं स्वीकुर्यात्। किन्तु घशब्दश्चात्र स्वरूपपरः अपेक्षते। तेन एव परिघः पलिघः इत्यादिकं सिध्यति। एवमेव "नदीपौर्णमास्याग्रहायणीभ्यः" इत्यत्र नदीशब्देन स्वरूपग्रहणं च सूत्राभावे सिध्यति। तेन उपनदम् उपनदि इत्यादिप्रयोगाः सिध्यन्ति। एवं प्रकारेण सूत्रस्याभावे अपि लक्ष्यानुसारिव्याख्यानादेव सर्वं सिध्यति।

## 3. उपसंहारः-

लोके शब्दाद् अर्थस्य प्रतीतिः शास्त्रे किं शब्दाद् अर्थस्य उत शब्दस्य प्रतीतिः इत्याक्षेपसमाधानाय पाणिनिना "स्वं रूपं शब्दस्याशब्दसंज्ञा" इति सूत्रं प्रणीतम्। स्वशब्देन बहिरङ्गस्य साधारणस्यानियतोपस्थिकस्यापि अर्थस्य ग्रहणम्। रूपं च शब्दस्वरूपम्। अत्र विचारेण ज्ञातं यद् अशब्दसंज्ञा शब्दे संज्ञा शब्दसंज्ञा इति सप्तमीतत्पुरुषः। न शब्दसंज्ञा अशब्दसंज्ञेति नञ्समासः। अत्र शब्दपदं हि शब्दशास्त्रपरम्। शब्दशास्त्रे या संज्ञा सा हि संज्ञिनम् अर्थविशिष्टं शब्दं न बोधयति, अपि त्वर्थं बोधयति। एवं शब्दस्य बोध्यः संज्ञी भवति अर्थविशिष्टः शब्दः (अर्थविशिष्टं रूपम्), शब्दशास्त्रीयसंज्ञां वर्जयित्वा। अनेन सूत्रेण एव "अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्" इति परिभाषा सिध्यति अतः परिभाषा अनपेक्षिता। नागेशनये तु अनेन सूत्रेणार्थवत्परिभाषा, गौणमुख्यन्यायः, अभिव्यक्तपदार्थन्यायश्च सिद्धो भवति। यत्र विशिष्टरूपोपादानं भवति तत्रैव अस्य सूत्रस्य प्रवृत्तिः दृश्यते। शब्दस्य संज्ञी भवति अर्थविशिष्टः शब्दः, अनेनैव सूत्रेणार्थवत्परिभाषा सिद्धा शब्दशास्त्रे इयं संज्ञा न प्रवर्तते इत्येतानि अस्य सूत्रस्य प्रयोजनानि।

परन्तु वैयाकरणैः शब्दानां शब्दे अर्थे च पृथक् पृथक् शक्तिः इति पक्षस्य स्वीकाराद् व्याकरणे अर्थे कार्यस्य बाधे "अग्नेर्ढक्", "राज्ञो यदि" त्यादौ उपस्थितः अग्निशब्दः राजन्शब्दः च कार्यभाक् विशेष्यः अर्थश्च विशेषणम्। एवम् अग्नर्थवाचकाद् अग्निशब्दाद् ढक् इत्येवंक्रमेणार्थः समायातीति सूत्राभावे सूत्रकार्यसम्भवात् सूत्रमिदं महाभाष्ये प्रत्याख्यातम्। अयं प्रत्याख्यानपक्षः सूत्राभावे लाघवताप्रदर्शनेन अर्थवत्परिभाषादर्शनेन नागेशभट्टेन समादृतः। लक्ष्यानुसारिव्याख्यानात् सर्वत्र यथायोग्य-प्रतीतेः स्वीकारात् सर्वं सिद्धम्।

मम तु अयम् अभिप्रायो यद् लक्ष्यैकचक्षुष्काः ये भवन्ति तेषां नये सूत्राभावे अपि लक्ष्यानुसारिव्याख्यानात् सूत्रकार्यसिद्धेः सूत्रं नापेक्षते। परन्तु लक्षणैकचतुष्काणां कृते सूत्रमिदम् अवश्यम् अपेक्षते। किञ्च, पाणिनिना प्रणीतस्य एकस्यापि वर्णस्य महाभाष्यकारेण आनर्थक्यं न स्वीकृतम्। अतः सूत्रम् अनर्थकम् इति वक्तुम् अशक्यम् इत्यलं विस्तरेणेति शिवम्।

**सन्दर्भाः**

1. पतञ्जलिः। शास्त्री, श्रीभार्गवः (सम्पा०) (2012)। व्याकरणमहाभाष्यम् (1म-खण्डः)। चौखम्बासंस्कृतप्रतिष्ठानम्। दिल्ली।

2. भट्टः, नागेशः। आचार्यः शर्मा, विश्वनाथः (व्याख्या०) (2012)। लघुशब्देन्दुशेखरः संज्ञापरिभाषाप्रकरणे। चौखम्बा-सुरभारती-प्रकाशनम्।

3. भट्टोजिदीक्षितः। शर्मा, गिरिधरः; शर्मा, परमेश्वरानन्दः च (सम्पा०) (2004)। वैयाकरणसिद्धान्तकौमुदी बालमनोरमातत्त्वबोधिनीव्याख्योपेता (1म-भागः)। मोतीलाल बनारसीदास।

4. भट्टोजिदीक्षितः। पञ्चोली, बालकृष्णः (सम्पा०) (1966)। वैयाकरणसिद्धान्त-कौमुदी पण्डितसभापतिशर्मोपाध्यायविरचितया लक्ष्मीटीकया सहिता (प्रथमांशः)। मोतीलाल बनारसीदास।

5. भर्तृहरिः। पद्मश्रीः शर्मा, पण्डितरघुनाथः (सम्पा०) (2006)। वाक्यपदीयम् (ब्रह्मकाण्डम्) अम्बाकर्त्रीस्वोपज्ञवृत्तिव्याख्याद्वयोपेतम्। सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः। वाराणसी।

6. वामनजयादित्यौ। त्रिपाठी, जयशङ्करलालः; मालबीयः, सुधाकरः (सम्पा०) (1985)। काशिका न्यास-पदमञ्जरी-भावबोधिनी-सहिता (प्रथमो भागः)। तारा बुक एजेन्सी। वाराणसी।

✦✦✦

 ISSN : 0975-1769

# स्त्रीधनविषये प्राचीनधर्मशास्त्रेण सहार्वाचीनहिन्दुविधेस्तुलनात्मकमध्ययनम्

-डॉ. अञ्जन-दासः *

शोधसारः- स्मृतिकारैः धर्मशास्त्रसाहित्यं बहुधा विभज्य तेषु व्यवहारस्य कृते गुरुत्वपूर्णं स्थानं प्रदत्तम्। तत्र अष्टादशव्यवहारपदेषु दायभागोऽतीव विशिष्टं स्थानमलंकरोति। तत्रापि च सर्वैः स्मार्तैः धनान्तरापेक्षया स्त्रीधनविषये विचारः कृतः सयुक्त्या। शोधनिबन्धे मया स्त्रीधनस्य स्वरूपं, तस्याधिकारः, अपि च अर्वाचीन-हिन्दुविधिना सह तुलनात्मकमध्ययनमालोचितम्। मृतायाः स्त्रीया धनस्य अधिकारी कः भवेत् तद्विस्तरेण सतथ्यमालोचितम्। अर्वाचीनहिन्दुविधिनापि तस्य धनस्य अधिकारी को भवेत् तदपि सम्यक्त्वेन परिस्फुटितं मया।

कूटशब्दाः- व्यवहारः, स्त्रीधनम्, हिन्दुविधिः, Hindu Succession Act.

धर्मशास्त्रगगने प्रामुख्येन आचार-व्यवहार-प्रायश्चित्तत्वेन अध्यायत्रयोल्लेखो दृश्यते। वस्तुतः तत्र स्मृतिकारैः सूत्रकारैश्च स्वस्वविचारितेषु ग्रन्थेषु प्रायशोऽयमेव नियमः संस्थापितः। मिताक्षराकारेण श्रीमता विज्ञानेश्वरेण कृत्स्नमपि धर्मशास्त्रं षोढा विभज्य तेषामन्तर्भावस्त्रिषु अध्यायेषु वै कृतः। तद्यथा- आचाराध्याये वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, साधारणधर्मश्चेति। व्यवहाराध्याये शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिरूपो गुणधर्मः। प्रायश्चित्ते चाध्याये निमित्तधर्मो वर्णितः। अत्रेदं स्मर्तव्यं यत् बहुभिः स्मार्तैरपि धर्मशास्त्रसाहित्यं बहुधा विभज्य तेषु व्यवहारस्य कृते गुरुत्वपूर्णं स्थानं प्रदत्तम्। स च व्यवहारशब्दो 'वि' उपसर्गात् 'अव' उपसर्गाच्च 'हृ' धातोः 'घञ्' प्रत्यये निष्पद्यते। अस्यार्थः कात्यायनेनेत्थं प्रतिपादितः-

**विनानार्थेऽव सन्देहे हरणं हार उच्यते।**
**नानासन्देहहरणाद्व्यवहार इति स्मृतः॥**[1] इति।

याज्ञवल्क्येन कथितं धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैरभिभूतो यद्राज्ञे प्राडविवाकाय वा विज्ञापयति तदेव व्यवहारपदवाच्यं भवेत्। परन्तु विज्ञानेश्वरेण 'अन्यविरोधेन स्वात्मसम्बन्धितया कथनं व्यवहार'[2] इत्युक्तम्। यथा- कश्चिदिदं

---

* सहाचार्यः, संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्, पश्चिमबङ्गप्रदेशः।

1. कात्यायनस्मृतिः- 26
2. मिताक्षरा, पृ.- 103

क्षेत्रं मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति प्रतिपादयति तदा तत्र व्यवहारो भवति। तर्हि राजा व्यवहारदर्शनं कथं कुर्यादित्युक्तं भगवता मनुना-

**व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः स पार्थिवः।**
**मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम्॥**[1] इति।

योगीवरयाज्ञवल्क्यमतमप्यत्र स्मरणीयं-

**व्यवहारान्नृपः पश्येद्विद्वद्‌भिर्ब्राह्मणैः सह।**
**धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥**[2] इति।

अत्र व्यवहारदर्शने विद्वांसः सर्वधर्मविच्च ब्राह्मणो नियोक्तव्य इति योगीवरस्याभिप्रायः। स च व्यवहारो भाषा-उत्तर-क्रिया-साध्यसिद्धिभेदात् पादचतुष्टयात्मकः।[3] तत्र प्रत्यर्थिनोऽग्रतो लेख्यमिति भाषापादः। श्रुतार्थस्योत्तरं लेख्यमिति उत्तरपादः। ततोऽर्थी लेखयेत् सद्य इति क्रियापादः। तत्सिद्धौ सिद्धिमाप्नोतीति साध्यसिद्धिपादश्चेति। स च प्रतिज्ञा-उत्तर-संशय-हेतु-परामर्श-प्रमाण-निर्णय-प्रयोजनात्मको व्यवहारः तस्य पदं विषयः व्यवहारपदमित्युच्यते। स च द्विविधः शंकाभियोगस्तत्त्वाभियोगश्चेति। स पुनश्च अष्टादशधा इत्युक्तं भगवता मनुना-

**तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।**
**संभूय च समुत्थानं दत्तस्यानपकर्म च॥**

**वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।**
**क्रयविक्रयानुशयो विवादः स्वामिपालयोः॥**

**सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।**
**स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव॥**

**स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।**
**पदान्यष्टादशैतानि व्यवहारस्थिताविह॥**[4] इति।

अत एव दृश्यते धर्मशास्त्रे विचारितेषु अष्टादशव्यवहारपदेषु दायभागोऽतीव विशिष्टं स्थानमलंकरोति। तत्रापि च सर्वैः स्मार्तैः धनान्तरापेक्षया स्त्रीधनविषये विचारः कृतः सयुक्त्या। स्त्रीधनमित्ययं शब्दः विभिन्नरूपेण गृहीतः मुख्यदायभागकारैः।

---

1. द्विवेदी, गिरिजाप्रसाद (1915)। मनुसंहिता। लखनौः नवल किशोर विद्यालय, श्लोकसंख्या- 3/1
2. सेट्लार, जास्टिस् एस्. एस्. (2007)। याज्ञवल्क्यसंहिता। तिरुपतिः राष्ट्रीय संस्कृत संस्थान्, श्लोकसंख्या- 2/1
3. तदेव- 2/7-8
4. द्विवेदी, गिरिजाप्रसाद(1915)। मनुसंहिता। प्रागेव, श्लोकसंख्या- 8/4-7

तत्र विज्ञानेश्वरमते स्त्रीधनशब्दो यौगिकः न पारिभाषिकः योगसम्भवे परिभाषाया अयुक्तत्वात्। अत एव स्त्रीस्वामिकं धनं स्त्रीधनमिति। तथा च विभिन्नानि वचनानि स्त्रीधनपरकाण्युदाह्रियन्ते। यथा न्यूनातिन्यूनं षड्विधमित्युक्तं भगवता मनुना–

**अध्यग्न्यध्यवाहनिकं दत्तञ्च प्रीतिकर्मणि।**
**भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्।।**[1] इति।

नारदेनाप्यनुरूपं मतं प्रकाशितम्।[2] अत्र तु स्त्रीधनस्य यत् षड्विधत्वमुक्तं तन्न्यूनसंख्याव्युदासार्थं नाधिकसंख्याव्यवच्छेदाय इति विज्ञानेश्वरमतम्। यतः षडतिरिक्तानि अन्वाधेयाधिवेदनिकादिनी स्त्रीधनानि स्मृतिकारान्तरैः प्रदर्शितानि। यथा याज्ञवल्क्येन कथितम्–

**पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम्।**
**आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्तितम्।।**

**बन्धुदत्तं तथाशुल्कमन्वाधेयकमेव च।।**[3] इति।

इदानीं षड्विधानामध्यग्न्यादीनां स्त्रीधनानां लक्षणं प्रदर्श्यते। तत्र प्रथमं तावद् अध्यग्न्या लक्षणम्–

**विवाहकाले यत्स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।**
**तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम्।।**[4] इति।

अर्थात् विवाहकाले अग्निसन्निधौ यत्पित्रादिदत्तं तदध्यग्निस्त्रीधनम्। यत्तु पितृगृहाद्भर्तृगृहं नीयमानया लब्धं तदध्यावाहनिकम्–

**यत्पुनर्लभते नारी नीयमाना पितृगृहात्।**
**अध्यावाहनिकं नाम तत्स्त्रीधनमुदाहृतम्।।**[5] इति।

यत्तु प्रीतिहेतुकर्मणि भर्त्रादिदत्तं तथा भ्राता पित्रा च समयान्तरे यद्दत्तम्। प्रीतिदत्तस्य तु परिभाषा हि–

**प्रीत्या दत्तं तु यत्किञ्चिच्छ्वश्वा वा श्वशुरेण वा।**
**पादबन्दनिकं चैव प्रीतिदत्तं तदुच्यते।।**[6] इति।

---

1. तदेव– 9/194
2. नारदीयस्मृतिः– 4/13/8
3. सेट्लार, जास्टिस् एस्.एस्. (2007)। याज्ञवल्क्यसंहिता। प्रागेव, श्लोकसंख्या– 2/143
4. कात्यायनस्मृतिः– 895
5. तदेव– 896
6. तदेव– 897

अथ सौदायिकस्त्रीधनं हि-

**ऊढया कन्यया वापि पत्युः पितृगृहेऽपि वा।**
**भ्रातुः सकाशातिपत्रोर्वा लब्धं सौदायिकं स्मृतम्।।**[1] इति।

अर्थात् विवाहितकन्यायाः पतिगृहे पितृगृहे वा भर्तुः सकाशात् पितुः सकाशाद्वा यद्धनं लभ्यते तद्धनं सौदायिकमित्युच्यते।

जीमूतवाहनमते स्त्रीधनशब्दस्तु पारिभाषिकः, न तु यौगिकः। यस्माद्धि स्त्रियाः धनमित्यन्वये स्त्रीधनं नोपयुज्यते। यथा भगवता मनुना भणितम्-

**भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।**
**यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्।।**[2] इति।

अतः मनुवचनानुसारं स्त्रिया धनं न स्त्रीधनमस्वतन्त्र्यादिति। अपि तु-

**पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम्।**
**आधिवेदनिकं बन्धुदत्तं शुक्लान्वाधेयकम्।।**[3] इति।

विष्णुवचनाद्धनविशेषे स्त्रीधनं पारिभाषिकरूपेणाभिधीयते।

वस्तुतः आधुनिकहिन्दुमते स्त्रीस्वामिकं धनं स्त्रीधनम्। अर्थात् यस्मिन् धने केवलं स्त्रिया एव स्वाम्यं तदेव धनं स्त्रीधनम्। तद्धनं मुख्यतः त्रिषु अवस्थासु प्राप्यते। यथा अविवाहितावस्थायां पितृमातृकुलाद् यल्लभ्यते, वागदतावस्थायामुपहाररूपेण यत्प्राप्यते। विवाहकाले भर्तृगृहगमनावस्थायाम् स्वजनानां पक्षतश्च यद्धनं प्राप्तिर्भवति तत्सर्वं स्त्रीधनमिति। एतासु त्रिषु अवस्थासु 'प्रीभि-काउनसिल्' इत्यनेन प्राप्तं स्त्रीधनमपि एकादशविधं भवति- पितृदत्तं, मातृदत्तं, भ्रातृदत्तं. भर्तृदत्तं, भर्तृकुलाल्लब्धं, अग्न्युपागतम्, अध्यावाहनिकम्, आधिवेदनिकमन्वाधेयं, पादवन्दनादिकं, शुल्कं, पुत्रदत्तमिति। एतेषु स्त्रीधनेषु स्त्रियाः सम्पूर्णाधिकारो विद्यते। परन्तु 1956 खीष्टाब्दात्प्राक् उत्तराधिकारसूत्रेण लब्धे धने तस्याः सम्पूर्णाधिकारो नास्ति। वस्तुतः चतुर्दशधाराबलेन अधिकारोऽयं प्राप्तः[4]-Property of a female Hindu to be her absolute property-

1. Any property possessed by a female Hindu, whether acquired before or after the commencement of this Act, shall be held by her

---

1. तदेव- 902
2. द्विवेदी, गिरिजाप्रसाद (1915)। मनुसंहिता। प्रागेव, श्लोकसंख्या- 8/416
3. शास्त्री, अ. सुब्रह्मण्य(2015)। जीमूतवाहनविरचितः दायभागः। दिल्लीः मोतीलाल बनारसी दास पावलिशार्स्प्राइवेट् लिमिटेड्, पृ.- 23
4. Hindu Succession Act of India 1956

as full owner thereof and not as a limited owner- Explanation—In this sub-section, property, includes both movable and immovable property acquired by a female Hindu by inheritance or devise, or at a partition, or in lieu of maintenance or arrears of maintenance, or by gift from any person, whether a relative or not, before, at or after her marriage, or by her own skill or exertion, or by purchase or by prescription, or in any other manner whatsoever, and also any such property held by her as STRIDHANA immediately before the commencement of this Act.

2. Nothing contained in sub-section (1) shall apply to any property acquired by way of gift or under a will or any other instrument or under a decree or order of a civil court or under an award where the terms of the gift, will or other instrument or the decree, order or award prescribe a restricted estate in such property.

वस्तुतः प्राचीनधर्मशास्त्रेऽपि दृश्यते स्त्रियाः जीवद्दशायां तस्मिन् स्त्रीधने अन्यस्य कस्यापि अधिकारो नास्ति। परन्तु तन्मरणानन्तरं तत् स्त्रीधनं कः ग्रहीतुमधिकारी वा तस्मिन् धने के वा अधिकारिणः इत्येतेषां प्रश्नानामुत्तरं प्रदत्तम्। मातरि मृतायां स्त्रीधने प्रथमं दुहितॄणामधिकारः, दुहितृषु ऊढाऽनूढासमवाये प्रथममविवाहिता, तदभावे विवाहिता इति। विवाहितासु प्रथमं पुत्रवती, तदभावे सम्भावितपुत्रा, तदभावे च बन्ध्याविधवाविपर्ययस्तपुत्रादयो गृह्णीयुरिति जीमूतवाहनमतम्। योगीवरमतानुसारम्[1] दुहित्रभावे दौहित्र्यः, धनहारिण्यो भवन्ति। दुहितृ-दौहित्र्यं समवाये दौहित्रीणां कृते किंचिदेव दातव्यम्। भगवन्मनुमते दौहित्रीणामप्यभावे दौहित्रा धनहारिणः भवन्ति-

**यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः।**
**मातामह्या धनात् किंचित् प्रदेयं प्रीतिपूर्वकम्।।**[2] इति।

तथापि 'ताभ्यः ऋतेऽन्वयः' इति याज्ञवल्क्यवचनादवगम्यते तद् दौहित्रीणामभावे पौत्रादयो धनभाजो भवन्ति। नारदेनाप्यनुरूपं मतं प्रकाशितम्- 'मातुर्दुहितरोऽभावे दुहितॄणां तदन्वयः'।[3] इति। अत्र च नव्यस्मार्तरघुनन्दनमतमपि स्मरणीयम्- तन्मते स्त्रीधनाधिकारक्रमः पिण्डदानक्रमानुसारं प्रदर्शितः। तत्र प्रथमो देवरस्तत् पिण्डभर्तृदेय-पूर्वत्रिपुरुषपिण्डदातृत्वात्। तदभावे तद्भर्तृमातृसुता तदभावे स्वभगिनीपुत्रः मातृष्व-सृधनेऽधिकारी। तदभावे स्वभर्तृभगिन्योः मातुलानीधनेऽधिकारो भवति। तदभावे भ्रातृसुतः, तस्याप्यभावे श्वशुरयोः पिण्डदानात् जामाता धनाधिकारो भवति।

1. सेट्लार, जास्टिस् एस्.एस्. (2007)। याज्ञवल्क्यसंहिता। प्रागेव, श्लोकसंख्या- 2/135-136
2. द्विवेदी, गिरिजाप्रसाद (1915)। मनुसंहिता। प्रागेव, श्लोकसंख्या- 9.193
3. नारदीयस्मृतिः- 2/23

अथ अप्रजसः स्त्रीधने कस्याधिकार इति प्रसंगे अप्रजस्त्रीधनं भर्तुः ब्राह्मादिषु चतुर्ष्वपि इति योगीवरयाज्ञवल्क्यमतम्-

**अप्रजस्त्रीधनं भर्तुब्राह्मादिषु चतुर्ष्वपि।**
**दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्॥**[1] इति।

परिशेषे वक्तुं शक्यते अर्वाचीनहिन्दुविधौ मृतायाः स्त्रियाः धने केषामधिकारो भवेदिति विषये यल्लिखितं तेन सह प्राचीनधर्मशास्त्रस्य सायुज्यं सर्वत्र नास्ति। यथा- पञ्चदशधारायामुक्त[2] मुल्लामहोदयेन उत्तराधिकारिसूत्रेण हिन्दुनारी पित्रोः सकाशाद् यां सम्पत्तिं लब्धवती सा, तत्पुत्रकन्यानामभावे (पूर्वमृतपुत्रकन्यानां सन्तानैः सह) तत्पितुरुत्तराधिकारिणां सविधे यास्यति। पुनश्च हिन्दुनारी भर्तृश्वशुरादिभ्यः सकाशादुत्तराधिकारिसूत्रेण यां सम्पत्तिं लब्धवती सा सर्वा स्वपुत्रकन्यानामभावे (पूर्वमृतपुत्रकन्यानां सन्तानैः सह) तद्भर्तुरुत्तराधिकारिणां सविधे यास्यति। षोडश-धारामस्ति[3] यदि मृतकस्य पुत्रः कन्या वा स्वपुत्रकन्यादिकमुत्पाद्य मृताः, उत्पन्नाः पुत्रकन्याश्च विभागकाले जीविताः, तर्हि ते पुत्रकन्यादयस्तं तमंशं परस्परं विभज्य नेष्यन्ति, मृतकस्य मरणकाले जीविताः तत्पितरो मातरश्च यं यमंशमलप्स्यन्। अतः प्राचीनकाले यो नियमः प्रचलितः आसीत् स तस्मिन्समये कृते, अद्य यो नियमोऽस्ति स अस्मिन्समये कृते इति शम्।

✦✦✦

1. सेट्लार, जास्टिस् एस्.एस्. (2007)। याज्ञवल्क्यसंहिता। प्रागेव, श्लोकसंख्या- 2/144
2. Hindu Succession Act of India-1956
   Notwithstanding anything contained in sub&section (1)—
   a) Any property inherited by a female Hindu from her father or mother shall devolve, in the absence of any son or daughter of the deceased (including the children of any pre-deceased son or daughter) not upon the other heirs referred to in sub-section (1) in the order specified therein, but upon the heirs of the father and
   b) Any property inherited by a female Hindu from her husband or from her father-in-law shall devolve, in the absence of any son or daughter of the deceased (including the children of any pre-deceased son or daughter) not upon the other heirs referred to in sub-section (1) in the order specified therein, but upon the heirs of the husband.
3. Hindu Succession Act 1956
   If any son or daughter of the intestate had pre&deceased the intestate leaving his or her own children alive at the time of the intestate's death] the children of such son or daughter shall take between them the share which such son or daughter would have taken if living at the intestate's death.

# उपनिषत्सु निहितप्रमुखतत्त्वानां विवेचनम्

-डॉ. विशम्बरदासः*

शोधसारः - उपनिषद् 'ब्रह्मविद्या' परमात्मविषयिणी 'पराविद्या' वेति व्यपदिश्यते। अत्र तु गत्यर्थकात् प्राप्त्यर्थकाद्वा सद्धातोर्निष्पन्नोऽयं शब्दः। लौकिकैरुपायैरनधिगतं तत्त्वं येनोपायेन विद्यते ज्ञायते, स उपाय एव 'विद्या'। सा च द्विविधा, परा अपरा च। येनोपायेन परमं तत्त्वमधिगम्यते, यस्मिन् विज्ञाते सर्वं विज्ञातं भवति, ज्ञातव्यं च नावशिष्यते, स एव 'पराविद्या', तद्भिन्ना विद्या तु 'अपरा'। धर्माधर्मयोः स्वरूपतत्साधन-फलविषयिणी 'अपराविद्या'। तथा हि विषयनिवृत्तिहेतोर्मोक्षसाधनपरा अध्यात्मविद्यैव पराविद्या। विषयप्रवृत्तिहेतोर्बन्धनकारणभूता कर्मकाण्डात्मिका वेदविद्या तु अपराविद्या। अधिगतोपनिषद्रूपाध्यात्मविद्यया 'अहं कर्त्ता' 'अहं भोक्ता' इत्यहङ्कारबुद्धिर्निवर्तते, तथा 'मम पुत्रः' 'मम भार्या' 'मम ऐश्वर्यम्' इत्येवं ममत्वबुद्धिश्च नाशमर्हति। अहङ्कारो ममत्वबुद्धिश्च बन्धनस्य कारणम्। अहङ्कारं ममत्वबोधं च प्रति आत्मविषयकम्, अज्ञानं कारणम्। अत आत्मज्ञानेन अज्ञाननाशे सति अहङ्कारममत्वबोधयोर्नाशाद् बन्धनस्य सम्यक्तया नाशो भवति। अनात्मविषयिण्या अपराविद्यया तु अहङ्कारम-मत्वबोधयोरुद्दीपनं भवति, न तूच्छेद इति विशेषः। तस्माद् ब्रह्मतत्त्वप्रतिपादनपरा उपनिषदेव पराविद्या, वेदवेदाङ्गादीनि तु धर्मतत्त्वप्रतिपादकानि अपराविद्या इति कीर्त्यते। इयमुपनिषद्विद्या न केवलं मुमुक्षुणाम् आरण्यकानां सन्न्यासिनाञ्च कृते समुद्दिष्टा, किन्तु संसारिणां ब्रह्मचर्यगार्हस्थ्याश्रमिणां साधारणजनानां प्रात्याहिकजीवनेऽपि नितरामुपयुक्ता। अस्माकं व्यावहारिकजीवनम् अध्यात्मभावनया सम्पृक्तम्। जीवनस्य नैतिकमूल्यबोधो धर्मबोधो वा अध्यात्मबोधे प्रतिष्ठितः। सर्वात्मबुद्धिम्विना प्रकृतधर्मबोधो न जागर्त्ति। अत एव अपराविद्यया संसारसागरं तीर्त्वा पराविद्यया मोक्षपदं प्रापणीयम्-

**प्रमुखशब्दाः** - अपराविद्या, उपनिषद्, पराविद्या, रहस्यविद्या।

संस्कृतस्य वाङ्मयं द्विविधं लौकिकं वैदिकञ्चेति। वैदिकवाङ्मयं च संस्कृतसाहित्यस्यामूलनिधिः। तत्र वैदिकवाङ्मयान्तर्गता खलु 'उपनिषत्'। उपनिषद् शब्दः उप+नि+शद्लृ+क्विप् प्रत्ययपूर्वकात् निष्पद्यते षदलृ विशरणगत्यव-सादनेष्वित्यनुसारेण षदलृ धातुः विशरणगतिशिथिलीकरणेति त्रिष्वर्थेषु प्रयुक्तो भवति।

---

* सहायक-आचार्यः, बाबू-अनन्त-राम-जनता-महाविद्यालयः, कौल-कपिस्थलम्, हरियाणा।

कठोपनिषदि शांकरभाष्ये जगदगुरुशंकराचार्येण त्रयाणामर्थानां विवेचनं प्रस्तुतम्। सांसारिक विशरणात्......उपनिषद् इत्युच्यते[1] अर्थात् जगतः प्रपंचस्य हेतुभूतायाः अविद्यायाः नष्टत्वात् विशरणम्, परमानन्दस्य हेतुभूतायाः ब्रह्मज्योतेः प्राप्तित्वात् गतिः तथा च ब्रह्मज्योत्या जन्ममरणादिदुःखत्रयाणां शमनत्वात् अवसादनमित्यादयः त्रयो ह्यर्थाः अपेक्षिताः वर्तन्ते। अस्ति तावद् वेदस्य अंशद्वयं मन्त्रो ब्राह्मणञ्चेति। तत्र मन्त्रव्याख्यानरूपस्य ब्राह्मणस्य प्रथमांशे मन्त्राणां यागादिकर्मसु विनियोगः प्रदर्शितः, स च भागो मन्त्रसंहितासहितः कर्मकाण्डात्मक एवेति सुप्रसिद्धः। द्वितीयांशे आरण्यकानि अरण्ये कृत्यानि ज्ञानकर्मणोः समन्वयसाधकानि श्रूयन्ते। तृतीयांशस्तु ज्ञानकाण्डात्मकोपनिषन्निचयोऽस्माकमत्र ज्ञातव्यविषयः। एतस्माद् कारणाद् सम्पूर्णवेदानां सारभूता उपनिषद् वेदस्यान्तर्भूतत्वाद् 'वेदान्त' इति नाम्ना प्रसिद्धा। उपनिषत् खलु वेदान्तस्य श्रुतिप्रस्थानरूपा। उपनिषद् इति शब्दः श्रुतावेव बहुवारं प्रयुक्तः। श्रीमद्भगवद्गीता च पुनरस्य स्मृतिप्रस्थानभूता गीताया उपनिषद्रूपता च विद्वद्भिः सर्वैः परिज्ञाता, यतोहि गीतायाः प्रत्येकाध्यायान्ते पुष्पिकायां 'भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायाम्' इति सन्दर्भेण सङ्कीर्त्तनात्। वेदान्तस्य न्यायप्रस्थानं बादरायणवेदव्यासप्रणीतं पञ्चपञ्चाशदुत्तर-पञ्चशतसूत्रोपबृंहितं प्रथितमस्ति लोके। विवक्षितञ्च जगद्गुरुशङ्कराचार्येण **'वेदान्तवाक्यकुसुमग्रथनार्थत्वात् सूत्राणाम्'**[2] इति वाक्ये यद् उपनिषद्वाक्यानि समुपजीव्यैव लब्धसत्त्वानि सर्वाणि वेदान्तसूत्राणि प्रवृत्तानि। उपनिषद्वाक्यं प्रकृतेः जीवपरमात्मनोः रहस्यमुद्घाटयति।

सेयमुपनिषत् विद्वद्भिः **'रहस्यविद्या'** इति नाम्ना ज्ञायते। उपनिषदुपदिष्टब्रह्म-तत्त्वस्य अतीव दुरूहत्वाद् रहसि गुरुमुखादेव इयं विद्या अधिगन्तव्या। यथा लिखितमस्ति छान्दोग्योपनिषदि-

**'पण्डितो मेधावी गन्धारानेवोपसम्पद्येत एवमेवेहाचार्यवान् पुरुषो वेद"**[3]। अत्र स्थित्यर्थकसद्धातोर्व्युत्पादित एवोपनिषच्छब्दः। गुरुशिष्ययोः अवस्थाननिमित्तका इयं विद्या इति तदर्थः।

अस्मिन् उपक्रमे ब्रह्मविद्याचार्येण अङ्गिरसा स्वशिष्याय शौनकाय उपदिष्टोऽयं सन्देशः। अस्मिन् सन्देशे वेदान्तस्य महत्त्वम्, व्यापकता, विशिष्टता च सूच्यन्ते। अस्मिन् विशाले प्रपञ्चे शताधिकाः विद्याः सन्ति। यथा वेदविद्या, वेदान्तविद्या, तर्कः, व्याकरणम्, मीमांसा, ज्योतिषम्, अस्त्रम्, शस्त्रम्, वैद्यम्, हस्तसामुद्रिकम्, नक्षत्रविद्याद्याः, अथ आधुनिकतान्त्रिकविद्याः, आभिः सह ब्रह्मविद्या, आत्मविद्या च।

---

1. कठोपनिषद्-शांकरभाष्यम्, प्रस्तावना
2. ब्रह्मसूत्रशारीरकभाष्यम्, 5.1.2
3. छान्दाग्योपनिषद्, 6.14.2

सर्वा अपि एताः विद्याः अत्र द्वेधा विभज्यन्ते। अनयोः द्वयोरेव विद्ययोः सर्वा अपि विद्याः अन्तर्भवन्ति। यथा च कथितं मुण्डकोपनिषदि ऋषिभिः –

**'द्वे विद्ये वेदितव्ये।...........परा चैवापरा चेति। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति। अथ परा यया तदक्षरमधिगम्यते'।**[1]

अपि च, अज्ञाननिवर्तका मोक्षतत्त्वप्रतिपादिका खलूपनिषद्विद्या। यस्यामुत्पद्य-मानायामविद्या नाशमर्हति सा विवेककारिणी बुद्धिस्तत्त्वतः 'विद्या' इत्यभिधीयते। तथा च श्रुतिः – 'सा विद्या या विमुक्तये। अयं भावः – मूलीभूता आत्मविषयिणी अविद्यैव बन्धनस्योपादानम्। सम्यगात्मज्ञानं विना तस्या निवृत्ति भवितुं नार्हति। तत्र श्रवणमनननिदिध्यासनैः सम्यगात्मज्ञानं भवति। तथा च श्रुतिः– **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[2]।

तत्र मननेन आत्मविषयक संशयनाशः, निदिध्यासनेन च आत्मविषयक-विपरीतबुद्धिनाशो भवति। ततश्चात्मदर्शनम्, आत्मदर्शनेन चाज्ञाननिवृत्तौ मुक्तिर्भवति। तदुक्तम् –

**स्वात्माज्ञानं कारणं बन्धनेऽस्य।**
**स्वात्मज्ञानं तन्निवृत्तिश्च मोक्षः।**[3]

अस्मिन् कल्पे अवसादनार्थकान्निवृत्त्यर्थकाद्वा उत्पन्न उपनिषच्छब्दः। इदन्त्व-वधेयम्, स्वस्वरूपप्राप्तिर्नित्यनिरतिशयसच्चिदानन्दस्वरूपाभिव्यक्तिर्वा मोक्षः। अत्र ज्ञानसमानकालीना अज्ञाननिवृत्तिः, तत्समानकालीनस्वयम्प्रकाशनित्यनिरतिशय-भूमानन्दाभिव्यक्तिः। नास्त्यत्र कार्यकारणभावः साध्यसाधनभावो वा। अतोऽत्र स्वस्वरूपप्राप्तिरूपाया मुक्तेरनित्यतापत्तिर्नापतति। नित्यनिरतिशयभूमानन्दभूतं मोक्षतत्त्वं श्रुतिस्मृतिन्यायप्रेक्षावदनुभवैश्चाभ्युपगतं भवति। तथा चात्र श्रुतिस्मृतिन्यायाः –

**यो वै भूमा तत् सुखम्, नाल्पे सुखमस्ति'**[4], **'ब्रह्म वेद ब्रह्मैव भवति'**[5], **'ब्रह्मभावश्च मोक्षः**[6]। अत्र 'सदा मे सुखं भूयात्, दुःखं मा भूत्' इति सर्वजनीनानु-भवश्चास्ति। उक्तञ्च,

---

1. मुण्डकोपनिषद्, प्रथममुण्डक, 5
2. बृहदारण्यकोपनिषद्, 2.4.5
3. संक्षेपशारीरकम् 1
4. छान्दाग्योपनिषद्, 7.23.1
5. मुण्डकोपनिषद्, 3.2
6. शारीरकभाष्यम्, 1.1.4

**देशकालानवच्छिन्नसुखाद्यर्थित्वदर्शनात्[1]।**

अत्र नित्यनिरतिशयसुखं यदि न स्यात्, तर्हि तत्प्राप्त्यभिलाषितापि न स्यात्। न हि आकाशकुसुमाद्यसद्वस्तुविषयिणी अभीप्सा कस्यचिद् दृश्यते। अतः सर्वेषामानन्त्याभिमुखिप्रवृत्तिदर्शनान्मोक्षसुखमस्तीति को नाम अपलपेत्? अत एव ऋषीणामाशंसनम्–

**असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय[2]।**

इदमत्र वक्तव्यं यद्, मुक्तिपदमभीप्सुभिः सन्न्याससहिता ब्रह्मविद्यैव नूनमपेक्ष्यते, न पुनः विषयासक्तिसमुपेतकर्मानुष्ठानमित्युपनिषदामनुशासनम्। तथा च श्रुतिः –

**"न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः[3]" 'ब्रह्मविदाप्नोति परम्'[4]। 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय[5]'।**

यस्तु सन्न्याससहितात्मबुद्धेरनधिकारी, स खलु शास्त्रोक्ताग्निहोत्रादिकर्माणि यावज्जीवनं सम्पादयेदिति उपनिषदः परामर्शः। तथा च मन्त्रः

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।[6]**

अर्थात् मनुष्य आलस्यं विहाय सर्वस्य द्रष्टारं न्यायाधीशं परमात्मानं कर्तुमर्हा तदाज्ञां च मत्वा शुभानि कर्माणि कुर्वन्तोऽशुभानि त्यजन्तो शतवार्षिकमायुः प्राप्नुवन्ति। सन्न्यासग्रहणासामर्थ्ये सति, कर्मकरणस्य अवश्यम्भावित्वात् शुभकर्मानुष्ठानादन्यः प्रकारो नास्ति। तच्च कर्म निष्काममवश्यं भवेद् इत्याशयवान् आह श्रुतिरत्र – 'न कर्म लिप्यते नरे'। साधकः कर्मयोगी कर्मणः पापपुण्यादिफलेन नैव युज्येत। गीतोपनिषदि भगवता भूयो भूयोऽभिहितमेतत्।

कथं तर्हि वेदे सकामकर्मोपदेशः ? शङ्कायामस्यामेवमुच्यते, 'रोचनार्था फलश्रुतिः इति भागवतोक्तेः श्रोतुः रुचिसम्पादनार्थमेव वेदे फलश्रवणम्। श्रुतेरत्र फलविशेषनिर्देशे न तात्पर्यम्, किन्तु अनासक्ततया कर्मसम्पादन एव तात्पर्यम्।

शास्त्रीयरीत्या सकामकर्मकारिणस्तु मृत्युमवाप्य दक्षिणायनपथा विचरन् कर्मानुसारेण पुनः पुनः जन्म लभन्ते। निष्कामकर्मकारिणस्तु नैष्कर्म्यं लब्ध्वा अन्ते

1. बृहदारण्यकभाष्यवार्तिकम्, 290
2. बृहदारण्यकोपनिषद्, 1.3.28
3. कैवल्योपनिषद्, 1.2
4. तैत्तिरीयोपनिषद्, 2.1
5. श्वेताश्वतरोपनिषद्, 3.8
6. ईशावास्योपनिषद्, 2

च स्वस्वरूपोपलब्धिं कृत्वा मुक्तकल्पा जीवन्मुक्ता भवन्ति। ये पुनः शास्त्रोक्तानि कर्माणि परित्यज्य केवलं रागतः प्राप्तानि शास्त्रनिषिद्धानि कर्माणि अनुतिष्ठन्ति ते तु अधोगच्छन्त्येव नियतम्।

अयमुपनिषदां परामर्शः, अविद्यासम्भूतानि शास्त्रीयाणि अग्निहोत्रादीनि सकामकर्माणि ये सम्पादयन्ति, ते खलु जन्ममरणचक्रेणावर्त्तिताः सन्तो गाढान्धकारं प्रविशन्ति। श्रुतिराह–

अत्र अविद्याशब्दः अग्निहोत्रादिकर्मपरः। 'विद्याया अन्याऽविद्या कर्मेत्यर्थः। कर्मणो विद्याविरोधित्वात् इति भाष्यसन्दर्भः। ये च तावद् देवतास्वरूपज्ञानपरायणाः, ते तु कर्मोपासनया यादृशं तमो लभ्यते ततोऽप्यधिकं तमो लभन्ते। अयं भावः, ऐहिकामुष्मिकफलकामनां हातुं ये न प्रभवन्ति, ते खल्वशुद्धचित्ताः कर्मण्येवाधिकारिणः स्युः, न तु ते कथमपि कर्म परित्यक्तुमर्हन्ति। सत्यपि कर्माधिकारे कर्मत्यागात्ते प्रत्यवायभाजो भवन्ति। ते च देवतातत्त्वानधिकारिणो विद्योपासनया कदापि देवलोकं प्राप्तुं न शक्नुवन्ति किन्तु पतिताः सन्तो भूयो भूयो दुःखमनुभवन्ति। अत एवाम्नायते,

**अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः।**[1]

अथ शङ्क्यते एवं सति कथं श्रुत्यन्तरेषु ज्ञानकर्मणोः पृथक् पृथग् अभ्युदयफलश्रवणम् 'विद्यया तदधिरोहन्ति', विद्यया देवलोकः कर्मणा पितृलोकः इति? तत्रोच्यते, उभयोः एकैकानुष्ठाननिन्दा एवात्र क्रियते। निन्दया चोभयोः समुच्चय एव प्रशस्यते। अतो ज्ञानसमुचितकर्मानुष्ठानमेव कर्तव्यम्, न तूभयोरेकैकानुष्ठानमित्याशयवानाह आचार्यशङ्करः –

**'तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैव, एकैकस्य पृथक्फलश्रवणात्'।**[2]

तत्तद् ज्ञानकर्मसमुच्चयानुष्ठानफलमपि स्फुटमुक्तमीशोपनिषदि–

**विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥**[3]

अर्थात् विद्यां च अविद्यां च देवताज्ञानं कर्म चेत्यर्थः। यस्तत् एतदुभयं सह एकेन पुरुषेण अनुष्ठेयं वेद तस्यैव समुच्चयकारिण एकैकपुरुषार्थसम्बन्धः क्रमेण स्यादित्युच्यते – अविद्यया कर्मणा अग्निहोत्रादिना मृत्युम्, स्वाभाविकं कर्म ज्ञानं च

1. ईशोपनिषद्, 9
2. तदेव, 9 शांकरभाष्यम्
3. ईशावास्योपनिषद्, 11

मृत्युशब्दवाच्यम्, तदुभयं तीर्त्वा अतिक्रम्य विद्यया देवताज्ञानेन अमृतं देवतात्मभावम् प्राप्नोति। अत्र मृत्युपदेन स्वाभाविकं रागतः प्राप्तमनर्थकरं ज्ञानं कर्म च प्रतीयते। 'अमृत' पदेन चापेक्षिकममृतत्वं भूतसम्प्लवकालपर्यन्तमेककल्पं यावद् वा अवस्थान-मवगम्यते 'आभूतसंप्तवं स्थानममृतत्वं हि भाष्यते' इति विष्णुपुराण वचनप्रामाण्यात्। तदत्र अग्निहोत्रादिलक्षणाविद्यया स्वाभाविकज्ञानकर्मरूपमृत्यूत्तरणं भवति, न तु महामृत्यूत्तरणम्। देवतातत्त्वविद्यया च नैव परमानन्दभूत मोक्षतत्त्वलाभः, किन्तु आपेक्षिकैहिकसुखाधिकसुखलाभ इति ज्ञातव्यम्। अस्मद्गमनवदनुचिन्तनादिषु सदा एकरूपता भवत्विति श्रुतेराघोषः -

**सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।**
**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।**
**समानी व आकूतिः समाना हृदयानि वः॥**[1]

गुरुशिष्ययोर्नित्यमच्छेदप्रीतिसम्पर्कोऽस्तु। यतोहि उपनिषद्काले छात्राः गृहात् दूरं उषित्वा निकषोपवसन्ति स्म। इत्यपि उपनिषद्विधानम् -

**सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।**
**तेजस्विनावधीतमस्तु मा विद्विषावहै॥**[2]

तदेवं प्रकृतसाम्यवादपरिपोषकवेदोपनिषदाद्यध्यात्मशास्त्राध्ययनेन यदा सर्वेषु एकतासम्प्रीतिसम्पादकं स्वपरकल्याणकरं धर्मतत्त्वं विज्ञायते, ततश्च जागर्ति हृदये हिंसाविरोधवर्जिता यथार्था साम्यभावना, तदैव खलु वयं साम्प्रतिकभयङ्कर-सम्प्रदायादिविरोधसङ्कटात् सर्वथा मुक्ता भवेम। इयमेव हि नित्यवेदोपनिषदनुशीलनस्य व्यावहारिककार्यकारिता।

सम्प्रति समन्तात् समग्रे विश्वे या हिंसा या च विच्छिन्नता दृश्यते, तत्र प्रकृतधर्मचिन्ताया अभाव एव कारणम्। प्रकृतधर्मस्वरूपमविजानत एव हि एवंविधः सम्प्रदायविरोधः। स एव प्रकृतो धर्मः, यस्तु बहुधा भिन्नानपि मानवान् एकतासूत्रेण सम्बद्धीकरोति। यस्तु जीवेषु मिथो विरोधं जनयति, हिंसावृत्तिञ्च वर्द्धयति, न स धर्मः। धर्मेण चित्तमुदारं भवति, न तु सङ्कीर्णम्। अपि च सम्प्रति भारतीयसनातनसंस्कृतेः सङ्कटकालः। स्वाधीनतोत्तर पञ्चाशद्वर्षेभ्यः परमपि वयं न स्वाधीनचेतसो जाताः। अस्माकं चेतः सुपाश्चात्त्यदेशीयभावदास्यमिदानीमपि विचरति। पाश्चात्त्यानां भोगसर्वस्व-भावनया वयमतिमात्रं प्रभाविताः। किन्त्वापातसुखकरोऽधिकाधिकविषयभोगोऽस्मद्धृदयेषु दुःखं प्रभूतमुत्पादयति। प्रेतं सुखं तु विषयवैराग्यादेव सम्पद्यते। तस्मात् संन्यास-

---

1. ऋग्वेदः, 5.10
2. कठोपनिषद्-शान्तिवचनम्

सहिता अध्यात्मभावनैव परमसुखप्राप्तेर्निदानम्। धनैश्वर्यपुत्रकलत्रादिविषयभोगस्तु अनिष्टकरत्वाद् भारतीयानामपसंस्कृतिरेव अतस्त्यागधर्म एव वरणीयः, न तु भोगधर्म इत्येव हि भारतीयसंस्कृतेर्वैशिष्ट्यम्। अस्य च सम्यगवगतये उपनिषदध्ययनमावश्यकम्। औपनिषदिका उपदिशन्ति–

**तेन त्यक्तेन भुञ्जीथाः, मा गृधः कस्यस्विद् धनम्।**[1]

तस्मादपसंस्कृतेरपसारणपुरःसरं कल्याणकरभारतीयसंस्कृतेः संरक्षणाय, साम्प्रतिकसम्प्रदायविरोधविनाशपूर्वकसर्वजनीनसम्प्रीतिसंविधानाय तथा सकलदुःख-समुच्छेदपूर्वकपरमशान्तिलाभाय चोपनिषदध्ययनपमेक्ष्यत एकान्ततया इति स्थितम्।

✦✦✦

1. ईशावास्योपनिषद्, 1

# प्राचीन भारतीय मूल्यांकन प्रणाली विमर्श

-प्रो. लीना सक्करवाल*

**सारांश**- शिक्षा जीवन पर्यन्त चलने वाली वह गत्यात्मक प्रक्रिया है जो व्यक्ति के बहुमुखी विकास से जुड़ी है। मनुष्यों के जीवन के चार स्तर- भौतिक, बौद्धिक, मानसिक और आध्यात्मिकता के चहुँमुखी विकास के रूप में इन्हीं चारों स्तरों में प्रत्येक बच्चे की छुपी हुई सम्भाव्यता का अनुकूलन करना आवश्यक होता है। और यह अनुकूलनता कक्षा में होने वाले निरन्तर अभ्यास जिसमें सतत मूल्यांकन की अवधारणा में निहित है, उसके माध्यम से ही प्रायः सम्भव हो सकता है। जो छात्र के व्यापक मूल्यांकन का आधार होगा तथा उसके द्वारा निश्चित किये गये छात्रों के परिणामात्मक मूल्य का भी निर्धारण करेगा। प्रस्तुत शोधपत्र में मूल्यांकन की इसी अवधारणा का विमर्श करते हुए मूल्यांकन आकलन के भेदों का वर्णन किया है और भारतीय परिप्रेक्ष्य में मूल्यांकन के सम्प्रत्यय का विचार विश्लेषण करते हुए प्राचीन भारतीय वाङ्मय के वैदिक-उपनिषद्काल के यम-नचिकेता संवाद, आदिकाव्य रामायण-महाभारत काल के यक्ष-युधिष्ठिर, रावण-सीता संवाद से लेकर संस्कृत साहित्य के उमा-महेश, राजा दिलीप के रघुवंश के विभिन्न प्रसङ्गो से भी आगे मूल्यांकन का विविध परिप्रेक्ष्यों में अवलोकन किया गया है। साथ ही गुरुकुल शिक्षा पद्धति की मूल्यांकन प्रणालियों की प्रासङ्गिकता को भी संस्तुत किया है।

**मुख्यबिन्दुः**- आकलन, मूल्यांकन, सतत मूल्यांकन, व्यापक मूल्यांकन, शलाकापद्धति, शास्त्रार्थ।

## प्रस्तावना

मनुष्य के विकास के महत्त्वपूर्ण आधारों में शिक्षा की अहम भूमिका होती है। यदि हम शिक्षा को एक वैज्ञानिक प्रक्रिया बनाना चाहते हैं तो हमें वैज्ञानिक दृष्टिकोण को अपनाना होगा। वैज्ञानिक दृष्टिकोण से तात्पर्य है कि हम प्राप्त परिणामों के ज्ञान के आधार पर वर्तमान क्रियाकलापों में परिवर्तन करें। वस्तुतः यह प्राप्त परिणाम विद्यार्थी के अधिगम की स्थिति को दर्शाते हैं। जो यह बताते

* शिक्षाशास्त्रविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालय, जयपुर परिसर, राजस्थान।

हैं कि विद्यार्थी का अपने विषय में क्या उपलब्धि स्तर है और बेहतर अधिगम के लिए क्या सम्भावनाएँ हो सकती है। **वायगॉस्की** की अधिगम के लिए रचनावादी दृष्टिकोण की अवधारणा इस बात पर जोर देती है कि आकलन केवल विद्यार्थी की उपलब्धि का ही नहीं है अपितु यह विद्यार्थी को अपने अधिगम को बढ़ाने में भी सहायता देता है।[1] परिणामों के ज्ञान की ओर उदासीन बना रहना वैसा ही है जैसे हम एक भवन निर्माण के लिए सामग्री, श्रम एवं धन व्यय करें पर यह न देखें कि आखिर यह भवन किस प्रकार का बना है, क्या यह हमारी अपेक्षा के अनुकूल है, क्या जितनी पूँजी इसमें लगी है उसके अनुरूप ही प्रतीत होता है या नहीं।[2]

इन परिणामों को जानने के पक्ष को लेकर ही, न केवल वर्तमान शिक्षा प्रणाली में अपितु प्राचीन भारतीय शिक्षा व्यवस्था में मूल्यांकन को एक सम्पूर्ण शैक्षिक-प्रक्रिया में परिवर्तन लाने का एक महत्त्वपूर्ण साधन माना है। मूल्यांकन की अवधारणा में किसी व्यक्ति के मापित मूल्य जैसे उसका ज्ञान, व्यवहार, आचार-विचार व्यक्तित्व, आत्मविश्वास इत्यादि का अवलोकन कर उसकी उपयुक्तता तथा उसके मूल्य का निर्णय किया जाता है। **ग्रोन लुण्ड** अपनी पुस्तक **"Measurement of Evaluation in Teaching"** में कहते हैं कि मूल्यांकन के अन्तर्गत छात्र व्यवहार परिमाणात्मक तथा गुणात्मक व्यवहार का अध्ययन एवं उसके मूल्य निर्धारण की प्रक्रिया मूल्यांकन कहलाती है।[3] **दाण्डेकर** मूल्यांकन को इस प्रकार परिभाषित करते हुए कहते हैं कि- मूल्यांकन हमें यह बताता है कि बालक ने किस सीमा तक किन उद्देश्यों को प्राप्त किया है।[4] **कोठारी आयोग** में मूल्यांकन को एक निरन्तर चलने वाली प्रक्रिया कहा है जो शिक्षा प्रणाली का एक अभिन्न अङ्ग है। इससे छात्र की अध्ययन आदतों का शिक्षक की शिक्षण पद्धति पर बड़ा प्रभाव पड़ता है। मूल्यांकन की प्रविधियाँ वांछित दिशाओं में छात्र के विकास विषय में प्रमाण संग्रहित करने के साधन हैं।[5] शिक्षणपद्धति में परिष्कार की दृष्टि से मूल्यांकन के साथ आकलन की अवधारणा को भी जोड़ा गया है। आकलन जिसे अंग्रेजी में **assessment** कहते हैं, एक सतत प्रक्रिया है जो कि सीखने को सुधारने के लिए निर्धारित की गयी है। इसी को ही शिक्षण अधिगम प्रक्रिया में सतत मूल्यांकन भी कहा जाता है। सतत का

1. पृष्ठ 67- इकाई- 12 सतत एवं व्यापक मूल्यांकन egyankosh.in
2. पृष्ठ 6- शिक्षा में मापन एवं मूल्यांकन, डॉ. शिरीष बालिया।
3. पृष्ठ 6, Measurement & Evaluation in Teaching, Gronlund, N.E.
4. पृष्ठ 50, Evaluation in school, Dandekar
5. Kothari Commission Report (1966): Reference in complete

तात्पर्य निरन्तरता से है, जिसमें आकलन को शिक्षण अधिगम प्रक्रिया में एक नियमित गतिविधि बनाना है। इसके अन्तर्गत छात्रों के प्रदर्शन को औपचारिक और अनौपचारिक तरीकों से आँका जाता है। और यह शिक्षण के साथ चलने वाली प्रक्रिया है। छात्रों के प्रदर्शन आकलन करने के लिए शिक्षक अवलोकन, साक्षात्कार, स्व तथा सहपाठी आकलन, समूह कार्य, परियोजना आदि विभिन्न तकनीकों का प्रयोग करते है। आकलन शिक्षण अधिगम से जुड़ा होने के कारण इकाई, त्रैमासिक, अर्द्धवार्षिक तथा वार्षिक परिक्षाओं के माध्यम से संपन्न किया जाता है। सतत आकलन का मुख्य उद्देश्य ही छात्रों को उनके अध्ययन में नियमित रूप से शामिल करना तथा उन्हें अपने अधिगम में अपनी प्रगति को समझने में सहायता करना है।[1]

यदि शिक्षक का उद्देश्य छात्रों के अधिगम व्यवहार को बेहतर बनाने तथा उन्हें अर्थपूर्ण अधिगम अनुभव देने के लिए शिक्षण रणनीतियों में बदलाव लाने का है तो सतत आकलन आवश्यक है। इसी क्रम में व्यापक मूल्यांकन की अवधारणा विद्यार्थी के सम्पूर्ण व्यक्तित्त्व के सर्वाङ्गीण विकास के आकलन का ध्यान रखता है। इस आकलन का उद्देश्य केवल किसी विषय विरोध में जिसमें विद्यार्थी पढ़ रहा है, उसके ज्ञान को आकना नहीं है बल्कि ज्ञान के अन्य क्षेत्रों जैसे कि कला तथा शिल्प शिक्षा, स्वास्थ्य तथा शारीरिक शिक्षा, शान्ति के लिए शिक्षा, जीवन कौशलों आदि में भी उसकी सहभागिता को आँकना है।

## प्राचीन कालमें मूल्यांकन की अवधारणा

मूल्यांकन की यह सतत व्यापक अवधारणा न केवल वर्तमान शिक्षा प्रणाली में संशोधन हेतु प्रेरित करती है, अपितु यह सम्प्रत्यय प्राचीन भारतीय शिक्षा प्रणाली का निरन्तर ही अभिन्न अङ्ग रहा है। सैद्धान्तिक रूप से मूल्यांकन का यह सम्प्रत्यय प्रायः संवादों के रूप में शास्त्रार्थों के द्वारा, प्रवेश परीक्षा की विभिन्न विधियों, शलाका परीक्षा, वाद-विवाद के स्वरूप में, वेदों, उपनिषदों, दर्शनों, रामायण, महाभारत तथा संस्कृत साहित्य के विभिन्न काव्यों में विविध प्रसङ्गो में उद्धृत हुआ है। जिसके विश्लेषण द्वारा यह ज्ञात होता है कि मूल्यांकन का स्वरूप जिस तरह प्राचीन काल के ग्रन्थों में प्रमाणरूप में उपलब्ध है वह अत्यन्त सूक्ष्म तथा गम्भीर अर्थों को व्यक्त करते हैं।

मूल्यांकन की अवधारणा के **एक उत्कृष्ट उदाहरण के रूप में कठोपनिषद् का यमराज-नचिकेता संवाद प्राप्त होता है।** आत्मतत्त्व को

---

16. पृष्ठ 69, इकाई- 12 सतत एवं व्यापक मूल्यांकन egyankosh.in

ग्रहण करने की पात्रता का मूल्यांकन करने हेतु यमराज द्वारा नचिकेता को पूछे गए प्रश्न ज्ञान की पात्रता की अर्हता के आकलन का अनुपम उदाहरण प्रस्तुत करता है। यमराज नचिकेता की आत्मतत्त्व के ज्ञान के प्रति जिज्ञासा देखकर प्रसन्न तो हैं, परन्तु वह यह जाँचना चाहते हैं कि वास्तव में नचिकेता उस ज्ञान को ग्रहण करने की पात्रता रखते भी हैं या नहीं। अत: तत्त्व की कठिनता का वर्णन करके यमराज नचिकेता का ध्यान हटाना चाहते हैं। किन्तु नचिकेता आत्मतत्त्व प्राप्ति की दुर्लभता को सुनकर भी तनिक नहीं घबराते, और न ही उनका उत्साह किसी भी प्रकार से मन्द होता है। यमराज ने आत्मतत्त्व ज्ञान को **'न हि सुविज्ञेयमणुरेष धर्मः'**[1] कहकर अत्यन्त सूक्ष्म बताया है। परन्तु नचिकेता यमराज के कथनों का सन्तोषपरक उत्तर देते चले जाते हैं। नचिकेता कहते हैं कि यदि विषय अत्यन्त सूक्ष्म है तो इसका महत्त्व और अधिक बढ़ जाता है- **'नान्यो वरस्तुल्य एतस्य कश्चित्'**[2] यमराज नचिकेता को सभी प्रकार के सांसारिक सुखों का प्रलोभन परीक्षा की दृष्टि से उनके सम्मुख रखते हैं किन्तु नचिकेता अपने निश्चय पर अटल रहें। तब यमराज ने स्वर्ग के दैवी भोगों का भी प्रलोभन दिया किन्तु नचिकेता ने इन सभी भोगों को क्षणभङ्गुर बताकर ठुकरा दिया।[2] जब पूरी तरह परीक्षा कर तथा प्रत्येक प्रकार से नचिकेता के मन:स्थिति का मूल्यांकन कर यमराज ने यह जान लिया कि नचिकेता दृढ़ निश्चयी, परम वैराग्यवान एवं निर्भीक है, तब उन्होंने ब्रह्मविद्या का उत्तम उत्तराधिकारी जानकर उपदेश आरम्भ किया। इस प्रसङ्ग से हम यह जान पाते हैं कि कठोपनिषद् का यमराज नचिकेता संवाद किसी विद्यार्थी के ज्ञानप्राप्ति की अर्हता के मूल्याङ्कन का सजीव चित्रण प्रस्तुत करता है। संवाद का यह चित्रण इस बात का संङ्केत करता है कि अमुक् क्षेत्र के अमुक् विषय के अर्ह व्यक्ति को ही ज्ञानप्राप्त होना चाहिए। क्योंकि ऐसा योग्य व्यक्ति ही ज्ञान के संरक्षण तथा सम्प्रसारण में महत्त्वपूर्ण योगदान दे सकेगा।

इसी प्रकार **छान्दोग्योपनिषद्** की **सत्यकाम जाबाल** की कथा भी प्राचीन भारतीय शिक्षा प्रणाली के मूल्यांकन का एक अनूठा उदाहरण प्रस्तुत करती है। सुन्दर कथा प्रतीकात्मक रूप में मूल्यांकन द्वारा सत्यता के महत्त्व को बतलाती है। समृद्धशाली परिवारों में परिचारिका के कार्य से जीवन निर्वाह करने वाली एक स्त्री जिसका नाम जबाला था। उसे यौवन वयस में एक पुत्र उत्पन्न हुआ जिसका

---

1. 'न हि सुविज्ञेयमणुरेष धर्मः'- कठोपनिषद् प्रथम वल्ली- 21
2. 'नान्यो वरस्तुल्य एतस्य कश्चित्'- कठोपनिषद् प्रथम वल्ली- 22
3. शतायुषः पुत्रपौत्रान् वृणीष्व बहून पशून- कठोपनिषद् प्रथम वल्ली- 23

नाम सत्यकाम था। जबाला के पुत्र सत्यकाम ने गुरुकुल के लिए प्रस्थान करने से पूर्व जबाला से अपना गोत्र पूछा। जवाब में उसकी माँ ने बताया कि वह अतिथि सत्कार करने वाली परिचारिणी थी, वहीं उसे पुत्र की प्राप्ति हुई थी, गोत्र क्या वह नहीं जानती। साथ ही माँ ने कहा कि तुम मेरे पुत्र हो, अपना नाम 'सत्यकाम जाबाल' बताना। सत्यकाम हारिद्रुमत गौतम के आश्रम में पहुँचा। आचार्य गौतम के पूछने पर उसने माँ की कही बात ज्यों की त्यों दोहरा दी। आचार्य ने कहा 'इतना स्पष्टवादी बालक ब्राह्मण के अतिरिक्त कौन हो सकता है।' कहानी प्रतीकात्मक है किन्तु मूल्यांकन के मानक को निर्धारित करती है। सत्यकाम की स्पष्टवादिता उसके तेजस्वी होने का प्रमाण गौतम को दे देती है। और वे तुरन्त ब्राह्मण की संज्ञा (तेजस्विता) से सम्बोधित करते हुए सत्यकाम का प्रवेश आश्रम में कर लेते हैं।[1]

**मूल्यांकन की कसौटी का एक प्रसंग महाभारत के आदिपर्व की कथा से भी** प्राप्त होता है।[2] जहाँ बाल्यकाल में पाँच पाण्डव तथा कौरव द्रोणाचार्य के आश्रम में शस्त्र-कौशल में प्रशिक्षण प्राप्त करने आते हैं। धनुर्विद्या सिखाने से पूर्व **द्रोणाचार्य सभी पाण्डवों का मूल्यांकन इस दृष्टि से करते हैं कि क्या वे सभी धनुर्विद्या सीखने के अधिकारी हैं भी या नहीं।** वे एक-एक करके सभी पाण्डवों से प्रश्न करते हैं तथा उनसे लकड़ी की चिड़िया की आँख बींधने के सम्बन्ध में प्रश्न पूछते हैं। सभी के उत्तरों में से अर्जुन के सटीक उत्तर पाकर, जहाँ अर्जुन केवल अपने लक्ष्य पर केन्द्रित था, जिसे

1. Bharatdiscovery.org
2. 132 वाँ अध्याय महाभारत (प्रथम खण्ड) आदिपर्व और सभापर्व, गीताप्रेस, गोरखपुर kindle edition

   एवमुक्तः सव्यसाची मण्डलीकृतकार्मुकः।
   तस्थौ भासं समुद्दिश्य गुरुवाक्यप्रचोदितः।।3।।
   मुहूर्तादिव तं द्रोणस्थैव समभाषत।
   पश्यस्येनं स्थितं भासं द्रुमं मामपि चार्जुन।।4।।
   पश्याम्येकं भासमिति द्रोणं पार्थोऽभ्यभाषत।
   न तु वृक्षं भवन्तं वा पश्यामिति च भारत।।5।।
   ततः प्रीतमना द्रोणो मुहूर्तादिव तं पुनः।
   प्रत्यभाषत दुर्धर्षः पाण्डवानां महारथम्।।6।।
   भासं पश्यसि यद्येनं तथा ब्रूहि पुनर्वचः।
   शिरः पश्यामि भासस्य न गात्रमिति सोऽब्रवीत्।।7।।
   अर्जुनेनैवमुक्तस्तु द्रोणो हृष्टतनूरुहः।
   मुञ्चस्वेत्यब्रवीत् पार्थं स मुमोचाविचारयन्।।8।।

चिड़िया की आँख के अतिरिक्त और कुछ न दिखायी दे रहा था। जब कि उसके अन्य भाईयों के चिड़िया के साथ-साथ वृक्ष, पेड़, फल, फूल इत्यादि सब दिख रहे थे। द्रोणाचार्य अर्जुन के इस उत्तर से सन्तुष्ट हो, उसके महानधनुर्धर होने की सम्भावना को परख लेते हैं। कहानी सिखाती है कि मूल्यांकन की एक कसौटी लक्ष्य की केन्द्रियता तथा सटीक उत्तरों का देना भी होता है। प्राचीन संस्कृत वाङ्मय में मूल्यांकन कसौटी, परीक्षा, चर्चा के स्वरूप में प्राप्त होता है, अर्थात् विविध संवादो जैसे यम- नचिकेता संवाद, यक्ष-युधिष्ठिर संवाद, सीता-रावण संवाद, द्रोणाचार्य-पाण्डव संवाद इत्यादि द्वारा कसौटी पर कसने के बाद ही व्यक्ति उस अमुक् ज्ञान का अधिकारी है या नहीं यह जाने बिना ज्ञान नहीं दिया जाता था। बहुत से ऐसे प्रसङ्ग है जहाँ संवाद के माध्यम से, प्रश्नोत्तर रीति के द्वारा परीक्षक ज्ञान के स्तर का अङ्कन करता है। इसी का ही एक उदाहरण महाभारत के वन पर्व का यक्ष-युधिष्ठिर संवाद है जो मूल्यांकन का बेजोड़ नमूना है। यक्ष द्वारा पूछे गये युधिष्ठिर को प्रश्न जिनका सही उत्तर देकर युधिष्ठिर अपने मृत भाईयों को जीवित कर यक्ष की मूल्यांकन दृष्टि में खरा उतर अपने भाईयों को पुन: उनकी जीवित अवस्था में प्राप्त किया। कथा कहती है कि पाण्डव जब वन में घूम रहे थे तब द्रौपदी के प्यास लगने पर उसने जल मांगा। जल ढूंढ़ने के लिए एक-एक करके सभी पाण्डव समीप सरोवर से जल लाने गये। मगर जल लेकर लौटे नहीं। अन्त में युधिष्ठिर द्वारा यह देखे जाने पर उनके सारे भाई प्राणहीन हुए भूमि पर गिरे हैं, और एक विशालकाय यक्ष जो कि उस तालाब का मालिक है, वह कहता है कि प्रश्नों के उत्तर दिये बिना, तालाब का पानी पीने की अर्हता नहीं है। प्रतीकात्मक रूप में यह कथा यही बताने का प्रयास करती है कि कसौटी पर कसे बिना, यदि मनुष्य को किसी स्थान, पद या उपाधि की प्राप्ति हो जाती है तो वह उस प्राप्ति को पचा न सकेगा। वह प्राणहीन होकर उसी प्रकार नष्ट हो जायेंगे जैसे युधिष्ठिर के भाई यक्ष के प्रश्नों की कसौटी पर खरे उतरे बिना तालाब का जल ले जाना चाहते थे, अत: यह कथा व्यक्ति की योग्यता के मूल्यांकन के निकष को प्रस्तुत करती है। **युधिष्ठिर द्वारा दिये गये उत्तरों से सन्तुष्ट हो जाने पर ही यक्ष सहर्ष उन्हें तालाब का पानी ग्रहण करने को कहते हैं।** मूल्यांकन कर्ता की प्राप्त उत्तरों से सहर्षता, संतोष भाव, मनुष्य को उसकी क्षमता, योग्यता का दर्पण दिखाता है। युधिष्ठिर ने एक-एक करके सभी प्रश्नों का संतुष्टिपरक उत्तर देकर यक्ष को संतुष्ट व प्रसन्न किया। यक्ष-युधिष्ठिर संवाद एक नमूना हम इस प्रकार देख सकते हैं।[1]

---

1. आरेण्यपर्व 312,313 महाभारत (द्वितीय खण्ड) वनपर्व और विराटपर्व, गीताप्रेस, गोरखपुर Kindle edition

**यक्ष उवाच**

**केनस्विच्छ्रोत्रियो भवति केनस्विद्विन्दते महत्।**
**केन द्वितीयान्भवति राजन् केन च बुद्धिमान्॥**

**युधिष्ठिर उवाच**

**श्रुतेन श्रोत्रियो भवति, तपसा विन्दते महत्।**
**धृत्या द्वितीयान्भवति, बुद्धिमान्वृद्धसेवया॥**

**यक्ष उवाच**

**किंस्विद् गुरुतरं भूमेः किंस्विदुच्चतरं च खात्।**
**किंस्विच्छीघ्रतरं वायोः किंस्विद् बहुतरं तृणात्॥**

**युधिष्ठिर उवाच**

**माता गुरुतरा भूमेः खात्पितोच्चरतस्तथा।**
**मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्॥**

इसी प्रकार रामायण में सीता रावण संवाद सीता के चरित्र के मूल्यांकन का दृश्य प्रस्तुत करता है[1] जहाँ सीता रावण द्वारा दिये गये प्रत्येक प्रलोभन को ठुकराकर प्रभुराम में ही प्रीति का सुन्दर चारित्रिक उदाहरण प्रस्तुत करती है तथा सीता की अग्निपरीक्षा का प्रसंग भी उनकी चारित्रिक मूल्यांकन के निकष को प्रस्तुत करता है। अग्निपरीक्षा प्रतीकात्मक रूप में जहाँ अग्नि अर्थात् कठिनाई को जो दर्शाये। किन्तु सीता की पतिव्रता तथा सच्चाई उस अग्निपरीक्षा में भी खरी उतरती है। मूल्यांकन का एक और निकष चारित्रिक पवित्रता तथा सत्यनिष्ठा भी इस घटना से सभी के समक्ष आता है। इस तरह के मूल्यांकन को मनोवैज्ञानिक दृष्टि से व्यवहार के अन्तर्गत भी रख सकते है।

---

1. 47 सर्ग (सप्तचत्वारिंशः सर्गः) श्रीमद्वाल्मीकीय रामायण (प्रथम खण्ड), गीताप्रेस, गोरखपुर
   पञ्चदास्यः सहस्राणि सर्वाभरणभूषिताः।
   सीते परिचरिष्यन्ति भार्या भवसि मे यदि॥31॥
   रावणेनैवमुक्ता तु कुपिता जनकात्मजा।
   प्रत्युवाचानवद्याङ्गी तमनादृत्य राक्षसम्॥32॥
   महागिरिमिवाकम्प्यं महेन्द्रसदृशं पतिम्।
   महोदधिमिवाक्षोभ्यमहं राममनुव्रता॥33॥

मूल्यांकन की अवधारणा के विविध दृष्टान्त उदाहरण संस्कृत वाङ्मय के ग्रन्थों में प्रचुरमात्रा में उपलब्ध मिलते है। गीता में आत्मज्ञान की प्राप्ति हेतु कृष्ण द्वारा दिया गया पात्र की अर्हता का पद्य भी मूल्यांकन का सजीव उदाहरण प्रस्तुत करता है।

**योगिनामपि सर्वेषां मद्‌गतेनान्तरात्मना।**
**श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।।** (6.41)

उसी प्रकार योगदर्शन में भी समाधि तक पहुँचने में सात सोपान **यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि** मूल्यांकन के स्वरूप को ही बतलाते हैं। इसी प्रकार **संस्कृत साहित्य में भी मूल्यांकन दृष्टि से प्रचुरमात्रा में** उदाहरण उपलब्ध होते हैं जैसे कालिदास के कुमारसम्भव में तपस्या करती हुई **पार्वती की परीक्षा लेने स्वयं शिव अन्य पुरुष का** वेशधारण कर पहुँचते है। उनके तप में कितना बल और कितनी निष्ठा है, उसका मूल्यांकन करने हेतु स्वयं शिव ही अपनी निन्दा करते है। किन्तु शिव के प्रति सच्ची निष्ठा रखने वाली पार्वती को एक क्षण के लिए भी विचलित नहीं कर पाते। आकलन की कसौटी का बेजोड़ नमूना है।[1] इसके अतिरिक्त **रघुवंश में राजा दिलीप की भक्ति की परीक्षा भी मूल्यांकन की पराकाष्ठा को प्रस्तुत करती है।** जहाँ नन्दिनी गाय की सेवा में समर्पित वे स्वयं सिंह के आगे भोजनरूप में उपस्थित हो जाते हैं।[2]

---

1. पृष्ठ 75, कालिदासविरचित कुमारसम्भवम् पञ्चम् सर्ग
   वपुर्विरुपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
   वरेषु यद् बालमृगाक्षि! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने।।72।।
   निवर्तयास्मादसदीप्सितान्मनः क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
   अपेक्ष्यते साधुजनेन वैदिकी श्मशानशूलस्य न यूपसत्क्रिया।।73।।
   इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाक्षरलक्ष्यकोपया। विकुञ्चित भ्रूलतमाहिते तया विलोचने तिर्यगुपान्तलोहिते
   उवाच चौनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्य माम्।।74।।
   अलोकसामान्यमचिन्त्यहेतुकं द्वेषन्ति मन्दाश्चरितं महात्मनाम्।।75।।
2. पृष्ठ 37, द्वितीय सर्गः, रघुवंश महाकाव्यम्,
   स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श।
   अधित्यकायामिव धातुमय्यां लोध्रद्रुभं सातुमतः प्रफुल्लम्।।29।।
   ततो मृगेन्द्रस्य मृगेन्द्रनामी दधाय वध्यस्य शरं शरण्यः।
   जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसमोद्धृतारिः।।30।।

इसी प्रकार **राजा शिबि के दानवीर, परोपकारी, रक्षार्थी होने की कथा का भी मूल्यांकन या परीक्षा का अद्‌भुत उदाहरण है।** जहाँ वह कबूतर की रक्षा में बाज को अपना हाथ काटकर तराजू में रखते है और फिर अन्त में सम्पूर्ण शरीर समर्पित कर देते है।

## प्राचीन विश्वविद्यालयों में मूल्यांकन पद्धतियों का स्वरूप

विविध उदाहरण, दृष्टान्त, घटनायें मूल्यांकन की अवधारणा के सम्बन्ध में प्राप्त होते हैं। केवल इतना ही नहीं प्राचीन भारतीय मूल्यांकन पद्धति का क्रियान्वित स्वरूप भी हमें तत्कालीन विश्वविद्यालयों जैसे **नालन्दा, तक्षशिला में अध्ययन हेतु, प्रवेश मूल्यांकन पद्धति के** रूप में प्राप्त होता है। यद्यपि प्राचीन शैक्षिक संस्थाओं में प्रवेश परीक्षा के विषय में बहुत थोड़ी सूचना प्राप्त होती है। तथापि इतना तो उपलब्ध होता है कि छात्रों का उच्च शैक्षिक संस्थानों में अमुक् विषय की कक्षा में प्रवेश हेतु गम्भीर परीक्षाओं से गुजरना होता था। छात्रों की मेधाशक्ति को ज्ञान की कसौटी पर गम्भीर ढंग से मूल्यांकित किया जाता था। उस समय किसी भी प्रकार के प्रवजन प्रमाण पत्र, उपाधियों इत्यादि नहीं होती थी जिनके आश्रय में छात्र अन्य किसी शैक्षिक संस्थान में प्रवेश ले सके। इस बात को प्रमाणित करते हुए **यॉन चॉग ( Youn Chwang )** कहते हैं कि[1] उस समय प्राचीन नालंदा विश्वविद्यालय में प्रवेश हेतु मात्र दस में से दो या तीन छात्रों का प्रवेश हो पाता था। **नालंदा, विक्रमशिला विश्वविद्यालयों के द्वारपाल प्रत्येक द्वार पर इसलिए ही नियुक्त होते थे ताकि वे मेधावी छात्रों की विद्वत्ता की जाँच कर उनको प्रवेश दे सकें।** उनका कार्य ही छात्रों की शैक्षिक योग्यताओं तथा क्षमताओं को जाँचता था और प्राय: प्रवेश परीक्षा का यह मूल्यांकन का सिद्धान्त अन्य सभी शैक्षिक संस्थाओं तथा विश्वविद्यालयों में अपनाया जाता रहा होगा। फिर भी सटीक रूप से कुछ कहा नहीं जा सकता।

प्राचीन भारत में नालन्दा विश्वविद्यालय उच्च शैक्षिक संस्था के रूप में विख्यात था। यह शैक्षिक संस्था विश्वविद्यालय की आखिरी स्तर का शिक्षा की समस्याओं का समाधान देने में, वाद-विवाद तथा जनसमूह में भाषण देने का प्रशिक्षण दिया करता था। इसलिए **Hiren Tsang ( Walterm ii, 165 )** कहता है[2] कि विदेशी छात्र अपनी शैक्षिक समस्याओं के समाधान को प्राप्त कर अत्यन्त प्रसन्न तथा उत्सवपूर्ण हो जाया करते थे। ये विदेशी विद्यार्थी मंगोलिया, चीन,

---

1. पृष्ठ संख्या 62-63, Altekar AS, Education in Ancient India
2. पृष्ठ- 563-564, डववामतरप, Radha Kumud, Ancient Indian Education, Brahmanical and Buddhist

कोरिया, तिब्बत, तोखरा इत्यादि देशों से भारत में नालन्दा विश्वविद्यालय में पढ़ने आया करते थे। ये विद्यार्थी अपनी शिक्षा के बल पर प्रसिद्धि प्राप्त करने भी आते थे। ये विद्वान विद्यार्थी जनसमूहों में अपने वाद-विवाद शास्त्रार्थ द्वारा अपनी प्रतिभा का प्रदर्शन कर तथा प्रमाणित सुधीजनों से विद्वत्ता की प्रमाणिकता प्राप्त कर प्रसिद्धि प्राप्त करते थे। इसलिए नालन्दा एक वस्तुत: शोधसंस्थान था जहाँ विलक्षण तथा बौद्धिक प्रतिभा से सम्पन्न विद्यार्थी शोधकार्य करने आया करते थे।

**राधाकुमुदमुखर्जी** अपनी पुस्तक **Ancient Indian Education, Brahmanical and Buddhist** में लिखती है कि उस समय सर्वोच्च फैलोशिप नालन्दा की ही मानी जाती थी। अत: नालन्दा विश्वविद्यालय में प्रवेश भी आसानी से नहीं होता था। वहाँ की प्रवेश परीक्षा अत्यन्त कठिन थी। मैट्रिक स्तर पर अनुत्तीर्ण छात्रों की संख्या बहुत अधिक हुआ करती थी। Hiven Tsang के अनुसार केवल 20% विद्यार्थी ही विश्वविद्यालय के प्रवेश परीक्षा को उत्तीर्ण कर पाते थे। फिर भी पढ़ने वाले छात्रों की संख्या 10,000 हुआ करती थी। प्रवेश परीक्षा हेतु छात्र की आयु 20 वर्ष की तो होनी ही चाहिए। I-tsing के अनुसार 15 की आयु में छात्र को वृत्ति सूत्र पढ़ना चाहिए और 20 वर्ष की आयु तक समाप्त कर देना चाहिए। और उसके पश्चात् 2 या 3 वर्ष के लिए उसे उच्च शैक्षिक संस्थान जैसे नालन्दा या वलभी विश्वविद्यालयों में दर्शन का अध्ययन करना चाहिए।

## प्राचीन मूल्यांकन पद्धतियों की प्रासंगिकता

पूर्व में भी इस बात की चर्चा की जा चुकी है कि प्राचीन भारतीय शिक्षा प्रणाली में वर्तमान व्यवस्था की तरह ईकाई, तिमाही, छमाही, वार्षिक परीक्षा इत्यादि नहीं हुआ करती थी। नवीन पाठ छात्र को तब ही पढ़ाया जाता था जब छात्र शिक्षक को मौखिक परीक्षा के द्वारा इस बात से संतुष्ट कर देता था कि उसे अब तक का पढ़ा हुआ सब कुछ कण्ठस्थ और अर्थसहित याद है या नहीं। किसी भी पाठ्यक्रम के अन्त में लंबी, थका देने वाली लिखित परीक्षाओं के स्थान पर छात्र अपने पाठों का मौखिक प्रस्तुतीकरण और उसकी अर्थ सहित व्याख्या किया करते थे। इन मौखिक परीक्षाओं के प्रचलित स्वरूप थे जैसे, शलाका परीक्षा, वाद-विवाद, शास्त्रार्थ, संवाद प्रश्न-प्रतिप्रश्न इत्यादि। शलाका परीक्षा के द्वारा छात्र की तीव्र बुद्धि का मूल्यांकन किया जाता था।[1] इस परीक्षा में परीक्षणकर्ता किसी भी ग्रन्थ के तालपत्रों के पृष्ठों में शलाका रखकर

1. पृष्ठ 303, संस्कृतशिक्षणं मूल्याङ्कनश्च, संस्कृतशिक्षणम् प्रो. सन्तोषमित्तल

पृष्ठविशेष से सम्बद्ध प्रश्नों पंक्तियों के भाव इत्यादि पूछते थे। यह उस समय की एक बहुत प्रतिष्ठित परीक्षा थी, जो आज वर्तमान में भी संस्कृत गुरुकुलों, विद्यालयों तथा विश्वविद्यालयों में अखिल भारतीय स्तर पर आयोजित की जाती थी। जो छात्र जिस विषय में निष्णात था वह उसमें परीक्षा देता था। जैसे व्याकरण-साहित्य-न्याय-वेदान्तादि-शास्त्रों के लक्षणग्रन्थों में शलाका रखकर परीक्षा होती थी। जैसे व्याकरण शास्त्र के महाभाष्यग्रन्थ में शलाकारूप में लेने वाली परीक्षा में इस प्रकार से प्रश्न पूछे जाते थे- जैसे इस पृष्ठ में कौन सा सूत्र है। सूत्र की संख्या क्या है। सूत्र की अनुवृत्ति क्या है। सूत्र का क्या अर्थ है। सूत्र की व्याख्या कैसे करनी चाहिए। सूत्र में विशेष क्या है। इत्यादि। प्रायः शलाका के अभाव में पुस्तक हाथ में लेकर परीक्षक मण्डल का एक सदस्य पुस्तक को उद्घाटित करता है। जो पृष्ठ उद्घाटित होता है, प्रक्रिया वहीं से प्रारम्भ होती है। यह परीक्षा वर्तमान समय में भी परम्परागत प्रणाली से संस्कृत पढ़ने वाले छात्रों के लिए अत्यन्त उपयोगी है। तथा जो अध्यापकों के द्वारा मौखिक परीक्षा के रूप में लाने के प्रयास में होनी चाहिए।

इसके अतिरिक्त आचार्य शिष्यों का परीक्षण शास्त्रार्थ पद्धति से भी करते थे। इसमें ग्रन्थ की कोई भी समस्या को प्रस्तुत करके उस पर छात्र अपने अपने विचारों को प्रकट करते थे। इस प्रकार तर्क-वितर्क द्वारा शिष्य अपने विचारों को प्रकट करते थे। आचार्य छात्रों के ज्ञान-उच्चारण-आत्मविश्वास इत्यादि का परीक्षण करते थे। वर्तमान समय में वाद-विवाद प्रतियोगिता के रूप में इसका स्वरूप देखने को मिलता है। परन्तु स्वरूप सर्वथा भिन्न है।

छात्रों के प्रवेश समय पर गुरु उसके पूर्वज्ञान की परीक्षा के लिए संस्कृत में वार्तालाप करते हुए लघुप्रश्नों को पूछते थे। वर्तमान समय में भी हम पाते हैं कि प्रवेश हेतु साक्षात्कार में छात्र के आधारभूत ज्ञान की परीक्षा के लिए प्रश्न पूछकर मौखिक परीक्षा ली जाती है। इसके अलावा विद्यार्थी की शिक्षा की समाप्ति पर उसके ज्ञान के मूल्यांकन हेतु स्थानीय विद्वद्जनों को आमन्त्रित किया जाता था। तथा वे लोग सभा में विद्यार्थी के ज्ञान का मूल्यांकन विभिन्न प्रश्नों द्वारा करते थे। **गृह्य सूत्रों**[1] से यह ज्ञान होता है कि इस तरह की विद्वद्जन सभा का आयोजन समावर्तन संस्कार (कार्यक्रम) की समाप्ति के पश्चात् किया जाता है। अतः यह बिल्कुल स्पष्ट हो जाता है कि विद्यार्थी की समावर्तन संस्कार हेतु योग्यता का निर्धारण विद्वानों की सभा द्वारा न होकर विद्यार्थी के शिक्षक द्वारा ही

---

1. Dr. GrS, III 1, 26:Ap. Gr S. 1,11,5

होता है, जो पूर्व में किया जा चुका होता है। **काव्यमीमांसा**[1] में राजशेखर कहते है कि परीक्षाओं का आयोजन राज्यसभाओं में हुआ करता था और चरक का **विमानस्थान**[2] में यह कहना कि प्रतिस्पर्धित चिकित्सकों की विद्वान सभाओं में किस प्रकार से गम्भीर शास्त्रार्थ हुआ करता था। इस प्रकार की परीक्षाएं तथा मूल्यांकन आधुनिक शिक्षा प्रणाली से सर्वथा भिन्न थे। चूँकि उस समय किसी भी प्रकार की डिग्री, डिप्लोमा हेतु परीक्षा नहीं होती थी। किन्तु, **तारानाथ** से यह पता चलता है कि बंगाल के **पाल राजा** जो उस समय **विक्रमशिला विश्वविद्यालय के संरक्षक कुलाधिपति** हुआ करते थे। विद्यार्थियों की शिक्षा समाप्ति पर दीक्षान्त समारोह में डिप्लोमा दिया करते थे।[3] मध्यकालीन बंगाल में बौद्धिक संस्थाओं द्वारा प्रसिद्ध उपाधि जैसे **तारकचक्रवर्ती, तारकालंकार,** विलक्षण विद्वान जैसे गदाधर तथा जगदीश को दी गयी थी। उपाधियों का इस तरह दिया जाना मध्यकालीन समय के नवाचार को दर्शाता है।

